
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

4798

॥ इदं पुस्तकं स्मृत्यर्थसारस्य ॥
॥ गदाधर परखरे यस्य पुस्तकं सत्यं ॥

Accession No:- 4798. M875

Title:- स्मृत्यर्थसार

Date:- संवत् 1840 शके 1705

ले:- सदाशिव मुरारभट्ट परखरे

Subject:- धर्मशास्त्र (कर्मकांड)

Author:- श्रीधराचार्य

पत्रे -148.

॥१॥

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीकुलस्वामिन्यै नमः ॥ गणेशंत्र्यलिविष्टी
श्यान्याऽऽत्मालोकपान्गुरून् ॥ दुर्गाभिन्नादिकान्नूवंदे व्याख्यातृंश्च सदा
गुरून् ॥ १ ॥ श्रीकंठः श्रीकराचार्यैः श्रुतिस्मृतिपुराणगैः ॥ स्मृतिशास्त्र
ग्रंथेनेकेषु विप्रकीर्णं अनेकधा ॥ २ ॥ अनुष्ठानुपकारार्थं स्मृतिच्छिद्रं प्रयत्न
तः ॥ पुराणन्यायमीमांसासांगवेदैः प्रपूरितं ॥ ३ ॥ कामधेनुप्रदीपकौ
कल्पवृक्षालतादिषु ॥ शूंल्लुडु विडकेदारेलोल्लटोथ्वेश्वभाषित ॥ ४ ॥ म
न्वाद्येनेक स्मृतिषु व्याख्यातृप्रतिपादितं ॥ स्मृत्यर्थसारं वक्ष्यामि सु
खानुष्ठानसिद्धये ॥ ५ ॥ प्राचीदिशामनुक्तौ स्यादुदीचीशानदिक् तथा ॥
लिखत्वं प्रहृलोनुक्तौ वासीनत्वं च कर्मसु ॥ ६ ॥ कर्तृगानामनुक्तौ तु द
क्षिणांगं भवेत्तथा ॥ कुत्सितो वाम हस्तः स्याद्दक्षिणः स्याद्दिकु

॥१॥

त्विति ॥७॥ यज्ञोपवीतिना कार्यं सर्वं कर्म प्रदक्षिणं ॥ मनः प्रसादात्स्यो
त्तथा तपसा स्नानकर्मणा ॥८॥ आचान्त्या चात्मनः शुद्धिं कृत्वा कर्म समा
चरेत् ॥ कर्म यथा कृतं ज्ञात्वा तावदेव पुनश्चरेत् ॥९॥ प्रधानस्य क्रि
यायां तु सांगतं क्रियते पुनः ॥ तदंगाकरणे कुर्यात्प्रायश्चित्तं न कर्म तत् ॥
१०॥ प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्तते ॥ स नाप्नोति फलं तस्य
परत्रेति श्रुतिस्मृतिः ॥११॥ कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत् ॥
अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु ॥१२॥ बहुल्यं वा स्वगृह्योक्तं
यस्य कर्म प्रचोदितं ॥ तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् ॥
१३॥ श्रौतेषु सर्वशाखोक्तं सर्वस्यैव यथोचितं ॥ स्मार्तं साधारणं तेषु गृ
ह्यं श्रौतेषु कर्मसु ॥१४॥ समयाचारिका धर्मा जातिदेशकुलोद्भवाः ॥

॥२॥

ग्रामाचाराः परिग्राह्या ये च विध्यविरोधिनः ॥१५॥ युगधर्मपरिग्राह्याः स्वक्षेत्रे
व यथोचितं ॥ यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन तु ॥१६॥ द्वापारे तच्च मासेन
त्वहोरात्रेण तत्कलौ ॥ देवरेण सुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः ॥१७॥ दत्ताक्ष
तायाः कन्यायाः पुनर्दानं परस्य च ॥ समुद्रयातुः स्वीकारः कमण्डलुविधार
णं ॥१८॥ महाप्रस्थानगमनं गोपशुश्च सुराग्रहः ॥ अग्निहोत्रहवण्याश्च
लेहो लीढापरिग्रहः ॥१९॥ असवर्णासु कन्यासु विवाहश्च द्विजातिषु ॥
वृत्तः स्वाध्यायसापेक्षमघसंकोचनं तथा ॥२०॥ अस्थिसंचयनादूर्ध्वं मं
गस्पर्शनमेव च ॥ प्रायश्चित्तविधानं च विप्राणां मरणान्तिकं ॥२१॥ संसर्ग
दोषः पापेषु मधुपर्के पशोर्वधः ॥ दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ॥
२२॥ सत्रदीक्षा च स्तेयान्यमहापातकिनिष्कृतिः ॥ प्रतिमाभ्यर्चनार्था

॥२॥

यसंकुमत्स्यश्चसधर्मकः॥२३॥सवर्णान्यांगनादुष्टेः संसर्गःशोधितैरपि॥शा
भित्रैश्चैवविप्राणांसोमविक्रयणंतथा॥२४॥दीर्घकालंब्रह्मचर्यंनरमेधाश्व
मेधकौ॥कलौयुगेत्विमांधर्मान्वर्ज्यानाहुर्मनीषिणः॥२५॥विप्रक्षत्रियवि
ट्शूद्राश्चत्वारोवर्णाः॥तत्रविप्रक्षत्रियवैश्याद्विजास्त्रिजातयश्च॥तेषांमा
तुःप्रथमंजन्म॥उपनयनेनाद्वितीयंजन्म॥तृतीयंयज्ञदीक्षायामुक्तंजन्म॥
स्त्रीणांविवाहउपनयस्थानेद्विजानांगर्भाधानादिकाश्चांत्येष्ट्यन्ताःक्रिया
मंत्रतःकार्याः॥॥तत्संस्काराः॥गर्भाधानंपुंसवनानवलोभनसीमंतो
न्नयजातकर्मनामकरणनिष्क्रमणान्नप्राशनचौलोपनयनसावित्रीव्रत
२नि वेदव्रतारण्यकव्रतगोदानिकव्रतस्नानविवाहाश्चेतिआवश्यकाःषोडशास्त्रा
यासंस्काराः॥तत्रतौगर्भाधानंकार्यं॥रजःप्रभृतिषोडशरात्रौतत्र
वेदाब्दव्रतौ

मृताशौचान्तरमध्ये च कुर्यात्

॥२॥

तु कालः ॥ गर्भचलनात्पूर्वं तृतीये चतुर्थे वा मासे पुंसवनं कार्यं ॥ अनवलोभनं च चतु
र्थे षष्ठे ऽष्टमे मासे सीमंतोन्नयनं कार्यं ॥ जाते पुत्रे पिता स्नात्वा रात्रौ संध्यायां ग्रह
णे वा वृद्धिश्राद्धं हिरण्येन कृत्वा जातकर्म छिन्नाडीरक्षायाय प्रजापतिप्रीत्यै च
कुर्यात् ॥ जाताशौचान्तरे मध्ये च कुर्यात् ॥ मृताशौच मध्ये तु जाते तदा वा आ
शौचान्ते वा कुर्यात् ॥ नामकरणं जातकर्मानन्तरं वा द्वादशे ऽह्नि वान्यस्मिन्शु
भेऽह्नि वा कार्यं ॥ निःष्क्रमणं चन्द्रदर्शनं सूर्यदर्शनं देवतानमस्कारं वा द्वादशे
ऽह्नि तृतीये मासे चतुर्थे वा कुर्यात् ॥ अन्नप्राशनं षष्ठे मासे ऽष्टमे वा दन्तजाते वा
कार्यं ॥ चौलं प्रथमे वर्षे तृतीये वा कार्यं ॥ बहुमतत्वात् ॥ यथाकुलधर्मं वा ॥
एते संस्कारा बीजगर्भसमुद्भवदुरितक्षयाय यथाचारं कार्याः ॥ स्त्रीणाममंत्रम
केन स्युः ॥ विवाहस्तु समंत्रकः ॥ एते कालातिक्रमे व्याहृतिहोमं कृत्वा

॥२॥

कार्यः ॥ एतेषु चैकस्य लोपे पादकृच्छ्रः कार्यः ॥ चौले त्वर्धकृच्छ्रः कार्यः । सर्वलोपे
नाप्यदिवृद्धिर्गुणं ॥ उपनयनात्प्राग्बालो उच्छिष्टादौ न पतितास्युः ॥ कामचारे वा काम
द भक्षणास्युर्महापातकवर्ज्यं ॥ तेषां चाण्डालादिस्पर्शे सचैलस्नानं ॥ प्रागन्नप्रा
शनात् न स्युस्तेषां ॥ प्राक् चौलाद्वमनं ॥ पश्चात्स्नानमित्येके ॥ पित्रोः स्वधानय
नादृते मंत्रान्न ब्रूयुः ॥ उपनयनं जन्मप्रभृति चाष्टमेब्दे एकादशेब्दे द्वादशेब्दे वि
प्रादीनां क्रमात्कार्यं ॥ गुरुशुक्रास्तादिषु न गृहबलालाभे सति पंचमाब्दमारभ्या
षोडशाब्दात् द्वाविंशाद्वा चतुर्विंशाद्यन्ते विप्रादीनां क्रमात्कार्यं ॥ अतऊर्ध्वं सा
वित्रीपतिता व्रात्याः स्युः ॥ तेवामजीर्णप्रायश्चित्तानामुपनयनाध्यापनेयाजन
विवाहादिकं न कार्यं ॥ व्रात्यानां तु गुरु प्रायश्चित्तं वक्ष्यते ॥ षण्ढांध बधिर स्तब्ध
जड गद्गद पंगुषु ॥ कुब्ज वामन रोगार्त शुष्कांगि विकलांगिषु ॥ मत्तोन्मत्तेषु
मूकेषु शयनस्थे निरिन्द्रिये ॥ ध्वस्तपुंस्त्वेपि चैतेषु संस्कारास्युर्यथोचि

॥४॥

लं ॥ मूकोन्मत्तौ न संस्काराविस्त्येके ॥ कर्मस्वनधिकारात्स्वामित्वं नास्ति ॥ तदपत्यं
संस्कार्यं ॥ ब्राह्मण्यां ब्राह्मणेनोत्पन्नो ब्राह्मण एवेति स्मृतेः ॥ अन्ये न संस्कार्या इति (अति)
स्यात् ॥ होमेनाव दाचार्यः करोति ॥ उपनयनं च विधिना आचार्यसमीपनय
नं वाग्निसमीपनयनं वा सावित्रीवाचनं वा ॥ अन्यदंगं यथाशक्ति कार्यं ॥ विवा
ह स्त्र्या कन्यास्वीकारः ॥ अन्यदंगमिति ॥ औरसः क्षेत्रजश्चैषां संस्कार्या भा
गहारिणः ॥ औरसः पुत्रिकापुत्रः क्षेत्रजो गूढजस्तथा ॥ कानीनश्च पुनर्भूजो
दत्तः क्रीतश्च कृत्रिमः ॥ दत्तात्मा च सहोढजाश्चापविद्धसुतस्ततः ॥ पिंडदोंशहर
श्चैषां पूर्वभावे परः परः ॥ एते द्वादश पुत्राश्च संस्कारास्तु द्विजातयः ॥ केचिदा
हुः द्वौ औ तौ संस्कार्यौ कुंडगोळकौ ॥ अमृते च मृते पत्यौ जारजौ कुंडगोळ
कौ ॥ कार्पासिक्षौमगोवालशाणबल्वतृणादिकं ॥ यथासंभवतो धार्यमुपवी
तं द्विजातिभिः ॥ शुद्धौ देशोद्भुविः सूत्रं संहतांगुलिमूलके ॥ आवेष्ट्य षण्ण

॥४॥

वर्त्यात त्रिगुणीकृत्य यत्नतः ॥ अग्निलिंगे स्तु त्रिभिः संम्यक्‌ प्राल्योर्ध्वं वृतं तु
वत् ॥ अप्रदक्षिणमावर्त्य सावित्र्या त्रिगुणीकृतं ॥ अधः प्रदक्षिणावर्तं समं स्यान्न
वसूत्रकं ॥ त्रिरावेष्ट्य दृढं बध्वा हरिब्रह्मेश्वरान्नमेत् ॥ यज्ञोपवीतं परममिति मंत्रेण
धारयेत् ॥ सूत्रं सलोमकं चेत् स्यात्ततः कृत्वा विलोमकं ॥ सावित्र्या दशकृत्वाद्भिर्मं
त्रिताभिस्तदुक्षिपेत् ॥ विछिन्नं वाप्यधो यातं भुक्त्वा निर्मितमुत्सृजेत् ॥ यज्ञो ॥
पृष्ठवंशे च नाभ्यां च धृतं यद्विंदते कटिं ॥ तद्धार्यमुपवीतं स्यान्नातिलंबं न चोछ्रितं ॥
स्तनादूर्ध्वमधो नाभेर्न धार्यं तत्कथंचन ॥ ब्रह्मचारिण एकं स्यात् स्नातस्य द्वे बहूनि वा ॥
तृतीयमुत्तरीयं वा वस्त्राभावे तदिष्यते ॥ ब्रह्मसूत्रे पसव्ये शे स्थिते यज्ञोपवीतिता ॥
प्राचीनावीतिता सव्ये कंठस्थे तु निवीतिता ॥ वस्त्रं यज्ञोपवीतार्थे त्रिवृत्सूत्रं च कर्मसु ॥
कुशमुंजवालतंतुरज्जोर्वा सर्वजातिषु ॥ ॥ इति यज्ञोपवीतविधिः ॥ ॥ कार्ष्णरौ
रववास्तानि विप्रादेरजिनानि तु ॥ अहतं वस्त्रयुग्मं च श्वेतं रक्तमथापि वा ॥ मौ

॥५॥

ञ्जी त्रिवृत्समा श्लक्ष्णा दक्षिणावृत्तमेखला ॥ यथर्षिग्रंथिभिर्मौंजी त्रिवृत्स्याद्द
क्षिणावृता ॥ मुंजाभावे तु कर्तव्या कुशाश्मंतकबल्बजैः ॥ पालाशा घास्तकस वैषां
दंडा याज्ञिकवृक्षजाः ॥ पालाशबैल्वप्लक्षा च वटखैलसखादिराः ॥ वैणवौदु
बराश्वत्थाः क्रमाद्द्विजादिषु स्मृताः ॥ केशललाटनासाग्रप्रमाणाश्च क्रमाद्द्विजैः ॥
धार्याश्लक्ष्णाः सदा धार्यं कौपीनं कटिसूत्रकं ॥ कौपीनमहतं धार्यं दंडं वा
वस्त्रपार्श्वयुक् ॥ यज्ञोपवीतमजिनं मौंजीं दंडं च धारयेत् ॥ नष्टभ्रष्टेन वै मंत्रै
र्धृत्वा भ्रष्टं जले क्षिपेत् ॥ उपनयनानंतरं त्रिरात्रं द्वादशरात्रं वर्षं वाक्षारल
वणाशी अधःशायी ब्रह्मचारी उपनयनव्रतं चरेत् ॥ सर्वत्र व्रतांते नवानि
यज्ञोपवीतादीनि धृत्वा पूर्वाणि त्यजेत् ॥ वस्त्राणां योगानियमः ॥ नित्यं ॥ स्वाध्याया
ग्निकार्य ब्रह्मयज्ञतर्पणानि कुर्वीत ॥ अनिंद्येषु विप्रगृहेषु भिक्षां गुर्वाज्ञया याचि
त्वा भोजनविधिना भुंजानो द्वादशाब्दं पचाब्दं वेदग्रहणांतं वा ब्रह्मचर्यव्रतं चरेत् ॥ गु

॥५॥

रुशुश्रूषांछंदसांशाघनार्थंकुर्यात्॥उपाकर्मानिंतरंसर्वेषांवेदाद्यंतं॥तत्रस्त्रीमधुमां
सोच्छिष्टभुक्तपर्युषितताम्बूलदंतधावनावसक्थिकादिवास्वापछत्रपादुकागंध
माल्योद्वर्तनाभ्यंगानुलेपनानुलेपनाञ्जनजलक्रीडाद्यूतनृत्यवाद्यगानापस्त्री
लपरिवादादीनांसमावर्तनादूर्ध्वंत्यजेत्॥तदेकसाध्यमाषौमधुमांसंगुरूच्छिष्टंन
ष्टंश्राद्धेनुवर्जमेव॥उपनयनव्रतानंतरंसावित्रीव्रतमुपाकर्मांतं॥आरण्य
कव्रतानिचतथैव॥उपाकर्मकरणमोषधीजननेसतिश्रावण्यांपौर्णमास्यां
कार्यं॥श्रावणमासस्यश्रवणेवापंचम्यांहस्तेवापंचमीहस्तयोगेवाकार्यं॥
भाद्रपदस्यपौर्णमास्यांवाश्रवणेवाहस्तेवाआषाढ्यांपौर्णमास्यांवायथा
स्यावायत्कार्यं॥श्रवणेआद्योघटिकाचतुष्टयमभिजिन्नक्षत्रंवर्ज्यं॥तिथि
खंडेसतिउदयव्यापिनीत्रयोगपर्याप्तातिथिरुपाकरणेग्राह्या॥श्रवणेखं
डेसतिधनिष्ठासंयुतंप्रयोगपर्याप्तंनोत्तराषाढसंयुतं॥हस्तादिधिष्ण्य

॥ ६॥

त्रनक्षत्रेषु शुक्लपक्षे उदयव्यापिषु कृपक्षे अस्तमयव्यापित्र योगपर्यालिंग्या
हं॥ सूतकाविघ्नसंभवे ऊर्ध्वं पुनस्तस्याभावे च श्रावण्यां भाद्रपदे वा कस्मिंश्चि
द्दिवसे ग्रहणसंक्रांतिवर्जिते कार्यं॥ कर्मणो न लोपो नोत्कर्षः॥ मौंजीयज्ञोप
वीतादि नवं दद्याद्धारयेत्॥ कटिसूत्रं च नवं न वनं वस्त्रं न तथैव च॥ उपन
यनं उपाकर्माणि सावित्रीव्रतं॥ ततः संप्रत्यर्पं विप्रसंबंधिबांधवभोजनं शाक्या
कार्यं॥ संक्रांतिग्रहणं वापि यदि इन्द्रियलेन स्मात् सहस्तयुक्तायां पंचम्यां वा क
रिष्यति॥ ततो देवव्रतं॥ ततो आरण्यकव्रतानि॥ प्रतिव्रतं वपनं व्रतांते भोज
नं वैश्यमाहार्यं॥ एतेषु व्रतेषु लोपे तारतम्येन चिन्हषट् द्वादशकृच्छ्रान्कृ
त्वा पुनर्व्रतं आरभेत्॥ ततोनंतरं च उदगयने शुक्लपक्षे शुभेहनि स्वाध्या
यं आरभेत्॥ रवौ हेमगणेशौ सरस्वतीमिष्टदेवतां च गुरुं संतं च संपूज्य ब्र
ह्मचारी विप्रः सुकांतिनीरभ्यर्च्याशिषां गृहीत्वा ब्रह्मयज्ञं च दर्भांधार

॥ ६॥

यमाणः प्रणवव्याहृतिगायत्रीरुक्त्वा भूमिं स्पृष्ट्वा गुरुं वृद्धान्नमेत्य ततोप
रिष्ठः प्रभृतिगणेशादीन्नत्वा गुरुमभिवन्द्य प्रणवेन प्रारंभसमाप्तिं कुर्या
त्॥ जात्याचारसंप्रदायेनाध्यायः॥ अथ ब्रह्मचारी संध्यामुपास्याग्निका
र्यं कृत्वा गुरुरुपसंग्रहणं वृतरघ अभिवादनं वृद्धेषु न संस्कारं कुर्यात्॥
उपसंग्रहणं नाम अमुकगोत्रो देवदत्तशर्माहं भो अभिवादय इत्युक्त्वा
कर्णौ स्पृष्ट्वा दक्षिणोत्तरपाणिभ्यां गुरोर्दक्षिणपादं दक्षिणेन पाणिना सो
व्यं न सव्यं गृहीत्वा शिरोवनतिरभिवादने पादग्रहणं नास्ति॥ पादस्पर्शं
नं न वा॥ आयुष्मान्भव सौम्य देवदत्ता३ इति प्लुतान्तमुक्त्वा अमुकशर्मन्नयं
उतिग्रस्त्यभिवादः॥ आयुष्मान्भव सौम्येति वा अत्र गुरवो मातास्तन्यधा
त्रो वा पिता पितामहादयो मातामहश्चानप्तारो॥ अयत्रानावायो नोपने

॥८॥

ता मंत्रविद्योपदेष्टा च तेषां पत्न्यश्चोपसंग्राह्या॥ समावृत्तेन वा बाले समवय
स्केऽध्यापके गुरुवच्चरेते॥ मातुलांश्च पितृव्यांश्च श्वशुरांश्च यवीयां
सोपि प्रत्युत्थायाभिवाद्याः॥ उपाध्यायाऋत्विजोऽन्येषु भ्रातरश्च सर्वेषां
पत्न्यश्चैवं॥ मातृष्वसा पितृष्वसा च सवर्णा भ्रातृपत्नी च नित्यमभिवा
द्याः॥ विप्रोष्य तूपसंग्राह्या ज्ञातिसंबंधियोषितः॥ विप्रोष्य विप्रकुशा
ळं पृच्छेन्नृपमनामयं॥ वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च॥ न वाच्यो
दीक्षितो नाम्ना यवीयानपि सर्वथा॥ पूज्यैस्तु मतिमान् भाषेत भो भवत्कर्मना
भिः॥ परपत्नी मसंबंधा भगिनी चेति भाषयेत्॥ त्रिवर्षपूर्वः श्रोत्रियो
भिवाद्याः॥ श्रोत्रिवर्षाः संबंधिनश्च स्वल्पेनापि स्वयोनिजाः॥ अन्ये
च ज्ञानवृद्धाश्च सदाचाराश्चाभिवाद्याः॥ उदक्यां सूतिकां नारीं भर्तृघ्नीं

॥८॥

गर्भघातिनीं ॥ पाखंडं पतितं व्रात्यं महापातकिनं शठं ॥ नास्तिकं कितवं
स्तेनं कृतघ्नं नाभिवादयेत् ॥ मत्तं त्र मत्तमुन्मत्तं धावंतमशुचिं नरं ॥ वम
न्तं जृंभमाणं च कुर्वन्तं दंतधावनं ॥ अभ्यक्तशिरसं स्नानं कुर्वन्तं नाभि
वादयेत् ॥ जपयज्ञे गणस्थं च समित्पुष्पकुशानलान् ॥ उदपात्रार्घ्यभै
क्ष्यान्नं वहन्तं नाभिवादयेत् ॥ अभिवाद्य द्विजांश्चैलान होरात्रे पाशुध्य
ति ॥ क्षत्रिये वैश्यस्याभिवादे न विप्रस्यैवं शूद्रा द्येभिवादने त्रिरात्रं ॥ ना
यं तु रजकादिषु चांडालादिषु चाउंस्यादि संग्रहच्छलस्मृतिर्देवलो ब्रालिमांदक्षा
यतिं चैव त्रिदंडिनं नमस्कारं न कुर्वीत ॥ चेदुपवासेन शुध्यति ॥ सर्वे चापि न
मस्कार्याः सर्वावस्थासु सर्वदा ॥ अभिवादे नमस्कारः स्त्रीणां प्रत्यभिवाद
नं ॥ आशीर्वादाच्या नमस्कार्यैव यस्य स्तु पुनर्नमेत् ॥ स्त्रियो नमस्कार्या दोश्च

वयसापत्यपरेवता॥ ततोधीयीत वेदांश्च स्वाध्याये गुरुणिक्षतः॥ अनध्याया
वक्ष्यंते॥ अनध्याये त्वधीयाने प्रज्ञामायुः प्रजां स्त्रियं॥ ब्रह्मतेजो श्रियं तेजो नि
हंति तियमस्वयं॥ मित्रवीर्यक्षयं भया दिंद्रो वृत्रो णाहतिच॥ ब्रह्मराक्षसताचां
तेः नरकं च भवे ध्रुवं॥ अष्टमी च चतुर्दशी पर्व प्रतिपत्संक्रांति त्यमहोरात्रमनध्या
यः॥ अष्टकासु च ऐंद्र्यश्रवण द्वादशी मघा भरण्याश्च ज्येष्ठमुकु द्वितीयायां आ
श्विने दशमी स्मृता॥ चतुर्थ्य द्वादशी माघे हतः सोपपदाः स्मृताः॥ सोपप
दा तिथौ च॥ शयनोत्थाम द्वादश्योश्च॥ आषाढी कार्तिकी फाल्गुनी सुनी
पश्च द्वितीयासु च॥ अपरपक्षेपि प्रेतद्वितीयायां च॥ महानवम्यां च॥ र
थसप्तम्यां च युगादिषु च॥ शुक्ले तृतीया वैशाखे प्रेतपक्षे त्रयोदशी॥
कार्तिके नवमी शुक्ला माघे दर्शश्च हालिमा॥ एता युगादयः॥ श्रीको

॥८॥

दत्तस्याक्षयकारकाः ॥ मन्वंतरादयः सर्वे निध्याया इति केचन ॥ आश्वयुक् शुक्लन
वमी कार्त्तिके द्वादशी सिता ॥ तृतीया चैत्रमासस्य सिता भाद्रपदस्य च ॥ आषाढे
शुक्लदशमी माघस्य शुक्लसप्तमी ॥ श्रावणस्याष्टमी कृष्णा तथाषाढी च पौर्णि
मा ॥ फाल्गुनस्य त्वमावास्या पौषस्यैकादशी तथा ॥ कार्तिकी फाल्गुनी चैत्री
ज्येष्ठी पंचदशी सिता ॥ मन्वंतरादयश्चैता दत्तस्याक्षयकारकाः ॥ शवानुगम
न परिचरणे षु चाकाशवदर्शने चाहोरात्रं ॥ श्राद्धिके पतिगृहीत्ये चारण्यकमधी
त्ये च ॥ मनुष्ये प्रसूतीनां देवादीनां चेच्छानविमुक्तौ चाहोरात्रं ॥ स्वग्रामे तमित्ये
के ॥ नवश्राद्ध भुक्तौ त्वं न जरणात्तेन केन भोजने चैवं ॥ महैकोदिष्टे त्रिरात्रं गं
धलेपक्षयांतं वा ॥ महागुरौ मृते द्वादशरात्रं ॥ असपिंडे गुरौ त्रिरात्रं ॥ आचा
र्ये च उपाध्याये च पक्षिणी ॥ समानविद्ये सब्रह्मचारिणि च ॥ आचार्यभार्या
पुत्रशिष्येष्वहोरात्रं ॥ ऋत्विग्याज्ययोनिसंबंधेषु चैवं ॥ अग्न्युत्सादने

गोविप्रमृतौ त्रिरात्रं ॥ उपाकर्मण्युत्सर्गे च त्र्यहं ॥ वेदसमाप्ते प्रथमसंस्थासु तद्
होरात्रं ॥ परेषु क्षानध्यायः ॥ ग्रहणे तु रात्रौ मोक्षे त्रिरात्रं ॥ दिवा मोक्षे त्र्यहं ॥ अयने
विषुवे च पक्षिणी ॥ निर्घातभूकंपोल्कापातादिसर्वाद्भुतेषु आकालिकोनध्यायः ॥
अग्न्युत्पाते च अकालवृष्टौ च ॥ आर्द्रादि ज्येष्ठान्तकालादन्यत्राकालवृष्टिः ॥ सायं
संध्यागर्जिते उदयात् तोनध्यायः ॥ अर्धरात्रादूर्ध्वं गर्जने अर्धरात्रे वा कालिकोन
ध्यायः ॥ प्रातः संध्यागर्जिते त्वहोरात्रं ॥ काकोलूककुक्कुटमंडूकाद्यन्तरागमने सं
ति दिने च द्विनालं ॥ रात्रौ चेज्जान्तमनाध्यायः ॥ गवाश्वमहिषपशुस्त्रीशूद्रादाव
होरात्रं ॥ श्वमार्जारयोश्च ॥ आरण्यमार्जारसर्पनकुलेषु च मर्जारत्पादौ त्रिरात्रं ॥
आरण्यश्वसृगालादिवानरखरजकादौ द्वादशरात्रं ॥ खरोष्ट्रद्विचांडालादिस्पृ
तिकोदक्याशवादौ मासं ॥ गौरगवयाजादिभल्लूकनाकुलिकादौ त्रिमासं ॥
शशमेषश्वपाकादौ षण्मासं ॥ गजगंडकोरसासिंहव्याघ्रमहिपापिके

तच्छावच्छमनाध्यायः ॥ स्वाध्याये प्रवचने वर्त्तमाने अंतरागतौ ॥ आधिव्या
धिमत्स्कविघ्नपापानि गुरुशिष्ययोः ॥ ग्रामे नगरे ग्रामे न दिने वा नाध्या
यः ॥ विवाहे मौंजीबंधने प्रतिष्ठोद्यापनादिषु आमार्जे न समाप्ये ॥ सपिंड
सगोत्राणामेनध्यायः ॥ यज्ञे चानुबंध्यांतमृत्विजां भावाचार्याणां च ॥ श्वोनध्या
यसत्याधरावनाध्यायः ॥ एकदानध्याययुग्मरे लंघ्यापर रात्रे नानध्यायः ॥
अनध्याययुग्मदिनात्पूर्वे दिनात्परं रात्रौ त्वेकस्यैके ॥ श्वक्रोष्टृगर्दभोलूकसा
मबाणार्त्तनिस्वने ॥ अमेध्यशवशूद्रांत्यश्मशानपतितांतिके ॥ देशेषुवावा
त्मनिवृविघ्कस्तानि न संप्लवे ॥ भुक्त्वार्द्रपाणिरंभोंतरर्धरात्रेतिमारुते ॥ पां
सुवर्षे च दिग्दाहे संध्यानीहारभीतिषु ॥ धावतः पूतिगंधे च शिष्टे च गृहमा
गते ॥ खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे ॥ सप्तत्रिंशादनध्यायानेतांस्ता

स्मृ०

कालिकान्विदुः ॥ सर्वत्त्रोल्लिसितगंधेषु परिवेषसभासु च ॥ अभ्यंगस्नानकाले च महा
स्वेदे तिकंपने ॥ गोविप्ररोधने सर्वशाब्देषु आहुपंक्तिषु ॥ शाल्मस्य मधूकस्य कोविदा
रकपित्थयोः ॥ श्लेष्मातकस्य छायायां चेति तांत्कालिकान्विदुः ॥ चतुर्दश्यष्टमीप
र्वप्रतिपत्स्वेव सर्वदा ॥ दुर्मेधसामनध्यायस्त्वेतरागमनेषु च ॥ तथा विस्मृतिशी
लानां बहुवेदप्रपाठिनां ॥ चतुर्दश्यष्टमीपर्वप्रतिपद्वर्जितेषु च ॥ विद्यांगन्याय
मीमांसाधर्मशास्त्राणि वाभ्यसेत् ॥ उदयास्तमये वापि मुहूर्त्तत्रयगामिनि ॥
तद्दिनं तदहोरात्रिं चानाध्यायविदो विदुः ॥ केचिदाहुः केचिदूचुः यावत्तद्दिनन
डिकाः ॥ तावदेव त्वनध्यायस्त्रिभिश्च वदिनांतरे ॥ उपवासव्रतादीनां तिथि
माकुर्वस्तधेवते ॥ चतुर्थ्याः पूर्वरात्रे तु न च नाद्यां प्रदभूनि ॥ नाध्येयं पूर्वरात्रे
स्यात्सप्तमी च त्रयोदशी ॥ अर्द्धरात्रात्तु परस्तान्न नाध्येयं पूर्वरात्रके ॥ अएवं

॥१०॥

सा०

॥१०॥

ध्याहृतीनां च सावित्र्याश्चिरसस्तथा ॥ नित्ये नैमित्तिके कार्ये अतयज्ञे केतौ तथा ॥
ब्रह्मयज्ञे च कौम्य कार्ये च नानध्यायाः स्मृतास्तथा ॥ देवतावंदिमंत्राणां नानध्यायः स्मृ
तः सदा ॥ ८ ॥ ॥ अथोत्सर्जनं ॥ ततः सार्द्धचतुर्मासान् षण्मासान्वाधीत्य पौषमा
सि रोहिण्यां मृष्टकायां वा पौषे माघ फाल्गुने वा शुक्लपक्षे प्रतिपद्यन्यस्मिन्वान्हि
पौर्णिमास्यान्वा सह शिष्यैर्ग्रामाद्बहिर्जलान्ते उत्सर्जनं कार्यं ॥ तर्पणं च ॥ वर्षं वी
धीत्योपाकर्मदिने उत्सर्जनं कार्यं ॥ नवा तर्पणं तु कार्यमेव ॥ एवं वेदव्रतानि
श्चोभयं वा पारं नीत्वा अविलुप्तब्रह्मचर्यो विप्लवे कृतप्रायश्चित्तो गुरुं संपूज्य
तदनुज्ञया समावृत्तो विवाहेत् ॥ ॥ इति ब्रह्मचारिप्रकरणं ॥ ॥ अथ वि
वाहः ॥ मातृतः पितृतः शुद्धामभिरूपगुणान्वितां ॥ अदीर्घरोगां संवारिरो
गपोतिरूपवर्जितां ॥ असपिंडां च पितृतः ससमात्तु रूपात्परं ॥ मातृतः पंच
मातृद्ध्वं असमानार्षगोत्रजां ॥ अनन्योढां सातृमंतीस्त्रियं कन्यां यवीयसीं ॥

पुमान्धीमान्वरोधीरो द्विजो वर्णानुपूर्वतः ॥ विवाहे धर्ममार्गेण ब्राह्म्यादिषु यथावि
धि ॥ मातुळस्य सुतां केचित्स्वित्टघसुतादिकं ॥ विवहसिद्धेचिद्दृष्टोसंकोच्यापिस
पिंडतां ॥ दद्याच्चैव तिगृह्णीयात्तस्मात्वैव सुसमाहितः ॥ ब्राह्म्यो विवाह आहूय दीय
ते शक्त्यलंकृता ॥ दैवो विवाहः कन्याया ऋत्विजे दानमुच्यते ॥ आर्षो गोमिथुने
दत्ते कन्यादानं यदात्तदा ॥ प्राजापत्यः साहधर्मं चरतामिति दानतः ॥ आसुरा
द्रविणादानाद्गांधर्वः समयान्मिथः ॥ राक्षसो युद्धहरणात्पैशाचः कन्यकाछला
त् ॥ ब्राह्मदैवार्षप्राजापत्या धर्म्याः ॥ आसुरगांधर्वराक्षसपैशाचा अधर्म्याः ॥
तत्राद्याश्चत्वारो विप्रस्यैव ॥ राक्षसः क्षत्रियस्यैव ॥ इतरे त्रयः सर्वेषां ॥ ब्राह्म्या
दिषु पूर्वं होमः कर्तव्यः ॥ पश्चात्कन्यास्वीकारः ॥ आसुरादिषु पूर्वं स्वीकारः ॥
पश्चाद्धोमः कार्यः ॥ पितापितामहो भ्राता पितृव्यो गोत्रजो गुरुः ॥ मातामहो मातुलो
वा कन्यादा बांधवी क्रमात् ॥ पित्रादिदात्रभावे तु कन्या कुर्यात्स्वयंवरं ॥ शुल्कं

दत्वा वरे याते पुंस्त्व तन्संपरीक्ष्यतु॥ कन्यान्यस्मै प्रदातव्या वाग्दानेऽकृते सति॥ नु
वरे देशांतरे याते त्रीनृतून्संप्रतीक्ष्य तु॥ कन्यान्यस्मै प्रदातव्या वाग्दाने तु कृते
सति॥ मृते न्यस्मै प्रदातव्या वरे सप्तपदात्पुरा॥ पुरा पुरुषसंभोगान्मनेदेयेति के
चनु॥ ऋतावदृष्टे कन्येव पुनर्देयेति केचन॥ आगर्भधारणात्कन्या पुनर्देये
ति केपरे॥ देशकालादिभेदेन धर्मा अनुष्ठेया विजानता॥ कुलभूविहीनस्य षंढादेः
पतितस्य वा॥ अपस्मारिकेकर्मस्थस्य भिन्नवेषधारिणः॥ दत्तामपि हरेत्कन्यां स
गोत्रोढोढां तथैव वा॥ मंत्रसंस्काररहितां यां देन्यस्मै वरायतु॥ कन्या त्वदूषिताव
र्या देयान्यस्मै वराय सा॥ अन्यथा तु हरन्दंड्यो व्ययं दद्याच्च सोदयं॥ षंढांध
बधिरादीनां विवाहो हि यथोचितं॥ विवाहासंभवे तेषां कनिष्ठो विहवेत्तदा॥
षंढांधबधिरस्तब्धजडगद्गदपंगुषु॥ कुब्जवामनरोगार्तशुष्कांगीविकलां
गिषु॥ शुद्धपुंस्त्वे च मत्तोन्मत्तेर्वरीये न स्त्यौनि राक्रिये॥ मूकोन्मत्तेषु समेषु न

स्मृ०

दोषमपवेदने॥ पितृव्यपुत्रे सापत्ने परदारसुतादिषु॥ विवाहाधानयज्ञा
नां परवेदाद्यदूषणं॥ ~~[illegible]~~णं॥ पितुः स
त्यप्यनुज्ञाते माधेयीत कथं चेन॥ पाणिग्राह्यः सवर्णानां गृह्णीयात्क्षत्रिया
शरं॥ वैश्या प्रतोदमादद्याद्विवाहे ब्राह्मणस्य तु॥ सवर्णेभ्यो सवर्णासु जायंते
हि सजातयः॥ अनिंद्येषु विवाहेषु पुत्राः सन्तानवर्द्धनाः॥ विप्रान्मूर्धावसिक्तो
हि क्षत्रियायां विशः स्त्रियां॥ अंबष्ठः शूद्र्यां निषादो जातः पारसवोपि वा॥
वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ॥ वैश्यात्तु करणः शू
द्र्यां विन्नास्वेष विधिः स्मृतः॥ एते नु लोमजाः पुत्राः संस्कार्याः स्युर्द्विजातयः॥
तथा मूर्द्धावसिक्तादिर्जातिजास्ते द्विजातयः॥ ब्राह्मण्यां क्षत्रियात्सूतो वैश्या
द्वैदेहकस्तथा॥ शूद्राज्जातस्तु चांडालः सर्वधर्मबहिष्कृतः॥ क्षत्रिया मा

॥१२॥

सा०

॥१२॥

गधं वैश्याः शूद्राश्चैतान्मेव च ॥ शूद्रादायोगवं वैश्याजनयामास वैसुतं ॥
महिष्येण करण्यां तु रथकारः प्रजायते ॥ दे[illegible]त्याघाः प्रतिलोमास्तु द्विजधर्म
बहिष्कृताः ॥ विवाहास्तु र मा[illegible]धा यजुः कृते चाग्निहोत्रकं ॥ दर्शपूर्णमासाग्र
यणसोमयागात्क्रपामाश्चरेत् ॥ सर्वथा प्रथमः सोमयागः कार्यो द्विजाति
भिः ॥ यथासंभविकागेन फलं दद्याचोपि दक्षिणां ॥ श्रोत्स्य ड ब्राह्मणत्वादिम
हादोषोपशांतये ॥ सूर्यग्रहे कुरुक्षेत्रे मेषीकृष्णाजिनादिकं ॥ चांडाल
न्त्रीतिगर्त्तस्यापि यजेतावब्रूयकैर्मुखैः ॥ अथवापासनं कृत्वाजुकृत गा
त्वालिवा वरेत् ॥ श्रद्धाधाने महानश्रे योगाहयश्चौतोप्तयादिकं ॥ एत म
कत्वव्हीगतानेमेतुः पिंडे गोत्रेत्वस्तनके ॥ सत्यामन्यासवर्णायां धर्म
कार्यं न कारयेत् ॥ सवर्णास्त्रविधौ धर्म्ये ज्येष्ठयानविनानविते

स्मृ० तराः ॥ आज्ञासंपादिनी दक्षा पुत्रसूश्च प्रियाशुचिः ॥ नियोज्याधर्मकार्ये सा०
षु नाधिवेज्या कथं चन ॥ भूकन्यात्कन्याशुविद्दानियोज्याधर्मकर्मस्तु
जपहाजारि णीभ्र डां दूषितानुविवर्जयेत ॥ सुरापी व्याधिना धूर्त्ता वं
ध्यार्थघ्न्यप्रियवंदा ॥ स्त्रीप्र सूश्चाधिवेत्तव्या पतिद्विद्मतस्तजा ॥ ग्र
हस्थस्यैकषडग्निः स्यात्संवाग्निश्चतुरग्निकः ॥ स्यो द्वाग्न्यग्निर
पे का ग्निः नाग्निहीनः कथं चन ॥ गार्हपत्यो पासनं कुर्यात्सर्वाधानी ॥१२॥
नु लौकिके ॥ स्मार्तं चलौकिककार्यं श्रौतं वैतानिकाग्निषु ॥ ॥ अ
थात्र गोत्र प्रवरो निर्णय यत्पावते जनता ॥ जमदग्निर्भरद्वाज विश्वा
मित्रात्रि गौतमाः ॥ वसिष्ठ कश्यपागस्त्या मुनयो गोत्रकारि

॥१३॥

णः॥ एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते॥ त्रियमाणलया वापि सन्तं यां वानुवर्त्तनं॥
एकस्ये द्व्यन्यते यत्र ते द्वेत्रेतस्य कथ्यते॥ समानमुनिमत्रयस्त्व भेकप्रवरतामपि॥ समा
नप्रवरत्वं च द्वेधा बौधायनो ब्रवीत्॥ मुनिप्रणीत प्रवरैस्त्रैन पंचार्षेतानाधेयं॥ अनंता
न्यपि गोत्राणि वेगरेकत्वाभिदष्यतो॥ जौमदग्न्या वत्सविदा वार्ष्टिषेणाः परस्परं॥
नान्विपुः प्रवरैक्येन गोत्रसत्वेन वादिसौ॥ यस्काभित्रेयुवा वैन्याः शुनकाः प्रवरै
क्यतः॥ स्वस्वं हित्वा गणं सर्वे विवहेयुः परावरैः॥ उन्नोः समग्नेगोर्वं त्रावेक्ष्यं तेभि
रिसागणाः॥ गौतमाः सन्न्या यास्या भारद्वाजास्तथापरे॥ कौमंडदीर्घतमसास्ततः कौ
रेणुपालयः॥ वामदेवाऔशनसा गोत्रा षैकृपात्रवं नान्विपुः॥ भरद्वाजाः सकपयोग
र्गरौक्षायणादिति॥ वेहारो पिभरद्वाजा गोत्रैक्यान्नान्विवुर्मिथः॥ केवलांगिरस
श्च तेविष्णुवृद्धोः सकाण्वजाः॥ हरितारथीतराश्चमुद्गलाः प्रवरैक्यतः॥ स्वं

स्वंहि त्वा गणं सर्वे विवहेयुः परस्परैः ॥ षोडशांगिरसस्त्रेधा प्रोक्ताः संकृतयस्तथा ॥ संकृ-
तीनां द्विवेद्यत्वोपसिष्ठैश्चैव तु विधैः ॥ स्ववर्गिये स्वगोत्रत्वात्स्रवरैक्याद्वेनान्वियुः ॥
वत्वारोत्रयश्चोद्यापि वाडूतकगविष्ठिरा ॥ मुद्गलाश्चेति गोत्रैक्यात्स्रवरैक्याद्वेनान्वि-
युः ॥ त्र्यश्वकन्यपाझेया निध्रुवा रभरद्वांडिलाः ॥ गोत्रैक्यात्स्रवरैक्यांवेनोद्वहेयुः प-
रस्परं ॥ वसिष्ठैकन्यपेर्निस्यं लौगाक्षीणां स निन्वयुः ॥ अहर्वसिष्ठनोन्लिकस्कन्धपाजा-
प्रादिगोचराः ॥ वसिष्ठकुंडिनाश्चैवुउपमन्युपराशराः ॥ वसिष्ठोद्भुतिचत्वारो गोत्रैक्यान्न-
न्वियुर्मिथः ॥ कुशिकारोहितगणा रौष्टकाः कामकायनाः ॥ कताधनंजयाश्चाजाश्चप्यमर्ष-
णपौरणाः ॥ द्वद्वकौशिकयोश्चैति विश्वामित्रगणादश ॥ नोद्वहेयुः स गोत्रत्वात्कौचित्त्र-
प्रवरैक्यतः ॥ अगस्त्यः सांभवाहाः सोमपाहाद्भुतित्रयः ॥ गोत्रैक्यात्स्रवरैक्यांचेनो-
द्वहेयुः परस्परं ॥ वगाएकोनपंचाशत्स्वसिद्धा मुनिभिस्मृताः ॥ अप्रसिद्धापरेवं-
शेयाश्चंतप्रहता द्वहेतवे ॥ विश्वामित्रोत्रिगोत्रेण नोद्वहेयुर्धनंजयाः ॥ अत्रेस्कपुत्रि

॥१४॥

कापुत्रावामरथ्याद पस्तथा॥ नथैव जातुकर्ण्यश्च वसिष्ठैरत्रिभिः सह॥ भरद्वाजेन
शुंगेन विश्वामित्रस्य शैशिरः॥ क्षेत्रे जातो द्विगोत्रर्षि प्रोच्यते शैगशैशिरः॥ विश्वामि
त्र भरद्वाजैः विश्वामित्रश्च नान्वियुः॥ कपिलो नाम भरद्वाजो विश्वामित्रश्च नान्वियुः॥ गु
रोः सगोत्रे प्रवराणां द्वाधो तत्र विज्ञेनैः॥ सगोत्राघनमिश्रैश्च विप्रराचार्यगोत्रजा
दानादिनान्यगोत्रास्य रेखा लगुरुगोत्रिणः॥ समानप्रवरोद्वाहे निषेधः तत्र वैश्यं
यो॥ प्रवरान्मानवेत्स्य स्मात्प्रवरास्तान्यगोचराः॥ ३॥ सगोत्र संबंधा विविषये
स्थिते॥ यदि कश्चित् ज्ञानतस्ता कन्यामूढोपगच्छति॥ गुरुतल्पव्रताच्छुध्येद् भस्त
जो यतां व्रजेत्॥ जोगतस्ता परित्यज्य पालयेज्जननीमिव॥ अज्ञानात्त्रे दैं दवैस्क
भृग्वंगिरस्तु कश्यपः॥ महद्रिमद्ब्रितो यत्नोत्कुलः प्रवर निर्णयः॥ जामदग्न्याव
त्स विहदार्ष्टिषेणाश्च मुद्गलो॥ पंचावत्तिन एवात्त्ये सर्वेच तुरवत्तिनाः॥ वि
वाह पितले तं त्रे होमन्ते स्थिते॥ कन्यामतुलमीद्द्रा कथवलियाज्ञिकाः॥ स्त्री
पद्मलात्तु ताकन्या प्रवद्दत्ता यथा घिः॥ गुंजानामीकुलीकुत्वोत्ते ताकम प्रवर्त्ते

ते ॥ यद्वा ॥ विवाहहोमप्रक्रांते यदि कन्यारजस्वला ॥ त्रिरात्रं दंपती स्यातां तद्दापकु
शय्याशनाशने ॥ चतुर्थेहनि संस्नातौ तस्मिन्नन्यथाविधि ॥ विवाहहोमं कुर्या
तादित्यादिस्मृतिसंग्रहः ॥ विवाहे दंपती स्यातां त्रिरात्रं ब्रह्मचारिणौ ॥ अ
लंकृतौ वधूश्चैव सहशय्यासनाशनौ ॥ अधमेषु विवाहेषु तौ ब्रलमनुमोद
नं ॥ वाहनं भोजनं चैव वधूर्युपि स्ववर्णपाद्विजः ॥ अपरेण पैवासः स्याज्ज्ञाधवेषु
त्रिरात्रकं ॥ राक्षसे चैव पैशाचे कुर्याचाज्ञायणं नथा ॥ गर्भाधानादिसंस्कारे
स्विष्टाद्दत्तं द्धेऽपि वापि ॥ वृद्धिश्राद्धं पुराकार्यं कर्मादौ स्वस्तिवाचनं ॥ वृद्धि

१५

मरव्यास्तु पितरो वृद्धिश्राद्धेषु भुंजते ॥ चूडाहोमावसानेषु बालमुख्याः प्रभुंजे
ते ॥ वसवो रुद्रआदित्यास्त्र्यावस्थाः कामरूपिणः ॥ बाला युवानो वृद्धाश्च पितृच
णां श्रोत्रियास्मृताः ॥ त्रेतायामाश्रयारुद्रायमच्यैवाच्च कस्मृताः ॥ अस सस्व
तप्रमीतानां ब्रह्मलोकविच्छुसमाश्रयाः ॥ अनाश्रितानां जीवाची दत्तेनैवापति

क्लृप्तिः॥ आरंभदूर्ध्वं मासौ च विवाहः कार्य एव तु॥ आरंभो वरणं यज्ञे संकल्प

व्रतसत्रयोः॥ नांदीश्राद्धं विवाहादौ श्राद्धं पाकपरिक्रिया॥ निमंत्रणं आहुतु

आरंभः आरंभस्यादितिस्मृतिः स्मृतिः॥ गणेशपूजा क्रियमाणा नोमिकं स्यात्

न्मातृपूजनं॥ वृद्धिश्राद्धं च तत्र स्यात् होममंत्राः पृथक् पृथक्॥ अथाह्निकं

कमुच्यते॥ तत्र प्रभाते उत्थाय पृथक् देवं नमन स्नानं तात दहह कृत्य स्मृत्वा

संध्योपासनं कुर्यात्॥ तत्र मूत्रपुरीषोत्सर्गमेव कुर्यात्॥ अवनस्पत्य

पालिकं भुक्त्वा काष्ठोष्ठच्छपापर्णादिकं गृहीत्वा शिरः प्रावृत्य यज्ञोपवीतं दृ

ष्टतः कंठे विलंबितं कृत्वा एकवस्त्रं ... दक्षिणे कर्णे निधाय दिग्वलोकनं

कृत्वा काष्ठादिना धानं कुर्यात्॥ न वा मौनं वा ग्यम वा घ्राणास्यपिधानं

वक्रमालोक्य तदा दिवा संध्ययोः उदङ्मुखो रात्रौ दक्षिणामुखो मूत्रपुरीषो

त्सर्गं न कुर्यात् ॥ फालकृष्टे जले चित्यां वाल्मीके गिरिमस्तके ॥ देवालये नदीतीरे द
र्भे पुष्पेषु शाद्वले ॥ सच्छायेषु वृक्षेषु मार्गे गोष्ठाम्बुभस्मसु ॥ अग्नौ च ग
च्छति षंक्षविष्ठां मूत्रं च नोत्सृजेत् ॥ वाय्वग्न्यर्कद्विजगोसासंसांध्यां बुस्त्रीगुरुज
नः ॥ पश्यन्न मुखे विष्ठां मूत्रं च नोत्सृजेत् ॥ सर्वे निषेधा नैवास्युः प्राण

२६

बाधाभयेषु च ॥ काष्ठादिनान्तर्याय स्यात् मे मेध्यं निमज्जीत च ॥ रथ्यावल्वरतीर्थभु
स्मशाने गोमये जले ॥ अंगारोद्यानसत्त्राणि यज्ञभूमिषु नोत्सृजेत् ॥ कंदमूलफ
लांगारे नामेध्यं निमज्जीत च ॥ ॥ इति मूत्रपुरीषोत्सर्गविधिः ॥ अथ शौचविधिः ॥
शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः ॥ शौचाचारविहीनस्य समस्तं क
र्मनिःफलं ॥ शौचं च द्विविधं प्रोक्तं बाह्यमभ्यंतरं तथा ॥ मृज्जलाभ्यां स्मृतं बाह्यं
भावशुद्धिस्तथान्तरं ॥ गृहीतशिश्नश्चोत्थाय गृहीतशुचिमृत्तिका ॥ गंधलेप
क्षयकरं शौचं कुर्याद्विजनंद्रियः ॥ अंतर्जले देवगृहे वल्मीके मूषिकास्थले ॥

दंतशौचे वा पवित्राच्छेन ग्राह्याः पंचमृत्तिकाः ॥ मार्गरथ्याभूमश्मशानस्थाः पांसुला मृत्ति
नास्य जंतु ॥ कीटांगारास्थिरहिता माहरेच्छर्करान्विता ॥ वापीकूपतडागेषु नाहरेद्बा
ह्यमृत्तिकां ॥ अंतर्जलगता ग्राह्यास्तरुतो मणिबंधनात् ॥ आरण्यकेषु चैवं स्याद्ग्रा
ह्यांश्चाहरपं विदुः ॥ ॥ मूत्रे ॥ ॥ एको लिंगे तु मृत्तिका लिंगे तिस्रः सव्ये करे मृदः ॥ करद्व
ये मृद्द्वयं स्यात् मृत्प्रमाणमनेकधा ॥ त्रिपर्वपूर्णमात्रा वा मृत्तिका प्रथमालिका ॥ श्री
द्रीमृत्तैकमात्रा वा मूत्रशौचे तु मृत्तिका ॥ मूत्रात्तु द्विगुणं शुक्ले मैथुने त्रिगुणं स्मृतं ॥
पुरीषे तु ॥ पंचापाने मृदः क्षेप्याः करे वामे दश स्मृताः ॥ करयोः सप्त दातव्याः पुरीषे
मृत्प्रमाणकं ॥ अर्धप्रसृतिमात्रा वा सदर्धार्धप्रसृतः परा ॥ यद्वापाने मृदस्तिस्रः प्र
सृत्यर्धप्रमाणिकाः ॥ यद्वा प्रसृतिमात्रा स्त्रिः पादपाण्योः पृथक् पृथक् ॥ एतच्छौचं गृ

हस्तानां द्विगुणां ब्रह्मचारिणां ॥ त्रिगुणं वानप्रस्थानां यतीनां च चतुर्गुणं ॥ दिवा यो द्वि
हितं शौचं तदर्धं निशि कीर्तितं ॥ तदर्धमातुरे प्रोक्तमातुरस्यार्द्धमध्वनि ॥ स्त्रीशूद्रै
टेरशक्तानां बालानां चोपवीतिनां ॥ गंधलेपक्षयकरं शौचं कुर्यान्न संख्यया ॥ ए
कैकया मृदा पादौ हस्तौ प्रक्षालयेत्ततः ॥ ॥ इति शौचविधिः ॥ ॥ अथाचमनवि
धिः ॥ ॥ तत्र हस्तौ पादौ प्रक्षाल्य यज्ञोपवीती भूमौ पादौ प्रतिष्ठाप्य निबद्धकच्छपरि
खः पुंडरीकाक्षमिष्टदेवं स्मृत्वा प्रक्षालितस्वच्छफेनबुद्बुदरहितं संहतांगुलिपाणिनांबु
गृहीत्वांगुष्ठकनिष्ठिकाभ्यां मुक्त्वा शेषवीक्षितं ब्रह्मतीर्थेन त्रिश्चतुर्वा समाहितः पि
बेत् ॥ कायेन तीर्थेन वा दैवेन वा पिबेत् ॥ न पित्र्येण कदाचन ॥ पीत्वा हस्तौ प्रक्षाल्य
ओष्ठावं तः संकोच्य संहतांगुष्ठमूलेनाखोमकेन मुखं द्विः प्रमृज्य ॥ हस्तौ प्रक्षाल्य

संहतांगुलिभिर्मुखं सकृदेव मृज्य हस्तौ प्रक्षाल्य पादौ शिरश्चाभ्युक्षेन्नवा॥ संहतांगु
लिभिस्तिसृभिरास्यं सभलोमप्रदेशे स्पृष्ट्वा हस्तौ प्रक्षाल्यांगुष्ठप्रदेशिनीभ्यां घ्राणं स्पृ
शेत्॥ अंगुष्ठानामिकाभ्यां चक्षुषी॥ श्रोत्रे च स्पृशेत्॥ अंगुष्ठकनिष्ठिकाभ्यां नाभिं॥
सर्वांगुलिभिः शिरः॥ बाहू मूले सर्वांगुल्यग्रैः स्पृशेत्॥ सर्वत्र मध्ये ऽपः स्पृशे
त्॥ हस्ताभ्यां अशक्तौ क्षिपीत्वा हस्तं प्रक्षाल्य मुखं प्रमृज्य नाभिं स्पृशेत्॥ अत्यंतासा
चिक्तौ पीत्वा हस्तं प्रक्षाल्य श्रोत्रं स्पृशेत्॥ हृत्कंठतालुगाभिः स्युरद्भिः शुद्धाः क्रमाद्द्विजाः॥
स्त्रीशूद्र उदयोस्ततः सकृत्स्पृष्टाभिः शुद्धाः॥ न वर्षधारास्वाचामेन्नाभिश्चापका
रणात्॥ कनिष्ठादेशिन्यंगुष्ठमूलेषु कायपित्र्यब्रह्मतीर्थानि॥ कराग्रे दैवं तीर्थं॥ कर
मध्ये सौम्यं तीर्थं॥ अग्नितीर्थं च मिर्वपणसंस्रवणलाजहोमादि नित्यहोमान्कायेन

स्मृ०

तीर्थेन कुर्यात्॥ अर्चनबलिप्रक्षेपपर्युक्षणमार्जनभोजननित्यहोमान् देवेन दैविकं च
पैतृकं पित्र्येण कमंडलुस्पर्शनं दधिप्राशनं नवान्नप्राशनं स्कंधे स्कंधग्रहणं दैविकं च॥
सौम्यतीर्थेन न कुर्यात्॥ आग्नेयेन प्रतिग्रहं कुर्यात्॥ ॥ इत्याचमनविधिः॥ ॥ अथा
चमननिमित्तानि॥ ॥ उच्छिष्टस्पर्शने पादावसेचने शिखामोक्षे यज्ञोपवीतापगमे
च॥ उदकमुत्तीर्यावतीर्य च॥ संदेहेषु च सर्वेष्वाचामेत्॥ आस्यगतश्मश्रुस्पर्शने
च॥ लोमकेशस्पर्शने च॥ दंतसक्तस्य जिह्वया स्पर्शने च॥ रथ्याप्रसर्पणेऽस्नेहपं
कनखाक्षिस्पर्शने वरोदने च॥ विण्मूत्ररेतःशौचांते पीतावलीढे च दंतसक्तं नि
ष्ठीव्य च॥ देवताभिगमने च द्विराचामेत्॥ स्नात्वा पीत्वा च लीढे च निष्ठीव्य सुप्त्वाऽधो
वासो विपरिधाय च तथोत्तरीयं परिधाय च॥ अभ्यंगे कृते च हविर्भक्षणे च होते द्विरा
चामेत्॥ भोजने हवने दाने उपहारे प्रतिग्रहे॥ संध्यात्रयांबुपानेषु पूर्वं पश्चाद्द्विरा

॥१८॥

सार०

॥१८॥

वमेत्॥ स्वाध्याये चवस्त्रादिसहित उच्छिष्टस्पृष्टश्चेत्॥ तदालभ्यांके निधाय वा तत्सहितं
आचांतः शुध्येत्॥ निधाय चाचम्य वस्त्रादिकं प्रोक्षयेत्॥ अन्नपानादिसहित उच्छिष्टास्पृ
ष्टश्चेत्तं निधायाचम्य प्रोक्षेत्॥ अन्नादिरक्षार्थं तु तदालभ्यांके निधाय वाचो वाचमनं
कुर्यात्॥ परिवेषणं कुर्वन्नुच्छिष्टस्पृष्टश्चेदन्नपात्रं भूमौ निधायाचम्यान्नमभ्युक्ष्य परिवि
ष्यात्॥ परिवेषणं कुर्वन्मूत्राद्युच्छिष्टः चेदन्नादिकं निधाय स्नो वाचमनं कृत्वान्नादिकं प्रो
क्ष्याग्निमर्कं वा संस्पृश्य परिविष्यात्॥ परिवेषणे रजोदृष्टौ तत्स्पृष्टान्नस्य त्यागः॥ अन्ना
धारवंशलसूतिकोदक्यापतितादिस्पृष्टस्य त्यागः एवा रजकादिस्पृष्टं तु जलेनाभ्यु
क्ष्याग्निमर्कं वा स्पर्शयेत्॥ उच्छिष्टोपहतस्त्रीशूद्रसंभाषणे वा स्पृश्यदर्शने वा पिध्यमं
त्रानुद्धरणे आत्मालंभवमेव स्नात्॥ अधोवायुसमुत्सर्गे आक्रंदे क्रोधने क्षुधे॥ मार्जा

मूषिकास्पर्शे त्रिहासे ष्ठीवने मृते॥ अन्त्यसंभाषणे दर्शने च कर्म कुर्वन्नाप्नुमेतु॥ श्वकाका
दिस्पर्शने चैवं॥ अकर्म कुर्वन्पूर्वोक्तेषु दक्षिणं श्रवणं स्पृशेत्॥ अनुष्ठाने भिन्ने गोविप्र
स्त्रीप्रष्ठ तस्तुतके शनखस्पर्शने निष्ठीवने वा पः स्पृशेत्॥ आर्द्र तृणं गोमयं वा भू
मिमोषधीर्वा स्पृशेत्॥ कर्णं वा संस्पृशेत्॥ अघ्राणिकाश्करत्वं प्रस्वेदस्पर्शने तु प्रक्षा
ल्यौ वादि स्पृशेत्॥ अपत्स्के नैमित्तिक कर्मो गाव मनस्नाने श्रवणादि स्पर्शनं स्यात्त
मनः शुध्यर्थं॥ अग्नि सौ पानि वेदाश्व वरुणार्कैंदुवायवः॥ विप्रस्य दक्षिणे कर्णे
नित्यं तिष्ठंति पूजिताः॥ जपहोम प्रदानेषु पितृपिंडोदकादिषु॥ कृते चाचमनं कार्यं
पितृकार्येषु सर्वथा॥ नास्पृश्यं परूपं नाचामेन्नफल काद्यासनासीनो न त्रिपाद्याना
न्यार्थ आसने भोजनार्थासिने भुक्त्वा चामेद्बु॥ नान्यासने न शयन यान न पादुको पान

स्थितेन तु दृष्टेन पादाग्रस्थितेन प्रह्वेण तिष्ठन्न व्रजन्नाप्राणतो नान्यमना न विलोकयन्न ह
सन्न रुदन्न जल्पन्न नाग्नौ नैकवस्त्रो नांजलिना न परं स्पृशन्न वामहस्तेन न बहिर्जानु
करो न रूढपादो न प्रसारितपादो न बद्धासनो न गलबद्धेन वेष्टितशिरा न यज्ञोपवीत
मुत्तरीयं वान्यथा धृत्वा वामतः॥ वामहस्ते कृत्वान्यदर्पणे वा स्थितं दक्षिणेन न पिबेत्॥
अपः करनखस्पृष्टा न पिबेत्॥ तत्सुरा वेद दृष्टं॥ आचमनाद्युच्छिष्टे बुद्बुदां दूरतो वर्जये
त्॥ नवांगुलिशिरा वामेन्नातीर्प्तेन न शब्दं वदे॥ नावीक्षितं नास्वाभावे नो ष्ठुजलमका
रणात्॥ वामेन पात्रमुद्धृत्य नापिबेद्दक्षिणेन तु॥ सौवर्णरौप्यताम्रकांस्यवेणुबिल्वाश्मन
र्मभिः॥ अलांबुदारुपात्रे श्रीनालिकेलैः कपित्थकैः॥ तृणकाष्ठैर्जलाधारैर्नभ्यालरित
न्नमयैः॥ वामेनोद्धृत्य वा वामदन्यदातुरसंभवे॥ तत्र मृन्मयपात्रस्थं जलां नैवापहन्य

म०स्य०

ते॥ती र्थं तो यं व शु ध्येत्व कार का दि स्थि तिं सदा॥ पादा शौ चं शि र वा क छ व द्ध धौ तो प वी त
कं॥ वि ना चां तो शु चि र्नि त्यं ब द्ध कं ठे शि र स्य पि॥ प वि त्र क र आ चा म छ वि: कर्मा र्घ मा द
रा न्॥ कु श मा त्र क रो वा पि द र्भ मा त्र क रा थ वा॥ त दों का रे ण च म नं य द्वा व्या ह ति भि र्प वे त्
सा वि त्र्या वा पि क र्त्त व्यं य द्वा का र्य म मं त्र कं॥ त त्कु शं वि धि व त्पू र्णं न त्य जे द न्य था त्य जे त्॥
अ न्ये द र्भा स्त्र सं त्या ज्या स्त्य जे त्त द्दे वं पु रे व त्॥ न पा द प्र क्षा ल नं शे ष मा चा मे त्॥ ना न्यो
च म न शे षे ण च य द्या चा मे त् भू मौ ज लं श्रा वि पि त्वा चा मे त्॥ न पा द प्र क्षा ल न शे षे ण

॥२०॥

ना च म न शे षे ण ना न्यु द के शे षे ण क र्मा णि कु र्या त्॥ य दि कु र्या त् भू मौ ज लं स्रा व यि
त्वा ल त्वा न्यं बु पा त्रे स्था प यि त्वा द्ध त्य क र्मा णि कु र्या त्॥ ॥ अ था च म ना प वा द:॥ ॥
अ स्नि ग्ध ओ ष धे ज न्धे स्ति ा धे ब द्ध स ले प ने॥ ना चा मे द्भो ज न च्छे त्तं शु ध्य र्थं क्रमु का

सा र०

॥१०॥

दिषु ॥ अन्येषु वामसंस्पर्शेषु संभारेषु सुगंधिषु ॥ तांबूलेक्षु मुक्तो होमे भुक्ते स्नेहानुलेपने ॥
दृक्षे दंडे तिलेमूले पत्रपुष्पफलेषु च ॥ आस्य होमेषु सर्वेषु नोच्छिष्टो भवति द्विजः ॥ दं
तवद्दंतलग्नं रसाद्येष्वशुद्धं ॥ जिह्वयास्पर्शने अशुद्धं ॥ तत्रैकर्णस्पर्शनं ॥ अन्यत्वास्यग
लं स्पृष्ट्वा ॥ अन्यत्वाचांते तत्क्षणात् च्युते च निगिरंस्त्यजन्वा कर्णस्पर्शनं ॥ यद्वा निगीर्णे
र्णस्पर्शः त्यक्ते वा च मनं ॥ रसज्ञानेत्वसंभारे द्विराचमनमिष्यते ॥ अन्यत्वास्यगतं
चैवमावांतेत्व वशिष्टके ॥ आस्यं संशोध्य यत्नात् दंतांश्च मृदुयत्नतः ॥ दंतविधेम
हसा पंरक्तमद्यसमं विदुः ॥ एवं कृते यत्स्थितं स्यात् दंतदोषाय सर्वदा ॥ ओष्ठश्मश्रु
गतो लेपः शुद्धः प्रक्षालितस्थितः ॥ मुखजा विप्रुषः सूक्ष्माः शुद्धाः स्वाश्च पराश्च ताः ॥
स्पृष्ट्वा लाश्च विप्रुषः शुद्धाय धंगे न पतंति ताः ॥ अंगपाते तु प्रक्षाल्याः आचामेत्परस्य

स्मृ.स. चेत्॥ बिंदुष्वाचमनं कुर्युरनंगे पतिते षपि॥ चेदाभ्यासे मुखाज्जाताश्च ह्याएवाम्बु सर्वतः॥ सार.

रमश्रुके वास्यगतं श्मश्रु बध्रं गे न तु न स्पृशेत्॥ परस्पर्शेनिश्चुद्धा भूस्यष्टो वामन बिंदवः॥

जानुमात्रे जले तिष्ठन्नाचामेद्धि न दुष्यति॥ उपविष्टः समाचामेज्जानुमात्राद धोजले॥

जलाद्वांतो जलेष्वेवं बहिराचमने बहिः॥ बहिरवस्थ आचांत सर्वत्र शुचिरन्ततु

जले स्थो जलकार्येषु स्थले स्थः स्थलकर्मसु॥ उभयोरुभयस्थस्तु स्याचांतः शुद्धिमा

॥१२॥ प्नुयात्॥ न जले शुद्धवस्त्रेण नश्च क्के वाई वास सा॥ आचामादि क्रियां कुर्यात् बहिर्जा ॥११॥

नुन कुत्रचित्॥ इत्याचमन विधिः॥ ॥ अथ दंतधावन विधिः॥ ॥ प्रातर्मुखस्य क

र्त्तव्यं शुध्यर्थं दंतधावनं॥ प्राङ्मुख ईशानाभिमुखो वा दक्षिणे बाहुमुद्धृत्यांतर्जानु

करउपविश्य तिक्तकषायकटुकसुगंधिकंटकिक्षीरवृक्षगुल्मलतादीनामेकेन

प्रक्षालितेनवाग्यतोदंतांधावयेत्॥ तत्र हृष्टस्त्वजकाष्ठंस्याद्व्रणमृजुकीटाग्न्यदूषि
तंद्वादशांगुलमष्टांगुलंवाकनिष्ठाग्रसमस्थूलंसर्वार्धिकृतकूर्चकं॥ दंतधावनमुद्दि
ष्टंजिह्वालेखनिकांतथा॥ क्षेत्रादिघ्रंगुलांःश्लेगुलेहासः स्त्रीणांचतुरंगुलं॥ सर्वेषां
चैके॥॥ आयुर्बलंयशोवर्चःप्रजापशुवसूनिच॥ ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिव
नस्पते॥ ॥दंतधावनमंत्रः॥ ॥प्रक्षाल्यसंक्लातंत्यजेत॥ तत्रखदिरगरीकृतकर
वीरकुटजासेनार्कसजार्जुमेदापामार्गमालतीबिल्वाम्रकेदंबकरंजवंजीवेणुप्लु
क्षमोक्षकवटहरिशीरीषाकोविदारपालान्नाकाञ्चार्हस्तशिग्डिप्रियंगुसमालाःप्रशा
स्ताः॥ शाल्मलीरिष्टपाव्यकिंशुकपीलुबिभीतकगुग्गुलकच्छुकुचलिंडुकमधूक
ग्रगुडुधत्तूरपारिभद्राम्लिकाश्चवर्ज्याः॥ ६॥ हकालोहपापात्तैर्नकुर्याद्दंतधावनं॥

स्म०स्प० सार०

दधिनीलाधयामोचाकदंबेगुदतिंदुकाः॥ बधूकमल्लिकाराजकार्पासश्रीहरास्तथा॥ औ
डुंबरवटक्रमुकशिंशपाश्वत्थशिग्रुभिः॥ कुशकाशेदंतश्चद्रोणं पश्यन्नान्यथा शुचिः॥
कोविदारशमीकूष्मश्लेष्मातकपलाशकाः॥ निर्गुंडीशिंशपानीपाकेकदंबकुटजावटाः॥ वि
हिताः प्रतिषिद्धास्युरिमेतस्माद्विकल्पिताः॥ पलाशकुसुमंकाशशिंशपाकार्पासंदमयं
तीशाल्मलीशिरीषशमीलक्ष्मणाकरंजवटार्कबकुलंपारिजातंनिर्गुंडीश्चत्रीमुखकंट
किनश्चपूतिगंधोग्रगंधमधुरंविदलंविल्वंचविषदंगंधमूर्धभुक्त्वा वर्जयेदित्येके॥ ॥१२॥
आसनेशयनेयानेपादुकादंतधावने॥ पालाशाश्वत्थकौवर्ज्यौसिर्वकुलिसंतकमस्का॥
श्राद्धेयज्ञेचनियमेपत्न्यांचप्रोषितेतथा॥ अजीर्णेचविवाहेचउपवासव्रतेषुच॥ प्रतिप
दर्शषष्ठीषुनवम्यांचविशेषतः॥ दंतधावनवर्ज्यं॥ अष्टम्यांचचतुर्दश्यांपौर्णमास्यां

॥१२॥

स्नीते लदंतकाष्ठानि वर्ज्यानि॥ अर्कवारव्यतीपातजन्मदिनसंक्रांतिनंदादिषु विशे
षतः॥ षष्ठीप्रतिपदोर्भूताष्टमीपर्वसु विशेषतो नैव स्यादर्शे च तैलाभ्यंगं स्त्रियं मांसं दं
तकाष्ठं वर्जयेत्॥ दंतकोष्ठलाभे प्रतिषिद्धदिने वापां द्वादश गंडूषै मुखशुद्धिः॥ यद्वा त्र
ण पर्णादिकेनांगुल्या वा दंतान् धावयेत्॥ प्रदेशिनीवर्ज्यं॥ मध्यमानामिकांगुष्ठैर्दंत
धावनं दार्ढ्यं भवत्यपि॥ ॥ दंतधावनविधिः॥ ॥ अथ स्नानविधिः॥ ॥ संशोध्य दंतानाना
वश्यविधिवत्स्नानमाचरेत्॥ स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदिता नृणां॥ अ
स्नातस्तु पुमान्नार्हो जपक्रियाहोमादि कर्मसु॥ गुणा दश स्नानपरस्य पुंसो रूपं च तेज
श्च बलं च सौख्यं॥ आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च यशश्च मेधा॥ स्नानेम
नःप्रसादः स्याद्देवा अभिमुखाः सदा॥ सौभाग्यं श्रीः सुखं पुष्टिः पुण्यं विद्या यशो धृतिः॥

स्मृ॰स॰ महापापान्यलक्ष्मीश्च दुरिसं दुष्टचिंतितं॥ शोकदुःखादिहरणं प्रातःस्नानं विशेषतः॥ सार॰
प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः॥ यतेस्त्रीषवणं स्नानं सकृत्तु ब्रह्मचारिणः॥
सर्वे वापि सकृत्कुर्युरशक्तौ चोदकं विना॥ स्नानं च सर्ववर्णानां कार्यं शौचपुरःसरं॥ समंत्र
कं द्विजानां स्यात् स्त्रीशूद्राणाममंत्रकं॥ नमस्कारेण मंत्रेण शूद्राणां तु क्रिया स्मृता॥ न
जलेष्वशक्तवस्त्रेण स्थले चैवार्द्रवाससा॥ तर्पणाचमनं जाप्यं मार्जनादिकमाचरेत्॥ आ
॥२३॥ र्द्रस्नाने च सूर्यार्घ्यं जपोत्सर्जनतर्पणं॥ जलेष्विहोमं शुष्केण जले कुर्वन्न दुष्यति॥ ॥२३॥
स्नानं च द्विविधं प्रोक्तं वारुणेतरभेदतः॥ तत्रापि वारुणं मुख्यमितरद्गौणमेव तु॥ आ
ग्नेयं वारुणं ब्राह्म्यं वायव्यं दिव्यमेव च॥ सारस्वतमिति स्नानं स्मृतं षोढैव तत्र तु॥ आ
ग्नेयं भस्मना स्नानं मद्भिर्वारुणमुच्यते॥ आपोहिष्ठामयं ब्राह्म्यं मंत्रस्नानं च तत्स्मृतं॥

पछोर्द्धं वैन्नाकं वारुणाख्यं मार्जनं तन्मयं त्वे ॥ ब्रह्मस्तेहस्ते च्युतं तोयं शिरसां धारयेद्दिलि ॥
यत्स्मृतं तदपि आग्नेयं वायव्यं रजो सा गवां ॥ दिव्यमातपवर्षाद्भिर्गंगास्नानसमं स्मृतं ॥
विद्वत्सरस्वतीवाचो ब्राह्मं सारस्वतं स्मृतं ॥ दिव्यतीर्थमवं स्नानं गुर्वाचार्यैरितं तथा ॥
सर्वतीर्थाभिषेकान्तु पवित्रा विदुषां हि वाकू ॥ चांडालादिस्पर्शने च कार्यं वारुणमेव
वा ॥ काम्यं मलापकर्षं च क्रियास्नानं च वारुणं ॥ इतराणि यथायोग्यं देशकालाद्यपे
क्षया ॥ स्रोतसोभिमुखः स्नायान्मार्जने चाघमर्षणे ॥ अन्यत्रार्कमुखो रात्रौ प्राङ्मु
खोग्निमुखोपि वा ॥ संध्यामुखस्तु संध्यायां तथा चाद्यं तयामयोः ॥ नित्यं नैमित्तिकं
काम्यं क्रियांगं मलकर्षणं ॥ क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितं ॥ नित्यमेव
तु मध्याह्ने प्रातश्चैक वकस्य विन ॥ यतीव्रती ब्रह्मचारी होत्र ध्येय तपस्विना ॥ नैछि
ष्टाद्युपघातेषु वास्पृश्यस्पर्शनेषु च ॥ ग्रहसंक्रमणादौ च स्नानं नैमित्तिकं स्मृतं ॥ पु

स्मृ॰स॰

ष्य स्नानादिकं काम्यं दैवज्ञविधिचोदितं॥ दृष्टार्थं क्रियार्थं यत्तु क्रियांगं स्नानमुच्यते॥
मलापकर्षणं यत्तत् स्नानमभ्यंगपूर्वकं॥ स्नानमेव फलं तीर्थे क्रियास्नानं तदुच्यते॥
अनर्हस्त्ववगाहेव स्नावांतु स्नानमाचरेत्॥ प्रक्षाल्योच्छिष्टमुच्छिष्टस्तथैव स्नानमा-
चरेत्॥ नाभ्यांभसि शिरोमज्जो नावगाहेत्स मुड्के॥ क्रियास्नाने शिरोमज्जेदन्यत्रा-
पि सरःस्वच॥ उद्धृत्यात्पूर्वमूर्द्धं वा स्नानं स्यात्संगवेपि वा॥ प्रातःसंक्षेपतः स्नानं हो-
मार्थं चेत्तदिष्यते॥ नदीसरिद्देवखातगर्त्तप्रस्रवणेषु च॥ सरःस्वथाकृत्रिमेषु शा-
स्तं तीर्थं विशेषतः॥ वाप्यां कूपे तडागे वा परकीये वोद्धृवारिणी॥ प्रातःस्नानं सदा कु-
र्यादुक्तैनैव सदातुरः॥ तत्र पादौ मुखं प्रक्षाल्य प्राणान् सावित्रीं च स्मृत्वा शिखां बध्वा
चम्य तटं प्रक्षाल्य दर्भादीन्निधाय दर्भपाणिः कृतसंकल्पो जलं नत्वा प्रकटितता-
जलिः प्रांजलिः प्राङ्मुखः अवगाह्य तत्कक्षादीन्निमृज्य स्नात्वा द्विराचम्य जलतर्पणं

॥१४॥

सा॰स्मृ॰

॥२४॥

कार्यन्नवा॥ ततो वस्त्रं प्रांतं निष्पीड्याप स्पृष्ट्वा वस्त्रद्वयं परिधानोत्तरीये धृत्वा स्नानवस्त्रं
निष्पीड्याचम्य संध्यामुपासीत॥ मध्याह्न स्नाने विशेषः॥ कार्यं माध्याह्निकं स्नानं सं
क्षिप्तं वापि विस्तृतं॥ संक्षिप्तस्य प्रयोगात्र वक्ष्यते स्मृति संग्रहात्॥ तत्र कृतशौचो द्विरा
चम्य विष्णुं शिवं सूर्यं चेष्टदेवतां नत्वा प्रक्षालिततटे मृत्तिकां दर्भान् निक्षिप्तां स्तटं लोष्टिलो
नपृथक् संस्थाप्य मृत्तिकां त्रिधा विभज्य भागेनैकेनैकेन भागेनैकेन नाभेरधः संलिप्य
प्रक्षाल्य स्नात्वा द्विराचम्य भूर्भुवः स्वरिति मृत्तिकां प्रोक्ष्य हस्ताभ्यां तत्सवितुर्वरेण्यमिति
सूर्यस्य दर्शयित्वा नाभेरधः॥ स्योना पृथिवी भवेति वा पृथिवी शांतेति वा लिप्यान्यभागं
सूर्यदर्शितं नाभेरूर्ध्वं गंधद्वारामिति वा लिप्य आपो अस्मान्मातरः इदमापः प्रवहतास
मित्रियान आप इति शिरस्य प्रक्षाल्य दुर्मित्रियास्तस्मै संहितिबहिः प्रसिच्य यो स्मान्द्वेष्टि यं व
वयं द्विष्मः॥ इति मृच्छेषं प्रक्षाल्य अन्यतीर्थं गंगादि तीर्थं स्मृत्वा नत्वा हिरण्यशृंगमिति

वरुणं नत्वा तीर्थं चतुर्हस्तं प्रक्षाल्य प्रदक्षिणमुदकमावर्त्तयेत् ॥ जानुमात्रांते जले तिष्ठे
दन्यत्रोपविशेत् ॥ स्नात्वा देहं प्रक्षाल्य पुनः स्नात्वा द्विराचम्यादैवैतैः वारुणैः शुद्धवत्यः(?) पवित्र
वित्रलिंगैर्मार्जनं कृत्वा इमं मे गंगे इति जले त्रिरालोड्य निमग्नोऽथ मघमर्षणं अंगुष्ठांगु
लिभिः श्रोत्रदृङ्नासिकामुखं पिधाय निमग्नस्त्रीन् षट् षोद्वादश वारान्नावर्त्तयेदघमर्षणं ॥
ऋतं चेति वसिष्ठोक्तं द्रुपदां वाजपेयिनां ॥ ॐकारं वाजपेयिस्तु शिवं सूर्यं स्मरेत्तथा ॥ तत
स्त्रिपंच सप्त दश द्वादश वारं वा पुनः द्विराचम्य जलमध्ये वाऽऽर्द्रवासा जलतर्पणं कुर्यात् ॥

ततो जलादुत्तीर्य स्नानवस्त्रप्रांतं तटे निष्पीडयेत् ॥ ये के चास्मत्कुले जाता इति ॥ ततः
स्नानार्द्रवस्त्रं त्यक्त्वा शुष्कं शुद्धमहतं कार्पासं क्षौमं वा श्वेतं जान्वन्तकं वा वस्त्रद्वयं धृत्वा
जंघे पादौ प्रक्षाल्य द्विराचम्य गंगादिमृत्तिकयोर्ध्वपुंड्रं कुर्यात् ॥ अथ नित्यब्रह्मयज्ञत
र्पणादि कुर्यात् ॥ ॥ इति स्नानविधिः ॥ ॥ अथ तर्पणविधिः ॥ ॥ अन्वारब्धेन सव्येन द

क्षिणेन तु पाणिना ॥ सव्योत्तराभ्यां पाणिभ्यां अथवा तर्पणं भवेत् ॥ श्राद्धे पिंडे विवाहे च
दाने चैकेन दीयते ॥ तर्पणे तु जले नैव जले देयं तु नान्यथा ॥ वामहस्ते तिलान् क्षिप्त्वा
जलमध्ये तु तर्पयेत् ॥ स्थले चार्द्रान्नटे पात्रे ताम्रमृत्तेन कुत्रचित् ॥ असंस्कृतप्रमीता
नां स्थले दद्याज्जलांजलिं ॥ शुक्लैस्तिलैर्दैवैर्देवानुपवीती दैवेन तीर्थेन प्राङ्मुखस्तर्पये
त् ॥ शबलैस्तिलैः ऋषीन् निवीती कायेन तीर्थेन उदङ्मुखस्तर्पयेत् ॥ आनायनि पितॄन्
प्राचीनावीती पित्र्येन तीर्थेन कृष्णतिलैर्दक्षिणाभिमुखस्तर्पयेत् ॥ यद्वा शुद्धोदकेर्दे
वान् ऋषींश्च पितॄंस्तिलैः सर्वान्वा सर्वैस्तर्पयेत् ॥ यद्वा देवानक्षतैस्तंडुलैः ऋषीन् तिलैः
पितॄन् ॥ देवानामेकैकमंजलिं दद्यात् ॥ ऋषीणां द्वौ द्वौ पितॄणां त्रीं त्रीन्वारान् दद्यात् ॥ स्वा
वार प्राप्ते मंत्रैः ॥ यद्वा ॥ ब्रह्मादयो ये देवास्तान् देवांस्तर्पयामि ॥ भूर्देवांस्तर्पयामि ॥ भुव
र्देवांस्तर्पयामि ॥ स्वर्देवांस्तर्पयामि ॥ भूर्भुवः स्वर्देवांस्तर्पयामि ॥ कृष्णद्वैपायनादयो ये

स्मृ॰स॰

ऋषयस्तानृषींस्तर्पयामि॥ भूर्ऋषींस्तर्पयामि। भुवर्ऋषींस्तर्पयामि। स्वर्ऋषींस्तर्पयामि।
भूर्भुवःस्वर्ऋषींस्तर्पयामि॥ सोमः पितृमान्यमोंगिरस्वानग्निष्वात्ता अग्निकव्यवाहनाद
यो ये पितरस्तान्पितॄंस्तर्पयामि। भूः पितॄंस्तर्पयामि। भुवः पितॄंस्तर्पयामि। स्वः पितॄंस्त
र्पयामि। भूर्भुवःस्वः पितॄंस्तर्पयामि। ततः पित्रादीन्प्रतिपुरुषं तर्पयेत्॥ मात्रादीन्मा
तामहादीन्मातामह्यादीन्पितृव्यादीन्सपत्नीः ज्येष्ठभ्रातॄंस्तत्पत्नीः मातुलान्
सपत्नीः गुर्वाचार्योपाध्यायान्॥ सुहृद्धिबांधवान् श्वशुरद्रव्यदातॄंश्च पोषकांश्च दा
सान् सपत्नीश्च तर्पयेत्॥ तिलाभावे स्वर्णरूप्यताम्रदर्भयुतोदकैः॥ खड्गमौक्तिकह
स्तेन कार्यं वा पितृतर्पणं॥ नैकेन लब्धेनैव कर्तव्यं सति संभवे॥ न जीवत्पितृकः
कृष्णतिलैस्तर्पणमाचरेत्॥ सप्तम्यां रविवारे च जन्मर्क्षे दिवसेषु च॥ गृहे निषिद्धं
सतिलं तर्पणं तद्बहिर्विधेय॥ शोभनं गृहे शोभनदिने न तिलतर्पणं॥ विवाहे चापि

॥२६॥

सार॰

॥२६॥

नयने चौले सविधि यथाक्रमं ॥ वर्षमर्द्धं तु तदर्धं च नेत्स्येके तिलतर्पणं ॥ वृद्धौ सत्यां च त
न्मासे नेत्स्येके तिलतर्पणं ॥ तिथितीर्थविशेषेषु कार्यं प्रेते च सर्वथा ॥ पिंडोऽन्नस्य पिंडा
नोदके: प्रेतपिंडं विनात्र तु ॥ पितृयज्ञे च यज्ञे च गयायां दक्षरवेस्तते ॥ गयासाम्यं क्षया
हस्यकेविदाहुः पुराणगाः ॥ वसुरुद्रादित्यरूपान्नश्राद्धार्थे तर्पयेत्पितॄन् ॥ नाम
गोत्रे समुच्चार्य तिलैस्तीर्थेषु संयतः ॥ दीपोत्सवे चतुर्दश्यां मपि कार्यं स्वदैववाः ॥ य
माय धर्मराजाय मृत्यवे चांतकाय च ॥ वैवस्वताय कालाय सर्वभूतक्षयाय च ॥ औ
दुंबराय दध्नाय नीलाय परमेष्ठिने ॥ वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥ चतु
र्दश्यैते मंत्राः स्युः प्रत्येकं च नमोन्विताः ॥ एकैकेन तिलैर्मिश्रान् दद्यात्त्रीनुदकांजली
न् ॥ यज्ञोपवीतिना कार्यं प्राचीनावीतिना तथा ॥ देवत्वं च पितृत्वं च यमस्यास्ति द्विरूप

स्मृ.प॰

ता॥ न तु स्नानवस्त्रं निःपीडयेत्॥ न त्रिगुणीकृतं पीडयेत्॥ न जले पीडयेत्॥ न दक्षि
णाग्रं प्रसारयेत्॥ स्नात्वार्द्रवस्त्रो विण्मूत्रे कृत्वा प्राणायामत्रयं कृत्वा पुनः स्नायात्॥ नोत्त
रीयमधः कुर्यान्नोपर्यधस्त्यमंबरं॥ न सर्वकृष्णरक्तं वा परिदध्यात्कदाचन॥ कुतपं
शाणमजिनं योगपट्टोत्तरीयकं॥ यज्ञोपवीतमन्यद्वा द्वितीयं तु भवेदिह॥ स्नात्वा न पीड
येत्केशान्नांगेभ्यस्तोयमुद्धरेत्॥ न वस्त्रं विधुनेच्छ्वन्न केशमवधूनयेत्॥ स्नातो नांगं वि
मृज्यात्तु स्नानवस्त्रेण सर्वथा॥ नोन्योन्यस्पृष्टौ तौ मृज्यान्न लिंपेत्स्पृष्टौ तौ मिथः॥ स्नात्वा न धा
वयेद्दंतान्न मृज्यात्तु सकामुखं॥ न रात्रौ मृत्तिकास्नानं न चैव मार्कवारयोः॥ संध्ययोर्नै
व मा मूत्रे नक्षुद्रे कामये निशि॥ दिवा बुगोवार्कमूत्रैः शुद्धिर्निश्यं बुधस्मृतिः॥ पंचपिं
डान्स्वकूपे वा न्यूनपट्टु रत्नारवारिषु॥ स्नायाद सत्यपहवे नित्यार्थं न महानिशि॥ महानि
शा द्वे घटिके रात्रौ मध्यमयामयोः॥ न महानिशि नित्यार्थं काम्यं नैमित्तिकं भवेत्॥ स्ना

॥२७॥

सा२०

॥ ॥

यान्तु पूर्वमस्नातो निःस्युक्षेन जलेन च॥ अस्पृश्यस्पर्शने स्नानं निःस्युक्षेन जलेन च॥ नां
बुहन्यान्नैनिंदेन्न तीर्थे तीर्थांतरं स्मरेत्॥ न स्नायादुत्सवे तीते मांगल्यं विनिवर्त्य च॥
अनुव्रज्य स्नेहाद्धूपं नर्चयित्वेष्टदेवतां॥ मृते जन्मक्षे दिवसे प्रतिपन्नवमीषु च॥ श्राद्ध
कर्त्ता यान्यदिने संक्रांति ग्रहणेषु च॥ अर्कवारे सप्तम्यां चतुर्दश्यष्टमीषु च॥ एका
दश्यां पौर्णमास्यां पष्ट्यां दर्शे विशेषतः॥ तैलाभ्यंगं रतिं मांसं दंतकाष्ठं च वर्जयेत्॥
उष्णोदकेन न स्नायात्त्वन्यहस्ताद्वा पृथकारणात्॥ क्रियास्नाने च काम्यं च पारक्यो
ष्णोदकं वर्जयेत्॥ न चांनास्तमिते स्नायात् विशेषान्मध्ययामयोः॥ अग्निप्रज्वाल्य
वा स्नापा ह्यूष्णादिषु महाजले॥ राहुदर्शने संक्रांतिविवाहोत्क्रांतिवृद्धिषु॥ स्नानं
दानादिकं कार्यं निशि काम्यव्रतेषु च॥ न द्यां स्नावा न दीवान्यांन प्रशंसेद्बुधः सवि
तृ॥ अस्पृश्यस्पर्शने स्नाने माघमर्षण तर्पणे॥ नाभावप्युच्चीस्याता दंपती मैथु

स्म०स्य०

न्गतो॥ ऋतुयुना दुःस्थिता नारी शुचिः स्यादशुचिः पुमान्॥ ऋतौ तु मैथुने स्नायाद्वर्ष
धारणा शुद्धये॥ अन्ते तो तट भो वा वन्नो वं मूत्रं पुरीषवत्॥ रोगेणा यद्रजः स्त्रीणां न
नु मासं च वयः स्मृताः॥ चंडालादि स्पर्शनादौ विस्तरो वक्ष्यते पृथक्॥ शवानुगमने
स्नाने घृत मूत्राधिक स्थितः॥ यत्र पुंसः सचैलं स्यात्स्नानं तत्र सुवासिनी॥ कु
र्वीत वा शिरः स्नानं शिरो रोगी कटी सदा॥ अशक्तो शोभने गृहे शोभनां हे वसव
र्ष्या॥ न शीत जलं स्नानं कार्यं नैवोष्ण सेविता॥ उद्धृत जल स्नाने मार्जनं कार्यं॥
अभ्यम पीडाज पास्ति वान घा॥ जल तु पूर्णं कार्यन्न वा॥ स्थले तु पूर्णं तु पात्र स्थ ज
ले अक्षतादीन् क्षित्वा पात्रांतरे कार्यं सोदके गर्ते वा॥ सर्व हिर्भूः स्थले वा कार्यं
न बहि बिना शुचौ स्थले कार्यम्॥ अथाभ्यंग स्नान विधिः॥ तैलाभ्यंगे निषि

सा२०

॥२९॥

॥२९॥

द्वास्थः सर्वाश्चतिथयः सदा ॥ द्वितीयां वर्जयित्वैव दृष्टादृष्टद्विदोषतः ॥ सार्षपं गंधतै
लं च यत्तैलं पुष्पवासितं ॥ अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन ॥ तैलाभ्यंगे निषिधे
ष्वपि तिलतैलं निषिध्यते ॥ अभ्यंगस्य निषेधस्तु सर्षपादेरपीष्यते ॥ स्नेहेनाभ्यंगो भव
ति स स्नेहः सर्षपादिकः ॥ न भोजनाय तैलस्य निषेधोभ्यंग एव सः ॥ तैलशब्दस्तिल
स्नेह सुरूढो नैव यौगिकः ॥ अतस्तिलविकारे पि पिण्याके तिलमोदके ॥ शष्कुलीकृस
रादौ च निषेधो नैव जायते ॥ सार्षपादौ तैलशब्दस्तत्कार्यसदृशत्वतः ॥ संतापः कांति
रल्पायुधननिर्धनता तथा ॥ अनारोग्यं सर्वकामा वारेष्वभ्यंगकारिणः ॥ असौभाग्यं
चनैर्धन्यं वारयोर्गुरुशुक्रयोः ॥ निषिद्धदिवसे वारे रात्रौ च व्याधितस्य च ॥ द्रव्यांत
रयुतं तैलं न दुष्यति कदाचन ॥ शिरःस्नाने च तैलेन नांगं किंचिदुपस्पृशेत् ॥ सर्वथा
नित्यकाम्यार्थं स्नायादेव कदाचन ॥ विना मृत्तिकया वापि सह दोछेनधारिणा ॥ ॥ इति स्ना

नविधिः॥ ॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु॥ यत्किंचित्कुरुते कर्म न तस्य फलमश्नु
ते॥ तत्र पादौ हस्तौ प्रक्षाल्य द्विराचम्य दर्भपाणिरापोहिष्ठादिभिरब्दैवतैर्मंत्रैः दर्भैः शिरसि मा
र्जनं कृत्वात्मानं परिषिच्य सूर्यश्चेत्यपः पीत्वा द्विराचामेत्॥ सायं कालेऽग्निश्चेत्यपः पिबेत्॥
ततो द्विराचम्य पुनश्चाब्दैवतैर्मार्जनं कृत्वा आत्मानं परिषिच्य गायत्र्याभिमंत्रितं तोयमंजलि
ना सूर्यायार्घ्यं त्रिरूर्ध्वं क्षिपेत्॥ अशक्तौ धारांबु मार्जने परिवर्जयेत्॥ पात्रस्थेनांबुना कुर्याद्वाम
हस्तस्थितेन वा॥ ततः प्राणायामत्रयं कृत्वा सूर्यदर्शनात्तिष्ठन्प्रा[illegible]रो गायत्रीं जपेत्॥ आ
नक्षत्रदर्शनादासीनः सायं प्रत्यङ्मुखो जपेत्॥ ब्रह्मचारी गृहस्थश्च [illegible]रोत्तमष्टोत्तरं जप
त्॥ वानप्रस्थो यतिश्चैव सहस्रादधिकं जपेत्॥ युद्धापत्स्कंजपेद्देवीमष्टाविंशतिमष्टवा॥
सदर्भपाणिराहोमादर्भस्थः सकसंख्यया॥ हस्तेनावर्तयेद्देवीमक्षसूत्रैरथापिवा॥ सौ
वर्णै राजतैस्ताम्रैः स्फाटिकै रत्नजैस्तथा॥ अरिष्टैः पुत्रजीवोत्थैरिंद्राक्षैः शंखसंभवैः॥

रुद्राक्षैरपि पद्माक्षैः कुशग्रंथिभिरेव वा ॥ मणिभिस्त्वक्षसूत्रं स्यात्तदष्टशतसंख्यया ॥
चतुःपंचाशता वापि सप्तविंशतिभिस्तथा ॥ श्रेष्ठ्याज्जपादुपांशुः स्याच्छतो वै मानसस्त
तः ॥ स जपांशुजपो द्वेधो श्च लज्जिह्वारदच्छदः ॥ मानसस्त्वचलज्जिह्वादशनच्छदईरितः ॥
माध्योऽयं निर्जनस्थो मनोनेत्रव्यत्ययस्तपल्केरः ॥ जपे न श्रेष्ठ पादाश्च नो वष्टश्चोलसोऽश्रुविः ॥
नवक्रोमत्नजत्वंश्च न पार्श्वमवलोकयन् ॥ नासंख्यातमदर्भश्च नोन्निखाकच्छबधनः ॥ म
नः संहरणं शौचं मौनं मंत्रार्थचिंतनं ॥ अग्रतश्च मनिवैदोजपसंपत्तिहेतवः ॥ जपान्ते प्रातः
सौरैर्मंत्रैः सूर्यमुपतिष्ठेतु सायं वारुणैः ॥ यद्धुभ यत्रजातवेदसेन वैष्णवैः रौद्रैर्वोपति
ष्ठेत ॥ दिग्भ्यो दिग्देवताभ्यो नमस्कृत्य संध्यायै सावित्र्यै सरस्वत्यै सर्वाभ्यो देवताभ्यो न
मस्कुर्यात् ॥ इत्यादि यथाचारं कार्यम् ॥ पुनः सूर्यं नमस्कृत्य नाम गोत्रेण वाग्यतः ॥ गु
रुमभ्यर्च्य बुनीत्वाथ होमं कुर्याद्यथाविधिः ॥ ॥ इति संध्योपासनविधिः ॥ अथ होमविधिः ॥

स्मृ०स०

॥२०॥

होममुख्यो यजमानः पत्नी पुत्रश्च कन्यका॥ ऋत्विग् शिष्यो गुरुर्भ्राता भागिनेयः स्नुषापतिः॥
एतैरेव हुतं यत्तु तद्धुतं स्वयमेव तु पर्युक्षणवर्ज्जं पत्नी जुहुयात्तु॥ कुमारी वा॥ असमक्षं तु
दंपत्योर्होतव्यं न हि गोदिना॥ द्वयोरप्यसमक्षं चेत् भवेद्धुतमनर्थकम्॥ सन्निधौ यजमा
नस्याद्द्रुदेशत्यागकारकः॥ असन्निधौ तु पत्नी स्यादुद्देशत्यागकारिका॥ असंनिधौ
तु पत्न्याः स्यादध्वर्युस्तदनुज्ञया॥ तन्मादित्र स च व तौ कुर्वीतानुज्ञया विना॥ नोपवा
सी प्रवासी स्यात्पत्नी धारयेद्व्रतं॥ सर्वदा यजमानो वा त्यजेच्चेदिष्णुखः शुचिः॥ प्रातर्हो
मे संगवांतः कालस्त्वनुदिते तथा॥ सायमस्तमिते होमः कालस्तु नव नाडिका॥ ब
हुशुष्कैंधनावाग्नौ स्कसमिद्भिर्विधूमके॥ सांगारे लेलिहाने च होतव्यं नान्यथा क्वचित्॥
अग्निः प्रदक्षिणावर्तः कर्मदश्च शुभावहः॥ अग्निपरिसमुह्य परिस्तीर्य पर्युक्ष्य ततो ग
ध पुष्परलंकृत्य समिधं क्षिप्त्वा प्रदीप्तां समिधं ध्यं गुणमत्रिकेम्यं देवाय तत्ने संपूर्णहोम्यं

सार०

॥२०॥

देवतीर्थेन कायेन सौम्येन वा हुत्वा पुनः समिधं क्षिप्त्वोपस्थाय परिसमुह्य पर्युक्ष्य कुलेश्वरं
ब्राह्मणाय दद्यान्नमेतत्॥ पयो दधि यवागूश्च सर्पिरोदनतंडुलाः॥ सोमो मांसं तैलमापो दश
श्रौतान्यग्निहोत्रके॥ स्यादग्निहोत्रवत्सू॥ गृह्ये संस्कारे मंत्रवर्जितः॥ यद्वा त्रिः प्रोक्षणे
तेषां मांसमौपासनेन च॥ शालीश्यामाकनीवारा व्रीहिगोधूमयावकाः॥ एतेषां तंडुला
होम्या यावनालाः प्रियंगवः॥ प्रियंगवः शालयश्च गोधूमा व्रीहयो यवाः॥ स्वरूपेणापि हो
म्यास्युः स्वरूपेणैव वैतिलाः॥ द्रव्यं स्रुवेण होतव्यं पाणिना कठिनं हविः॥ व्रीहीणां च
यवानां च शतमाहुतिरिष्यते॥ तदन्नं द्विगुणं ग्रासो मयूरांडाकृतिस्तथा॥ कुक्कुटांडक
मात्रं तु पिंडं स्यादभिधीयते॥ अंगुष्ठपर्वमात्रं स्यादवदानं ततोपि च॥ ज्यायः स्विष्टकृ
दास्यं च चतुरंगुलसंमितं॥ ग्राससमात्रो भवेद्भिक्षा अग्रं ग्रासचतुष्टयं॥ अग्रं चतुर्गुणी
कृत्य हंतकारः स उच्यते॥ भिक्षा पुष्कलमग्रं वा पूर्वं पूर्वं चतुर्गुणं॥ न भोजनं तद्विगु

स्मृ॰स॰

यं च शरावः पात्रमेव च ॥ यद्वा ॥ प्रस्थधान्यं चतुः षष्ठेराकृतेः परिकीर्तितं ॥ तंदुलानां तदर्धं
स्यात्तदर्धं स्यात्घृतस्य तु ॥ ॥ अथ समिधः ॥ ॥ पलाशखदिराश्वत्थशम्युदुंबरजाः स
मित् ॥ अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरे विदुः ॥ सत्वचः समिधः कार्या ऋज्व्यः श्लक्ष्णाः
समास्तथा ॥ शस्ता दशांगुलास्तास्तु द्वादशांगुलकास्तथा ॥ आर्द्राः पक्वाः समच्छेदास्त
र्जन्यंगुलवर्तुलाः ॥ अपाटिता अद्विशाखाः कृमिदोषविवर्जिताः ॥ दग्धाः कृशास्तथा स्थू
ला ह्रस्वा दीर्घास्त्व वर्जयेत् ॥ यद्वा ॥ समित्पवित्रं वेदश्च त्रयः प्रादेशसंमिताः ॥ दूर्वाः स्तो

॥३१॥

द्विगुणाः कार्यास्त्रिगुणः परिधिः स्मृतः ॥ स्मार्ते प्रदेशोध्मो वा द्विगुणः परिधिः स्मृतः ॥
अथ दर्भविधिः ॥ ॥ कुशाः काशा यवा दूर्वा उशीराश्च सकुंदराः ॥ गोधूमव्रीहयो मुंजा
दश दर्भाः सबल्वजाः ॥ नभोमासस्य दर्शे तु शुचिर्दर्भान्समाहरेत् ॥ अयातयामास्ते
दर्भा नियोज्याः स्युः पुनः पुनः ॥ रविं विना सहोत्पन्नपरमेष्ठीनिसर्गज ॥ नुद पापानि सर्वा

स्मा॰ ॥३१॥

णि दर्भस्वस्तिकरो भव॥ कुशोद्दर्भोसाटनमंत्रः॥ ॥ एवं मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः॥
ॐ फट्कारेण मंत्रेण सकृच्छित्वा समुद्धरेत्॥ अछिन्नाग्रास्तु कुशाग्रा पित्र्येतु हरिताः शुभाः॥
अमूलादेवकार्येषु ग्रयोज्याश्च जपादिषु॥ सप्तपत्राः कुशाः शस्ता दैवपित्र्यभिकर्मणि॥
अनंतस्तरुणो साग्रो श्राद्धे शौलु पवित्रके॥ चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं॥ ए-
कैकंन्यूनमुद्दिष्टं वर्णेवर्णे यथाक्रमं॥ सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रंथितं नवा॥ त्रिभि-
स्तु शांतिके कार्यं पौष्टिके पंचभिस्तथा॥ चतुर्भिश्चाभिचारस्यान्निः कामे मिलिके नव॥ स
पवित्रः सदर्भो वा कर्मांगाचमनं भवेत्॥ नोच्छिष्टतं द्भवेत्तस्य भुक्तोच्छिष्टं तु वर्जयेत्॥
ये: कृतः पिंडनिर्वापः श्राद्धं वा पितृतर्पणं॥ विण्मूत्रादिषु ये दर्भास्तेषां त्यागो विधीयते॥
नीवीमध्ये स्थितास्त्याज्याः यज्ञभूमौ स्थितास्तथा॥ वामहस्ते स्थिते दर्भे न पिबेद्दक्षिणेन

स्मृत्यं०

तु॥ यस्मादिनोपग्रहेण न दोषः पिबसोमवेत्तु॥ न ब्रह्मग्रंथिना भामेन्नपूर्वाभिः कदाचन॥ सार०
स्नाने दाने जपे होमे स्वाध्याये पितृतर्पणे॥ सपवित्रौ सदर्भौ वा करौ कुर्वीत नान्यथा॥
कुशाभावे तु काशास्युः काशाः कुशसमाः स्मृताः॥ काशाभावे गृहीतव्या अन्ये दर्भा
यथोचितं॥ नाद्रौं लुनीयाद्रात्रौ च लुनीयाद्वानसंध्ययोः॥ दर्भाभावे स्वर्णरूप्यताम्रै
रत्नैः क्रियाश्चरेत्॥ ॥ इति दर्भग्रहणविधिः॥ ॥ अथ बर्हिः॥ ॥ बर्हिः कुशमयं ग्राह्यं न
लभ्यंते कुशा यदि॥ शरैर्वा मूलवार्श्चैव वाल्वजैरर्जुनैस्तथा॥ सुगंधितेजनादौर्दू ॥२९॥
॥२९॥ र्वाक्षीरद्रुमा अपि॥ यद्वा सर्वतृणेभ्यो ग्रा न ग्राह्यं बर्हिर्यथेप्सितम्॥ श्वकर्कशकेशनू
लदुर्गंधिरूपा वर्जितं॥ सूकलानेरकांश्चापि वर्जयंत्यपरे बुधाः॥ कुशाभावे परे प्राहुः
पर्वपर्णिप्रवहौ षष्ठीः॥ बेधूकेशाकरोकाट पारिव्याधक वर्जिताः॥ मुख्यानुदर्भान्विरो

षेण केचित्काश्मान्कुशांश्चरान् ॥ बल्वजान्मुंज़रीकाणि यवव्रीहितृणान्यपि ॥ ॥अथेध्मः ॥
पालाशः खदिरो वेध्मस्य मुख्यः स्यात्तदलाभतः ॥ शमीवटौदुंबरजाश्वत्थास्तदलाभतः ॥
वनस्पतीनां सर्वासामिध्मः कार्यो विचक्षणैः ॥ तत्रैतान्वर्जयेद्वृक्षान्कोविदारबिभीत
कान् ॥ कपित्थामलकं राजवृक्षं शाकं दुमं तथा ॥ नीपं निंबं करंजं च तिलकं शाल्मली
मपि ॥ श्लेष्मातकमपित्यक्त्वा ग्राह्योऽन्यः सकलो द्रुमः ॥ ॥अथ स्रुगादि ॥ ॥वैकंकतीवा
पालाशी ह्यग्निहोत्रे हवेष्यपि ॥ जुहूः पलाशस्तूपभृदाश्वत्थी वैकंकती ध्रुवा ॥ मद्वा ॥ स
थस्फ्यः स्रुवं कार्यं शिलेषामन्यवृक्षतः ॥ शमीमय्यः स्रुचः सर्वाः सर्वा वा भूर्जवृक्षजाः ॥
तदभावे यथालाभमन्ययज्ञियवृक्षजाः ॥ खादिरस्तु स्रुवः स्याद्वा शम्या भाषितमेक्ष
णः ॥ खादिरो मुशलः कार्यः पालाशः स्यादुलूखलः ॥ यद्वोभौ वारणौ कार्यौ तदभावेन्यवृ

स्मृत्यं०

सार०

क्षजौ॥ पालाशा द्वावटौ द्वान्य वृक्षा द्वावमसाः स्मृताः॥ अश्वत्थं वारुणं नो चेदिजा पात्रमि
हान्यजं॥ मुख्याभावे तु सदृशं द्रव्यं प्रतिनिधीयते॥ यावेद्या वल्कसदृशं तत्तद्देवहि गृह्यते॥
काम्ये प्रतिनिधिर्नास्ति नित्यनैमित्तिके हि सः॥ काम्येष्युपक्रमादूर्ध्वं मन्ये प्रतिनिधिं विदुः॥
तस्या प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्मसु॥ सद्देशकालयोर्नास्ति नारणेरग्निरेव सा॥
समारूढो व समिधं मरणं ब्रुवते बुधाः॥ नाभावस्य प्रतिनिधिरन्यावान्तरमिष्यते॥ ना
पि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्॥ श्रोत्रियाणामभोज्यं यत्तद्द्रव्यं हि तद्दोषतः॥ ॥२२॥
॥२२॥ ग्राह्यं प्रतिनिधित्वेन होमकार्ये न कुत्रचित्॥ इत्यं वैकल्पितं किंचिद्यत्र संकल्पितं भ
वेत्॥ तदभावे सदृशं ग्राह्यं न तु वैकल्पिकान्तरं॥ मुख्यद्रव्यापचारे तु प्रतिनिध्यभिसंधि
ना॥ प्रयुंजानस्य मुख्यार्थे लाभे ग्राह्यः स एव हि॥ उपात्ते तु प्रतिनिधौ मुख्यार्थे लभ्यते य

दि॥ तत्र मुख्यमनादृत्य गौणेनैव समापयेत्॥७ पात्रे यस्मिन्कस्मिन्वा मुख्येपचरिते सति॥
अन्यत्तु द्रव्यं सजातीयं विजातीयमथापि वा॥८ पाशाप प्रयुंजानो यदि पूर्वमवाप्नुयात्॥७ पा
सत्त्वा विनष्टोपि पूर्वं हित्वा परं श्रयेत्॥ मुख्याभावे यदा गौणमुपात्तं सद्विनश्यति॥ तत्र मु
ख्योपमं गौणं ग्राह्यं गौणोपमं न तु॥ संस्काराणामयोग्येपि मुख्य एव हि गृह्यते॥ ननु सं
स्कारयोग्येपि गृह्यते प्रतिरूपकः॥ मुख्ये कार्यासमर्थे तु लब्धेपि तस्य नादरः॥ प्रतिरू
पमुपादाय सकले तेन प्रयुज्यते॥ ध्रुवं स्तमात्रपर्याप्ते मुख्यद्रव्यस्य संभवे॥ पुरोडाशम
हत्वार्थं न नीवारपरिग्रहः॥ हेम व्रीह्यादिके द्रव्ये नष्टे चपरिते सति॥ ग्राह्यो ह्येकोपि
सन्ने व्रीहिः व्रीहिभिः हेम गुण्यपि॥ कार्यै रूपैस्तथा पत्रैः क्षीरैः पुष्पैः फलैरपि॥ गंधै रसैः
सदृग्ग्राह्यं पूर्वाभावे परः परः॥ व्रीहियवो वाऽन्स्या माको नीवारो वाह विभवेत्॥ वेणुर्यवोस्तर
सेया कंदमूलफलं जलं॥ सत्यं वाहविरिते तेषु यथासंभवमाचरेत्॥ प्रतिनिध्यं सरे सत्यं

स्मृत्य॰

विहिते यह विरस्ये ये॥ प्रधानदेवुतो द्रेगात्तु संत्यजेत्सत्यमात्मनः॥ अतो दन्यपि वा ग्राह्यं सद
स्रं धान्यमात्रकं॥ न ग्राह्यं सर्वथा माष वरकोदार कोड्वं॥ यद्वा व्रीहियवाभावे तुष तंडुलयो
र्गिनीः॥ ओषधीः प्रतिगृह्णीयात् पुकोड्व वर्जिताः॥ ग्राम्याणां मासे वे ग्राम्य मारण्या नाम
रण्यजं॥ यवाभावे तु गोधूमास्ततो वेणुयवादयः॥ छंदोगगृह्यवचनाज्जुहुयाद्व्रीहिभिस्य
योः॥ फलं याज्ञिकवृक्षस्य तत्र त्रमथवा जलं॥ यद्यग्निहोत्रहोमार्थं पयो न स्यात्केदोचन॥
तदा व्रीहियवो ग्राम्यमोषध्यंतरमेव वा॥ आरण्याषधयो वृक्षफलान्यापद्यतिक्रमात्॥ हो
मं कर्तुमुपादेयं पूर्वाभावे परः परः॥ तेषामभावे जुहुयाच्छुद्धया सत्यमात्मनः॥ हव्यार्थं गो
घृतं ग्राह्यं तदलाभे तु माहिषं॥ आजं वा तदलाभे तु साक्षात्तैलं ग्रहीष्यते॥ तैलाभावे ग्र
हीतव्यं तैलं जर्त्तिलसंभवं॥ तदलाभे तसीस्नेहः कौसुंभः सर्षपोद्भवः॥ वृक्षस्नेहो थ
वा ग्राह्यः पूर्वाभावे परः परः॥ तदलाभे यवव्रीहिश्यामाकान्यतरोद्भवं॥ पिष्टमालोड्य सौ

सार॰

॥२४॥

॥२४॥

येन घृतार्थं योजयेत्सुधीः ॥ क्षेत्रे तैलेषु पुन्नागनिंबैरंडोद्भवं त्यजेत् ॥ यद्यागग्र्ये घृते च्छागम
हिष्यादेर्घृतं क्रमात् ॥ तदलाभे गवादीनां क्रमात्क्षीरं विधीयते ॥ तदलाभे दधि ग्राह्यम
लाभे तैलमिष्यते ॥ यत्राज्यमेजनाद्यर्थं न लभ्येत कथंचन ॥ तत्र क्षीरायनाद्यस्यासा सान्नै
लं गृहीष्यते ॥ यत्र मुख्यं दधिक्षीरं न चापि तदभावतः ॥ अजादेः क्षीरदध्यादि तदला
भे तु गोघृतं ॥ मुख्यासन्नोथवा ग्राह्यं कार्यकारणसंततौ ॥ अत एव घृताभावे पूर्वं दधि
ततः पयः ॥ येषां केषांचिदन्येषां हविषामप्यसंभवे ॥ सर्वत्राज्यमुपादेयं भरद्वाजमुनेर्म
तात् ॥ मुख्यकालेयदावश्यं कर्म कर्तुं न शक्यते ॥ गौणकालेपि कर्तव्यं गौणोप्यत्रेदृशो
भवेत् ॥ सायमाहुतिराप्रातरासायं प्रातराहुतिः ॥ कर्तव्या नातिपद्येत पार्वणं पार्वणांत

रात्॥श्यामाकैर्व्रीहिभिश्चैवयथैवर्चान्योन्यकालतः॥प्राग्यष्टुंयुज्यतेत्वश्यंनतत्राग्रयणा
त्ययः॥एवमाग्नामिकार्यस्यमुख्यकालादधस्ततः॥स्वकालादुत्तरोगौणःकालःपूर्व
स्यकर्मणः॥सर्वत्रगौणकालेषुकर्मचोदितमाचरेत्॥प्रायश्चित्तंव्याहृतीभिर्हुत्वा
कर्मसमारभेत्॥मुख्यकालेतुमुख्यंचेत्साधनंनैवलभ्यते॥मुख्यकालमुपाश्रेयो
गौणमप्यस्तुसाधनं॥नमुख्यद्रव्यलाभेनगौणकालप्रतीक्षणं॥एकपक्षगतोयावा
न्होमसंघोतिपद्यते॥पक्षेहोमविधानांतंकुर्यात्तेतुमतीजेयेत्(?)॥स्वकालोत्कर्षि(?)
तेकस्मिंश्चिद्धोमकालोनिरूप्यते॥आमयाव्याधिमानायन्नगतोयाध्वगतोपिवा॥
राष्ट्रभंगेधनाभावेगुरुगेहवसन्नपि॥अन्येष्वेवंप्रकारेषुनिमित्तेष्वागतेषुच॥समास
मग्निहोत्राणांयथासंभवमाचरेत्॥निमित्तानामिहैतेषांनिर्दिश्यैकंतदुच्यते॥न

॥२५॥

स्तेर्येषु निमित्तेषु जानीयात्प्रतिपादितं ॥ पक्षहोमानशेषान्वा शेषहोमानथापि वा ॥ स
मस्य जुहुयात्तत्र प्रयोगोयं निरूप्यते ॥ प्रतिपद्युनियत्सायमापद्यन्यत्रवा दिने ॥ यावं
त्सोपवसथ्याहात्प्राग्दिनानि भवंति हि ॥ तावंति परिगृण्हीयात्तत्र चतुरुन्नयनानि
तु ॥ पात्रांतरसहायायां स्थाल्यां प्रकृतौ स्रुचि वा ॥ स्थूलस्रुगंतरं वापि हृत्वा तत्र समु
न्नयेत् ॥ एकास्मिन्सकृत्क्रमः स्रुवेद्वहिमार्जनं ॥ उपस्थाने सकृत्कार्यं शेषं प्रकृ
तिरिष्यते ॥ एवमेवोत्तरत्रापि प्रातर्होमासमस्य तु ॥ जुहोत्सोपवसथ्याह प्रातर्होमा
वधीत्सकृत् ॥ समारोपविधानेन समारोपयते नलात् ॥ एवं प्रतिपदोन्यत्र यत्रायदुप
जायते ॥ तथैवोपवसथ्याच्चाकृत्यत्रान्यापद्विनश्यति ॥ आपदेवावहोधिमस

स्मृत्यर्ण।

सा१०

मासस्याप्युपेयते॥ तस्मात्कदाचिदारभ्य यावत्तस्तावतोपि वा॥ आपत्काले समान्हो
मान् समस्य दैवपक्षगान्॥ एवमेकत्र पक्षे ये होमास्तेषामत्रोषतः॥ न्हनानां वा स
मासस्यान्यपक्षांतरवर्तिनां॥ सर्वथोपवसथ्याहे सायंहोमः पृथक् भवेत्॥ तथै
व यजनीयाहे प्रातर्होमो भवेत्पृथक्॥ सर्वोपवासशून्यं चेत्प्राप्तकेनापि हेतुना॥
तदा तत्सायंहोमोपि पूर्वैः सह समस्यते॥ तावता नापगच्छेच्चेत् आपत्पक्षांतरे
प्येवा॥ पुनस्तत्रापि कर्तव्यः समासः पृथगेव हि॥ नतु पक्षांतरस्थानां समासश्चोद्य
तेमिथः॥ एवमापद्गतः पक्षे पक्षे चैवं समाचरेत्॥ तृतीयेनंतरे पक्षे समासं न
समाचरन्॥ आपदेव तु वर्तेत दीर्घकालं कथंचन॥ यावज्जीवमविच्छिन्न पक्ष

॥३६॥

होमं समाचरेत्॥ आपदेवावधिस्तत्र न पक्षगणनावधिः॥ अथापरः समासस्य प्रका
रः प्रतिपाद्यते॥ सायं प्रातस्तनौ होमावुभौ सायं समस्य तु॥ आपत्तौ जुहुयाल्लब्ध समि
दे कथवा द्वयं॥ सायं होमस्य मुख्यत्वात्तु दीयं तत्र मिष्ठसे एवं तत्र आहुती कुर्यात्तु
त्रे द्वे सायमाहुती॥ द्वे प्रातराहुती सायं होमे वैका स समिद्यदि॥ समिद्धे सा द्वितीया वे
त्सा भवेत्प्रातराहुतेः॥ द्विः सायं होमवन्हेर्ज्यादिः प्रातर्होमवत्सकृत्॥ उपस्थानं सहो
क्रोयं नोपि प्रकृतिवद्भवेत्॥ केचिद्वे आहुतिर्द्वित्वा संविदुर्येयनिमील्यवा॥ विच्छिवे
लापता होमो कुर्युर्द्वे आहुती तलः॥ गुर्वापदि समस्यंते प्रातः सर्वे कथंचन॥ दीर्घका
लापदं मत्वा पक्षहोमे कृते सति॥ पक्षांतराले यद्यापत् कदाचिदपि गच्छति॥ काल
फाले पुनर्होमः कर्तव्यो विधिनानया॥ यावत्तोत्र समासास्ते सर्वे सायमुपक्रमाः॥ आ

स्मृ॰स्था॰

तः कालापवर्गश्च न तु प्रातरुपक्रमाः ॥ प्रातर्होमादि कार्यद्वा प्रातश्चेदापदो गता ॥ तथा

सा॰र॰

पूर्वापराह्णकालो दोनिमित्तेय समस्यति ॥ पूर्वपक्षे तु रात्रौ चेन्मृतिरौ[illegible]काग्निहोत्रिणः ॥

सायं कुर्यात्तदैवाथ जुहुयात्प्रातराहुतीः ॥ यदि त्वपरपक्षे स्यान्मृति[illegible]काग्निहो

पाः ॥ कृतावशिष्टाः पक्षस्मिन्नेजुहुयात्सकलाहुतीः ॥ दर्शेष्टिं च ततः कुर्याद्विशिष्

दिनसंभवे ॥ दैवतानां प्रधानानामेकैकस्य पृथक् पृथक् ॥ पुरोनुवाक्यायोज्या

ज्यां च तु राज्ञा घृताहुतीः ॥ जुहुयादेवमन्यत्र सर्वत्रापदि दृश्यते ॥ अथ श्यपनमध्ये ॥८७॥

॥२७॥

स्यात्तस्य मरणं यदि कृतं ॥ अवशिष्टेष्टिदेवेभ्यस्तत्संख्यानि घृतानि च ॥ चतुर्गृहीता

न्येकत्र गृहीत्वा च मसैः सह ॥ पुरोनुवाक्यायाज्याभिः पूर्ववज्जुहुयात्तथा ॥ चातुर्मा

स्यानराले स्यात्स्वामिनो मृत्स्कयां कृतं ॥ तत्रांत पर्वपर्यंतमग्निहोत्राण्यशेषतः ॥ त

देवं कुरुते दर्शपूर्णमासान्वह्निनपि ॥ यो तु मांस्याः वृश्चिष्टानि पर्वण्यत्र समापयेत् ॥
पश्चलाभे पुरोडाशं निर्वपेत्पश्चु दैवतं ॥ आमिक्षामथवा कुर्यात्तु पूर्णाहुतिमथापि वा ॥
आहिताग्निः कदाचित्तु कृष्णपक्षे मृतो यदि ॥ तदा शेषादुतीः सर्वा जुहोतीत्याश्वला
यनः ॥ अन्ये तदैवदर्शेष्टिं कुर्युः कृष्णे [illegible] ॥ शुक्ले पक्षे निशिप्रेतस्येच्छन्ति प्रात
राहुतिम् ॥ यच्चाहिताग्नेर्धर्मः स्यात्स औपासनिकस्य वा ॥ इति शाट्यायनिः कर्मावष्टे
ब्राह्मणमंत्रतु ॥ संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् ॥ न त्यजेत्सूतके वापि त्यजे
न्नाछेदधो द्विजः ॥ कुर्यात्संच महायज्ञान्नित्यश्चाः सूतकं विना ॥ नित्यं नैमित्तिकं चान्य
त्स्वकर्मापि न हापयेत् ॥ स्वकर्महानौ पतनमब्दे नैव हवना यदि ॥ स्वकर्महानौ नास्ति
क्यान्मासेन पतनं स्मृतं ॥ द्वादशाब्दे प्रेते नैव तस्य शुद्धिस्कानान्यथा ॥ तन्निरीक्ष्याक

मीक्षेत स्पर्शे स्नायात्सचैलकं ॥ तेन संभाषणं हास्यं कुर्वन्नब्देन तत्समः ॥ नदन्नभुंक्तो
सद्यस्को सहस्रा व्यासने भुव ॥ ॥ इति होमविधिः ॥ ॥ अथ देवतार्चनविधिः ॥ ॥ ब्रह्म
णं विष्णुमीशं वा सूर्यमग्निं गणाधिपं ॥ दुर्गां सरस्वतीं लक्ष्मीं गौरीं वा नित्यमर्चयेत् ॥
अप्सु वाग्नौ हृदये सूर्ये स्थंडिले प्रतिमासु च ॥ शालग्रामे वृषचक्रांके पटे मुद्रासु देवताः ॥
नित्यं संनिहिता पूज्येषु रत्ने गोब्राह्मणेषु च ॥ पौरुषेणैव सूक्तेन गायत्र्या प्रणवेन वा ॥
तल्लिंगैरेव वा मंत्रैरर्चयेद्कुर्वनुज्ञया ॥ दैवतानामभिर्वास्यात्स्वतुर्थ्यंते नमोन्वितैः ॥
आवाहनासनं पाद्यमर्घ्यमाचमनीयकं ॥ स्नानमाचमनं वस्त्रमाचामं चोपवीतकं ॥
आचामं गंधपुष्पं च धूपं दीपं प्रकल्पयेत् ॥ नैवेद्यं पुनराचामनं चास्तकं वा विसर्ज
येत् ॥ स्त्रीशूद्राणां च भवेत्तिनाम्ना वै देवतार्चनं ॥ सर्वे वागममार्गेण कुर्युर्वैदानु

॥३९॥

साक्षिणा॥ गुरूक्तेन प्रकारेण पावेद्बाह्येन नार्चयेत्॥ यां कां चिद्दैवतां कश्चिद्दाराधयितुमि
च्छति॥ स सर्वोपाययत्नेन ब्राह्मणान्मोक्ष्यतोषयेत्॥ एवं देवार्चनं कृत्वा गुरून्संस्मरेज्ज्यपत
लं॥ पुष्पं क्षिप्त्वा प्रणम्याथ नित्यदानं स्वशक्तितः॥ कृत्वा दृढ्वा नमस्कारस्य कर्तव्यं मंगले
क्षणं॥ विप्राग्न्यर्कबुगोहेमनृपाज्यं मंगलं स्मृतं॥ अग्निश्चित्रैकपिला सत्री यज्वामिष्टान्न
दो बुधैः॥ ज्ञानसिद्धस्तपःसिद्धः स्नातायुर्धार्मिकः शुचिः॥ एते पापहरा ज्ञेयास्तान्सदाप
श्येन्नमेदपि॥ रोचनं चंदनं हेम मृदंगं दर्पणं मणिं॥ घृतं वाग्निं गुरुं विप्रं प्रातः पश्येत्स
दा बुधः॥ कृष्णा ब्राह्मी वदूर्वां बिल्वं चंदनं शंखपुष्पिकां॥ सिद्धार्थकान्प्रियंगुंश्च प्रातः शिर
सि धारयेत्॥ पापिष्ठं दुर्भगं चांत्यं नग्नमुत्कृत्तनासिकं॥ प्रातर्न पश्येदेतांस्तु दृष्ट्वा पश्ये
द्दिवाकरं॥ ॥इति देवतार्चनविधिः॥ ॥अथ मध्याह्नस्नानं कृत्वा नित्यं संध्याह्निकं कर्मका
र्यं॥ तत्र पादौ प्रक्षाल्य द्विराचम्य आपोहिष्ठाद्यैर्मार्जनं कृत्वाऽङ्घ्रिः परिप्रोक्ष्य आपः

स्मृत्यं०

पुनंतु पृथिवीमिति जलं दर्भपाणिः पीत्वा द्विराचम्य पुनश्चापोहिष्ठाद्यैर्मार्जनं कृत्वाद्भिः प
रिप्रोक्ष्य गायत्र्या सकृत्सूर्यायार्घ्यं दत्वाग्र दक्षिणं कृत्वापः स्पृष्ट्वा याहं सः शुचिषदिति सूर्य
मुपस्थायोदुत्यं चित्रमित्याद्यैश्चोपस्थाय नत्वा भूमिं स्पृष्ट्वा ओमापो योमत्रयं कृत्वा गायत्री
~ वंवज्जपेत् ॥ पुनः सूर्यं नत्वा ब्रह्मयज्ञादिकं कुर्यात् ॥ ब्रह्मयज्ञो देवयज्ञो भूतयज्ञस्त
तः परः ॥ पितृयज्ञो नृयज्ञश्च पंचयज्ञाः प्रकीर्तिताः ॥ स्वाध्यायो ब्रह्मयज्ञः स्याद्देवयज्ञोग्नि
होमकः ॥ भूतयज्ञो बलिः प्रोक्तो हुतशेषान्नतः परं ॥ पितृयज्ञः स्वधा पितृभ्यो हृत्यन्नादि ॥२९॥
दानतः ॥ मनुष्ययज्ञोऽतिथ्यादेर्मनुष्योद्देशदानतः ॥ ॥ अथ ब्रह्मयज्ञप्रयोगः ॥ ॥
तत्र पादौ प्रक्षाल्य द्विराचम्य प्रागग्रेषु दर्भेषु प्राङ्मुख आसीनो दर्भपाणिः पवित्रेग
र्भब्रह्मांजलिः प्रणवं व्याहृतीरुक्त्वा सावित्रीं पच्छोर्द्धर्चशः कृत्स्नां नवा नेवोक्त्वा प्र
णं मुक्त्वा ऋचं सूक्तमनुवाकं वा यजुर्वा साम वा सावित्रीं चेतिहासं वा पुराणं वा मंड

सार०

॥२९॥

णमध्यमेन वा स्वरेणाधीत्य नमो ब्रह्मण इति त्रिरुक्त्वा उत्तरसंस्थं प्रारभ्यों तत्सदिति समा
पयेत्॥ ग्रामे मनसाधीयीत॥ ततः स्वगृह्योक्तविधिना देवानृषीन्पितॄंश्च तर्पयेत्॥ य
ह्वा ब्रह्मादयो ये देवास्तां देवांस्तर्पयामीत्याद्यैर्यथाचारं कुर्यात्॥ ततो वस्त्रं निष्पीड्याच
म्यागत्यांबु गृहीत्वा गृहं गत्वा वैश्वदेवं कुर्यात्॥ ॥अथ वैश्वदेवः॥ ॥गृहस्थो वैश्वदेवा
ख्यं कर्म प्रारभेत दिवा॥ अन्नस्य चात्मनश्चैव संस्कारार्थमिष्यते॥ औपासनाग्निमन्यं
वा समिध्य परिसमुह्य पर्युक्ष्याक्षतगंधपुष्पाणि दिक्षु चान्नोक्षितालंकृत्यह विष्वंप
क्वं घृतप्लुतं व्यंजनान्नं वा यथाचारं कृत्वा परिसमूह्य पर्युक्षेत्॥ ॥अथ बलिहरणं॥
देवयज्ञकृतशेषेणाशुचिदेशमध्ये क्षतत्र कुर्यात्॥ ॥अथ पितृयज्ञः॥ ॥तत्र भूतयज्ञ
बलिहरणशेषं सोदकं स्वधा पितृभ्य इति प्राचीनावीति दद्यात्॥ ततस्त्वेव बहिर्निवे
न्नानां ते सोदकमन्नं भूमौ भ्यंचांजलपति तयाय सेभ्यश्च निक्षिपेत्॥ एते देवयज्ञपितृ

स्मृसा०

यज्ञायैश्वदेवमित्यभ्यस्यते ॥ हविष्यं समस्तं वैश्वदेवे विवर्जयेत् ॥ यद्वा ॥ कोद्रवं चणकं मां-
सं मसूरं च कुलत्थकं ॥ क्षारं च लवणं सर्वं वैश्वदेवे विवर्जयेत् ॥ यद्वा न क्षारलवणं हो-
मो वा विद्यते तथा ॥ परान्नं संसृष्टस्य याहविष्यस्य होमे उदीचीने [illegible] भस्मापोह्य तस्मिं-
ञ्जुहुयाद्धुतमकृतं चाग्नौ भवति ॥ न स्त्री जुहुयात् ॥ यद्वा सप्तस्मागारेषु जुहुयाद्देहवि-
ष्यकं ॥ ग्रन्थान्तरे मनुष्ययज्ञं कुर्यात् ॥ ॥ तत्रातिथ्यादिमर्चयित्वा निवीति सनकादि-
मनुष्येभ्यो हन्तेति दद्यात् ॥ यद्वा गृहन्तकारं वा हन्तेति धान्यं संत्यजेत् ॥ सर्वथान्नं पितृम-
नुष्येभ्यो देयं वापि जलं तथा ॥ स्वाहाकारवषट्कारनमस्कारो दिवौकसां ॥ स्वधाकारः
पितृणां तु हन्तकारं नृणां स्मृतः ॥ पक्वाभावे प्रवासे वा तंडुलानोषधीस्तथा ॥ पयो दधि
घृतं वापि कंदमूलफलादि वा ॥ योऽनुयद्वयस्तादौ जलं वा पक्ववाजले ॥ ड्वंस्कवणाहो-
तव्यं पाणिना कोठिनं हविः ॥ स्नातको ब्रह्मचारी वा पृथक्पाकी वैश्वदेवं कुर्यात् ॥ स्त्री

॥ ५० ॥

सार०

॥ ५० ॥

बालाश्च कारयेत्तु ॥ होमाग्रदानरहितं नमोक्कैव्यं कदाचन ॥ अपि भक्तेषु संसृष्टेष्वेकेनापि
कृतं तु यत् ॥ देवयज्ञादि सर्वार्थे लौकिका गौण्कृतं यदि ॥ इक्षूनूलपः फलं मूलं तांबूलं पय
औषधं ॥ भक्षयित्वापि कर्तव्याः स्नानदानादिकाः क्रियाः ॥ कुर्यादहरहः श्राद्धमन्नाद्येनो
दकेन वा ॥ पयोमूलफलैर्वापि श्राद्धान्यन्यानि भक्तितः ॥ ॥ इति स्मृत्यर्थसारे आचार
प्रकरणं समाप्तं ॥ छ ॥ छ ॥ कामयेनौ प्रदीपो श्रौ कल्पवृक्षे लतादिषु ॥ श्रीमुद्गविड
केदारलोलुटाद्येश्च भाषितं ॥ मन्वत्रियाज्ञवल्क्याद्यैर्व्याख्यातौ प्रतिपादितौ ॥ स्मृत्यर्थ
सारं वक्ष्यामि सुखानुष्ठानसिद्धये ॥ छ ॥ ॥ अथ श्राद्धविधिरुच्यते ॥ ॥ तत्र तावत् श्रा
द्धं द्विविधं ॥ पार्वणमेकोद्दिष्टमिति ॥ त्र्युद्देशं पार्वणं ॥ एकोद्देशेन एकोद्दिष्टं ॥ तत्र त्रिविधं
नित्यं नैमित्तिकं काम्यं चेति ॥ तत्र नित्यमहरहरमावास्याष्टकादिषु ॥ नैमित्तिकं पु
त्रजन्मादिषु ॥ काम्यं फलार्थिनां तिथिनक्षत्रादिषु ॥ पुनश्च पंचविधं ॥ अहरहः श्राद्धं

पार्वणश्राद्धं वृद्धिश्राद्धमेकोद्दिष्टं सपिंडीकरणं चेति॥ तत्र श्राद्धदेशः पुण्यः अस्थिकेश
श्लेष्मादिरहितः शोधितो दक्षिणाप्रवणो गोमयेनोपलिप्तः॥ छ॥ ॥अथ श्राद्धकालः॥ ॥७॥
अमावास्याष्टकावृद्धिकृष्णपक्षोयनद्वयं भूाद्रव्यंब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमो व्य
तीपातो गजच्छाया ग्रहणं युगादिर्मन्वादयश्च तथा॥ विशिष्टदेशगयादौ विशिष्टकाले च
मृताहादौ द्रव्यब्राह्मणसमीपत्कौ वात्मरुचिश्चेत्याद्याः कालाः॥ अथ भोज्या ब्राह्मणाः॥
अनूचानः पूर्वःऋतोध्ययनसंपन्नो वेदार्थविद्ब्रह्मवित्त्रिमधुस्त्रिसुपर्णस्त्रिणाचिके
तो ज्येष्ठसामग ऋत्विग्याज्यादि॥ अथवा दौहित्रो भागिनेयो जामाता मातुलः श्वशुरः
शिष्यसंबंधिबांधवाः॥ कर्मनिष्ठस्तपोनिष्ठः षडग्निः पंचाग्निश्चतुरग्निस्त्रेताग्निरेका
ग्निर्वेदाध्यायी यतिर्ब्रह्मचारी स्याद्याः प्रशस्ताः॥ अथ निषिद्धाः॥ रोगिन्यूनातिरिक्तां
गः काणो बधिरो नपुंसकोपविद्धपुंस्त्वो जारो जारपतिः खलतिर्निजदेहदंतः कुनखी

॥४१॥

दुश्चर्माऽवकीर्णिरूपो नर्भवः कुंडगोलौ निषिद्धान्नाशी मेढ्रः सगात्रीभृताध्यायी भृताध्याप
कः कन्यादूषी वाभिशस्तो मित्रध्रुक् पिशुनः सोमविक्रयी परिवित्तिः परिवेत्ता तयोर्दाति
याजकौ च तथा मातापितृसुतभार्यागुरुत्यागी पुनर्भूपतिस्तेनः कितवो देवलकः कर्म
दुष्टो विहितत्यागी निषिद्धग्राही त्याद्या वर्ज्याः सर्वत्र श्रोत्रियालाभे निषिद्धरहितं ग्राह्यं॥
नित्यश्राद्धे वैश्वदेवं गृहबलिश्च पूर्वमेव॥ दर्शश्राद्धे वैश्वदेवं पूर्वं पूर्वं पश्चाद्वा॥ वृद्धा
या दीक्षयाहं ते दर्शमध्ये महालये॥ श्रावां तेश्रु च कर्तव्यं वैश्वदेवं चतुर्विधं॥ गृहब
लिस्तु पश्चादेव॥ अन्यश्राद्धेषु सर्वं पश्चादेव कार्यम्॥ ॥ अथ मासापार्वणश्राद्ध
मुच्यते॥ ॥ तत्र पितृणां मातामहानां च कार्यं॥ तत्र पूर्वेद्युः तद्दिने वा नियतो नियतान्
ब्राह्मणान् श्राद्धे क्षणः क्रियतामिति निमंत्र्य तानाहूय स्वागतं पृष्ट्वा स्वागतमित्युक्ते
तदाहनीलीकलक्षिछिद्रादिवर्जिताः हतश्रुतो ... द्विवस्त्रो द्विराचम्य प्राङ्मुखः ... तगा

मयमंडले कुशयवगंधाद्यर्चिते वैश्वदेवब्राह्मणपादानुपवीती सूर्याभिमुखः प्रक्षाल्य
कुशतिलगंधाद्यर्चिते मंडले पित्र्यर्थं ब्राह्मणपादान्प्राचीनावीती प्रक्षाल्य स्वयं द्विराचा
न्तो द्विराचांतानुपवेशयेत्॥ तत्र वैश्वदेवार्थं ब्राह्मणौ प्राङ्मुखौ द्वौ भेदपक्षः पादाहयः सं
बंधयेर्जिले श्लेष्मावतुः पाद्युदपीठे नेपालकंबले वा तार्णासने वा उपविश्यस्त्रीन् विप्रा
नुदङ्मुखान्पित्र्यर्थमुपवेशयेत्॥ मातामहादीनां चैवं॥ तंत्रं वा वैश्वदेवं स्यात्॥ ततो
ग्रहाद्बहिः कुशान्तिलान्विकीर्य ब्राह्मणसमीपे कुशेषु प्राङ्मुख उपविश्य इष्टदेवं ग
यां देवान्वस्वादीन्पितॄन्जनार्दनं च नत्वा कुतुपादिकाले समंत्रकामंत्रकेश्रा
द्धायामद्वयं कृत्वा प्राचीनावीती पितॄणां पितामहानां मातुः प्रपितामहानां सपत्नीकानाम
मुकगोत्राणां वसुरुद्रादित्यरूपाणां अस्मिन्काले सदैवं पार्वणश्राद्धं युष्मदनुज्ञया क
रिष्य इति संकल्प्य अपहता असुरा इति सर्वतस्तिलान्प्रकीर्य तदारतामिस्वाचाप्रोक्षेत्॥

देवं सर्वमुपवीती प्रदक्षिणं युग्मत्वं पूर्ववदुदगग्रमुदगपवर्गमुदङ्मुखः कुर्यात्॥ ततो वैश्व
देवार्थं विप्रहस्ते अपो दत्त्वा युग्मान्कुशान्द्विजानासनेष्वासनं दक्षिणतो विश्वेषां देवानामिदं
मासनमिति एवं सहितं क्षिपेत्॥ आसनेष्वासनं दद्यात् द्विजहस्ते तु कौत्र विस्तृ॥ ततः पुन
रपो दत्त्वाभिमंत्रयेत्॥ हे वेक्षणः क्रियतामिति॥ ततः ॐ तथेति विप्रो ब्रूयात्॥ ततः प्राप्नो
तु भवानिति कर्त्ता ब्रूयात्॥ ततः प्राप्नवानिति पुनर्विप्रो ब्रूयात्॥ ॥ इति ग्रंथकासंग्रहका
र स्मृतिः॥ ॥ अक्षयासनयोः षष्ठी द्वितीयावाहने स्मृता॥ अन्नदाने चतुर्थी स्याच्छेषाः
संबुद्धयः स्मृताः॥ इति श्लोकसंग्रहकारकस्मृतिः॥ ॥ यद्वा सर्वत्र चतुर्थ्येव प्रयोज्या आवा
हनवर्जं॥ सर्वत्र पुनः पुनरपो दद्यात्॥ ततः पुरूरवार्द्रवान्विश्वान्देवान् आवाहयिष्य इ
ति पृष्ट्वा आवाहयेति तैरनुज्ञातो विश्वेदेवास आगतेत्यृचावाह्य यवान्दक्षिण
हस्तः पृष्ठ्वा आवाहयेति तैरनुज्ञातो विश्वेदेवास आगतेत्यृचावाह्य यवान्दक्षिण
पादादिमस्तकांतं समारोप्य विश्वेदेवाः शृणुतेमं हवं मे आगच्छंतु महाभागा इत्याभ्याम

स्वा०

गन्ध्याद्युपस्थाय तत्समीपे भूमौ यवान्विकीर्य कुशानास्तीर्य तत्र सुवर्णादितैजसाऽश्ममयम

न्मयपलाशपत्रादिष्वेकद्रव्यपात्रद्वये द्विकुशं कृत्वा तिर्हितेषु शं नो देवीरभिष्टय इत्यृचापोभि

षिच्य यवोसि धान्यराजस्त्वेत्यृचा यवान्क्षिप्त्वा गंधपुष्पादि क्षिप्त्वा स्वाहार्घ्या इति निवेद्य वि

प्रहस्ते कुर्वेग्रागं क्षिप्त्वा या दिव्या आपः पयसेत्यृचा विश्वेदेवा इदं वो अर्घ्यमिति तद्धस्ते अ

र्घ्यं दद्यात्॥ ततो विश्वेदेवा अयं वो गंध इत्यादिप्रयोगे गंधादि दद्यात्॥ श्रीखंडकुंकुमकर्पू

रागरुपद्मकादि गंधादिलेपनं कर्त्ता कुर्यात्॥ गंधं दत्वा कर्त्ता दर्भपाणिनानुलिंपेत्॥ न सद

र्भेण हस्तेन लिंपेत्॥ आत्मपाण्यमनुलिंपेदेवं न्यायं नियमः॥ ततो जातिमल्लिकाश्वेतयूथि

काचंपककुंकुमजात्यादीनि पुष्पाणि मरुबकादिसुगंधिपत्राणि च देयानि॥ उग्रगंधान्य

गंधीनि वृक्षरजस्कान्यशुक्लान्यसुगंधिकंटकिजानि वा॥ अर्कधत्तूरशिरीषकांचनारतु

लसीबिल्वादीनि वर्ज्यानि॥ ततो घृतमधुसंयुक्तं गुग्गुलं श्रीखंडागुरुसरलादिसंभवो

२॥

सा०र०

॥४३॥

समस्तो व्या धूपोदेय: ॥ घ्राणं गंह स्त या नाहं चधूपं वर्जयेत् ॥ ततो घृते न तिलतैलेन वा अनि
षिद्धेन वान्येन दीपं दद्यात् ॥ चसामे दोद्भवं वर्जयेत् ॥ ततः शुक्लं शुद्धमहतं सदशं वस्त्रमा
च्छादनं दद्यात् ॥ तन्मूल्यं वा ॥ अलाभे उत्तरीयं यज्ञोपवीतं वा कार्पासाद् द्यात् ॥ ततोऽन्नं सं
पूर्णमस्त्विति ब्रूयात् ॥ अस्त्विति ते ब्रूयुः ॥ संकल्पसिद्धिरस्त्विति भवंतो ब्रुवंत्विति केतब्रू
यात् ॥ अस्तु संकल्पसिद्धिरिति विप्राः प्रति ब्रूयुः ॥ आसनादिषु सर्वत्र स्यासनमेस्त्वध्यसुगं
धस्त्रपुष्पाणि स्रुमाल्यं स्रुधूप: स्रुदीप: स्रुज्योति: स्वाच्छादनमिति विप्राः प्रतिब्रूयुरिति सं
ग्रहकारस्मृति: ॥ ॥अथ पित्र्यं ॥ ॥ प्राचीनावीत्यप्रदक्षिणमयुग्मन्वपूर्वं दक्षिणाग्रं दक्षि
णापवर्गं दक्षिणामुख: कुर्यात् ॥ पित्र्युपचारे थेकवचनं बहुवचनं वा प्रयोज्यं जघन्ये थेक
वचनमेव ॥ पित्र्यविप्रहस्ते थेपोदत्वा त्वयुग्मकुशान् द्विगुणान् सतिलान्नासने थासनं पित्र्ये

स्मृ॰स॰

णामिदमासनं पितामहानामिदं प्रपितामहानामिदमिति वा पितुरिदं पितामहस्येदं प्रपिता
महस्येदमासनमिति वा पितृपितामहाय प्रपितामहायेदमासनमिति वा ॥ पितृभ्यः पिताम
हेभ्यः प्रपितामहेभ्य इदमासनमिति वा ॥ आसनं वामभागे दद्यात् ॥ मातामहेष्वेवं ॥ ततः
श्राद्धक्षणः क्रियतामित्यादिभिर्निमंत्र्य ततः पितॄन् पितामहान् प्रपितामहान् आवाहयिष्य
इति तिलहस्तो ब्राह्मणान् पृष्ट्वा पितरं पितामहं प्रपितामहं आवाहयिष्य इति वा स्पृष्ट्वा आवा
हयेति विप्रैरनुज्ञातः ॥ उशंतस्त्वेत्यृचा ॥ यावाहयेत् तिलान्मस्तकादिदक्षिणपादांतमारोप
आयंतु नः पितर इत्युपतिष्ठेत ॥ मातामहेष्वेवं कृत्वा पितृसमीपे भूमौ तिलान्विकीर्य कु
शेषु राजतादिपात्रत्रये त्रिकुशाकूर्चान्निहिते शन्नोदेवीरभिष्टय इत्यपो निषिच्य ति
लोसि सोमदेवत्य इति तिलान् क्षिप्त्वा गंधपुष्पादि क्षिप्त्वा स्वधार्घ्या इति निवेद्य विप्रहस्ते कु
शं क्षिप्त्वा या दिव्या प इत्यृचा पितरिदं तेऽर्घ्यं पितामहेदं तेऽर्घ्यं प्रपितामहेदं तेऽर्घ्यं

सा॰र॰

॥४४॥

इति क्रमेण अर्घ्यं दत्वा चतुर्थ्यां वा दत्वा लब्धस्तनिःसृतार्घ्योदकं पितृपात्रे प्रसिच्य दक्षिणाग्रेषु
कुशेषु पितृस्थानमसीति स पवित्रं न्युब्जं कुर्यात्॥ न्युब्जे कृते वा तस्योपर्यर्घ्यपात्रपवित्राणि
क्षिप्त्वा तिलपुष्पादि क्षिपेत्॥ तत्पात्रं मासमात्रेण चालयेत्॥ मातामहेषु चैवं॥ अलाभे एकं
पात्रं त्रिपवित्रं कार्यं॥ ततो नत्वा यंतु न स्तिलोसि मंत्राणामूहो न कार्यः॥ दैवे पित्र्ये च पात्र
निवेदनांते आवाहनमिति केचित्॥ ततः पितरयं ते गंधः पितरः अयं वो गंध इत्यादि प्र
योगेन गंधमाल्यपुष्पाणि दद्यात्॥ ललाटे पुंड्राकारं स्कंधे मालां च वर्जयेत्॥ धूपं दीपं च
ज्योतिराच्छादनानि च दद्यात्॥ दैवे पित्र्ये च आसनक्षणावाहनार्घ्याक्षतगंधपुष्पधूप
दीपाच्छादनानां पदार्थानुसमये सलिसंतति र्वृद्धिश्च कांडानुसमयविधिसिद्धिरेव॥
ततः संकल्पसिद्ध्यं संकुर्यात्॥ अथ गोमयेन चतुरस्रमंडलं कृत्वोपरि यंत्रं च कृत्वा दै
वे सौवर्णादीनि पात्राणि पित्र्ये रौप्यादीनि पात्राणि स्वपरिशेष्याच्युतपृष्ठान्यन्यानि पात्राणि
मृन्मयपर्णतानि मंडले निधाय तत्रोपनिषिच्य हस्तेन निर्मृज्य प्रक्षाल्य पुनर्जलेन

मृत्यं०

वक्षालयेत् ॥ ६ ॥ अथाग्नौ पाणौ वा होमः ॥ ॥ निरग्नेः पाणावेव ॥ तत्र घृताक्तमन्नं घृतं चा

दायाग्नौ करिष्य इति पृष्ट्वा कुरुष्वेत्यभ्यनुज्ञातः ॥ औपासनाग्निं उपवीती परिसमूह्य प

र्युक्ष्य प्राचीनावीती तूष्णीमिध्ममग्नावाधाय मेक्षणेन स्रुवेणोपस्तीर्यावदानद्वयं क्षिप्त्वा पं

चावत्ती चेत्त्रयं क्षिप्त्वा पुनः स्रुवेणाभिघार्यादाय मेक्षणेन सोमाय पितृमते स्वधा नमः ॥ अ

ग्नये कव्यवाहनाय स्वधा नमः ॥ इत्याभ्यां मंत्राभ्यां आहुतिद्वयं हुत्वा मेक्षणमग्नावनुप्र

हृत्य हुतशेषं पित्र्यपात्रेषु निक्षिपेत् ॥ न दैवपात्रेषु ॥ आहिताग्निः सर्वाधानी दक्षिणाग्नौ

जुहुयात् ॥ पित्र्यविप्रपाणौ वा ॥ अन्यभावे पाणौ होमः पाणिहोमे दर्भमेक्षणे विप्राभ्यनु

ज्ञानसंति ॥ पित्र्यविप्रपाणिं परिसमूह्य पर्युक्ष्य वामेनोपस्तीर्य दक्षिणेनावदाय प्रत्यभि

घार्य हुत्वा परिसमूहन पर्युक्षणे स्तः ॥ मातामहादिषु चैवं ॥ तत्र साग्निना पाणिहुतं त

दैव प्राश्याचम्योपविशेत् ॥ अथवा भाजने क्षिप्त्वाचम्योपविशेत् ॥ अन्याभावे हुतं

॥ ४५ ॥

पूर्ववन्नाश्नीयात्॥ भोजनकाल एवाश्नीयात्॥ त्यक्तो निकृतं नैवाश्नीयात्॥ प्रेत
श्राद्धे घृतदानोक्षिपेदित्याहुः॥ ततो देवपूर्वमुपस्तीर्य स्वयं पत्नी वान्यो वा नियुक्तः॥
अन्नान्स्तहविष्यान्नपूर्वकं परिवेषणं कुर्युः॥ नापवित्रेणाहस्तेन नैकहस्तेन नायसेन न
हस्तेन परिवेषणं कुर्युः॥ तृणपर्णाद्यंतर्धानेन दोषः॥ ॥ अथ हविष्याणि॥ ॥ व्रीहि
शालियवगोधूमप्रियंगुमुद्गमाषश्यामाकनीवाराद्याः॥ कालशाकं महाशाकं द्रोण
शाकं मेध्यमांसं महाशल्कादिरुक्षकदलीपनसाम्लातकाम्रखर्जूरराजजंबुगोस्त
नीद्राक्षाप्रियालामलकनारिकेलत्रपुसोर्वारुकचिंचिटपालेयगुडफलमधुफल
मधुरैलाम्रफलबदर्यादि॥ एलांशुंठीवार्द्रकहिंगमरीचपिप्पलीमधुकगुडशर्क
रा खंड कर्पूर सैंधव मानस लवणानि॥ मधु गव्य पयो दधि घृतानि इत्यादीनि ह

स्मृ०स्य०

शस्तानि॥ एतेसंभवे मोदनं सूपपायसापूपभक्ष्यपानादिकं च बहु परिवेष्यं॥ हिंगुशुं
ठीपिप्पलीमरीचकानि द्रव्यसंस्कारार्थानि श्राद्धे स्युः॥ नप्रत्यक्षलवणं भक्ष्याणि॥ अथ हवि
ष्याणि॥ कोद्रवं वरकचणकमसूरकुलित्थपुलकराजमाषरक्तविदलमाषाः सत्वचश्रा
ढक्यः कृष्णयावनालाः कृष्णधान्यानि मुद्गमाषतिलव्यतिरिक्तानि वर्ज्यानि॥ उपोद
की तुलसी कृष्णातसी शिग्रु महासर्षपपत्रशाक कृष्णसर्षप पूतिगंधशाकानि कूष्मां
डपटोलकालशाकविशेषतो वार्ताकवृहतीद्वयं लाबुगांधारिकामर्कटिकापिंडमूल
बिल्वफलकांचनालकपित्थकरंजकेरचंदकलिंगवंशांकुरं पित्रर्थे त्याज्या याचितं
त्यक्ताहृतं सर्वं कलंजीरकेशानपुष्पाविडलवणादि॥ आरण्यमृगमहिषीचमरीपयो
दधिघृतमित्यादीन्यप्रशस्तानि वर्ज्यानि॥ प्रशस्तालाभे त्वनिषिद्धं ग्राह्यं॥ अथ पात्रे
परिवेष्य देयपात्रे सकुशयवानुक्षिप्य पात्रं पर्युक्ष्य पृथिवीते पात्रमित्यभिमंत्र्य अंतो

सार०

॥५६॥

॥५६॥

देवा इत्यस्य चामुत्स्का विष्णोर्हव्यं रक्षस्वेति अन्नं द्विजांगुष्ठं निवेश्य पुरूरवाद्रवा विश्वे
देवा देवता इदमन्नं हविर्ब्राह्मणास्त्वाहवनीयार्थे इयं भूर्गया अयं ब्राह्मणो गदाधरः वि
श्वेभ्यो देवेभ्यः इदमन्नं परिविष्टं परिवेक्ष्यमाणं चातृप्तेर्नमम इति यवोदकेनत्यस्का
ये देवा सइत्यस्य चोपतिष्ठते॥ ॥अथ पितृपात्रे तिलान्संकुशान्क्षिप्त्वा पात्रं पर्युक्ष्य पृ
थिवीते पात्रमित्यभिमंत्र्य इदं विष्णुरित्यस्य विष्णो कव्यं रक्षस्वेत्यंगुष्ठं निवेश्य पितादे
वता पितरो देवता इदमन्नं कव्यमित्यस्काः पित्रे वसुरूपाय पितृभ्यो वसुरूपेभ्य इति
वोत्स्का इदमन्नं परिविष्टं परिवेक्ष्यमाणं चातृप्तेर्नममेति पितामहाय रुद्ररूपाय प्रपिता
महाय आदित्यरूपाय पितामहेभ्यो रुद्ररूपेभ्यः प्रपितामहेभ्यः आदित्यरूपेभ्य इति
चाति लोदकेनत्यस्का ये चेह पितर इत्यस्य चोपतिष्ठते॥ नात्र व्यूहः कार्यः॥ मातामहेषु
चैवं॥ ॐ निधिरस्ति चेतं देयवेदार्थं दत्वा स्वेष्टदेवता रूपाय विष्णुरूपाय शिवरूपाय स्व

स्वस्थ०

र्यरूपायेत्यन्नंत्यक्त्वा येदेवासइत्यस्थाय देवताभ्यः पितृभ्यश्च सम्प्रयाधादत्त्वाऽलेषुद्र

त्यादीनत्र जह्वा पोशानं दत्त्वा सप्रणवगायत्रीमधुमतीरुक्त्वा मधुवितित्रिरुक्त्वा ॐ तत्स

त् यथासुखंजुषस्वमितिब्रूयात् ॥ अथ ब्राह्मणाः प्राणाहुतिपूर्वं मौनिनो भूतलात्पा

त्रमनुद्धरंतो मुखशब्दपाण्यादिवापूलं वर्जयंतो भुंजीरन् ॥ यद्वा मे दाणि पाणिकाष्ठपिं

डिकोस्थवा गाणाकुत्याः पूर्वकं ऊर्ध्वं वा पात्रं निधाय भुंजीरन् ॥ उच्छिष्टपादसेकौरजाः पाद

स्पर्शक्रमणादिभयात्सर्वथा न यं कत्रिकादित्रिपाद्यादिषु निदध्युः न बलिं कुर्युः ततो

॥ ५० ॥

मोक्तौ कर्त्तापित्रे च यज्ञो वते हविस्तदद्यं ॥ आहत्य रक्षोघ्नपित्र्यपवित्रमंत्रान्स्वणवादि

पूर्वानुपवीती श्रावयित्वा प्रणवगायत्रीं जपेत् ॥ ततः सर्ववर्णिकमन्नाद्यमादाय प्रत्रण

व मधुक्त्वा प्राचीनावीती वा मधुवाता ऋत वंश अक्षन्नमीमदंतेति ऋचं श्रावयेत् तत्वान्तत्सा

स्पेति पृच्छन् तास्मेतिते: ब्रत्येक्ते दैवपित्र्यब्राह्मणसन्निधौ पुरतउच्छिष्टसमीपे द

सा०

॥ ५० ॥

क्षिणाग्रेषु दर्भेषु तिलोदकं पितृतीर्थेन प्रसिच्य ये अग्निदग्धा ये अनग्निदग्धा जीवा इ
त्यनेन सतिलमन्नं क्षिप्त्वा तिलोदकं प्रसिच्य वामेन ॥ ततो गंडूषं दत्त्वा सर्वविर्णमन्नाद्यं
पितृणामर्थमधुत्स्य अन्नेन शेषं किं क्रियतामिति पृष्ट्वा इष्टैः सह भोज्यतामित्यभ्यनुज्ञाते ते गृ
हीतेवा ॥ अग्निहोमे अग्निसमीपे पाणिहोमे विप्रसमीपे पिंडं पितृयज्ञवत् पिंडान्निदध्या
त् ॥ तत्रैव मंत्रयोगः ॥ गोमयेनोपलिप्ते भूप्रदेशे स्फ्येन खादिरेण [illegible] दर्भेण वा अप
हता असुरा इत्यादिना लेखाद्वयं प्रागपवर्गमुल्लिख्याभ्युक्ष्य तत्र बर्हिरास्तीर्य पश्चिम
लेखायां पिंडदेशेषु शुंधंतां पितर इत्यादिभिस्त्रिभिर्मंत्रैस्तिलोदकं पितृतीर्थेन निनी
य पूर्वरेखायां शुंधंतां मातामहा इत्यादिभिर्निनीय एतत्ते देववदत्ते शर्मन्ये च त्वां मन्त्रेन्वि
स्थेरेको एतत्पिंडरूपमन्नं पित्रे नमेमे इत्यादिभिस्तिलमिश्रान्पराचीनपाणिः पिंडान्निधा
यत्र अत्र पितर इत्यादिना षट् पिंडान्सकृदेवानुमंत्र्य सव्यावृत्तो दुर्गावृत्त्य यथारात्रेः

स्मृत्य०

नुष्वस्नोसि त्वाऽभिपर्याहृत्यामीमदंत इत्यपितरः इत्यादिनानुमंत्र्य घ्रसेत्॥ ततउपवीतीपिं
डशेषमवघ्राय हस्तं प्रक्षाल्याचम्य प्राचीनावीती पिंडेषु पूर्ववदुदकं निनीय देवदत्तशर्मन्नंं
क्ष्वेति पिंडेषु तैलं दत्वा देवदत्तशर्मन्नंक्ष्वेति अंजनं दत्वा एतद्वः पितरः इत्यादिना वासो दशां
ऊर्णास्तुकां वा दद्यात् नोापूर्वाग्नेद्वर्षादूर्ध्वं स्वहस्तरोम वा दद्यात्॥ ततो नैव मंत्रेण ततः पिंडेभ्यो
क्षतगंधपुष्पधूपदीपनैवेद्यतांबूलं दत्वा अथ पिंडान् पितृरूपानुपतिष्ठेत नमो वः पित
र इत्यादिना मनोन्वाहुवामहइति चेतसृभिः॥ ॥अथ पिंडान्युगपत्प्रवाहयेत्॥ ॥परेत
नः पितर इत्यृचा॥ अग्ने तमद्येत्यृचा दक्षिणाग्निं प्रतिगच्छेत्॥ यदंतरिक्षमित्यृचा गार्हपत्यं
प्रतिगच्छेत्॥ औपासने तु अग्ने तमद्येति गत्वा यदंतरिक्षमिति जपेत्॥ अत्र गार्हपत्य
पदस्य लोपः॥ पाणिहोमे अग्ने तमद्यादिकं नास्त्येव ततः पिंडेभ्योक्षतपुष्पधूपदीपवस्त्र
तांबूलादि दत्वा नत्वा वीरं मे दत्त पितर इति मध्यमं पिंडं आदाय आधत्तेति पत्नीं प्राशयेत्॥

सार०

॥४८॥

॥४८॥

पुत्रापुरारोग्यैश्वर्यार्थं पिंडाः सकृद्गोजविप्रेभ्यो दद्यादग्नौ जले वा क्षिपेत्॥ अर्घ्यानिनयनाद
न्यत्र पितृशब्दस्योहो न कार्यः॥ एवं स्वशाखोक्तविधिना वा पिंडान्निधायाचम्याचमनं दद्या
त्॥ ततो विप्रहस्ते अपो दत्वा दर्भान् जलं यवांस्तिलांश्चाक्रमान्निक्षिप्य तान्निरस्य पुनः सा
क्षतपुष्पान् क्षिप्त्वा गोत्रनाम्नाभिवाद्य गोत्रं वर्द्धतामिति याचित्वा स्वस्ति वर्धतां गोत्रमिति
प्रत्युक्ते प्रक्षिप्याग्निशेषं गृहीत्वा पात्राणि चालयित्वा चामेत्॥ अनुपनीतस्त्रीषु न चालयेत्॥
ततो विश्वेभ्यो देवेभ्यः पितृभ्यश्च स्वस्तीति ब्रूतेत्युक्तास्तैः ॐ स्वस्तीति प्रत्युक्ते ततो विश्वे
षां देवानां पितॄणां चाक्षय्यमस्त्वित्युक्त्वा अस्त्वक्षय्यमिति प्रत्युक्ते भूहिरण्यरजतादि
शक्त्या दक्षिणां दद्यात्॥ ततो दक्षिणाः पान्तु बहु देयं चास्त्वित्युक्ते तथैव प्रत्यूचुः स्व
धां वाचयिष्य इत्युक्ते वाच्यतामित्यनुज्ञातः पितृभ्यः स्वधोच्यतामित्युक्त्वा अस्तु स्वधेति
प्रत्युक्ते भूमौ जलं सिंचेत्॥ स्वधा संपद्यतामित्युक्ते संपद्यतां स्वधेति प्रत्यूचुः॥ [illegible]

अन्य०

सा२०

श्वेदेवाः प्रीयंतामित्युक्ते ॐ प्रीयंतां विश्वेदेवा इति प्रत्यूचुः ॥ पितरश्च प्रीयंतामित्युक्ते प्री
यंतां पितर इति प्रत्यूचुः ॥ ततो न्युब्जं पात्रमुत्तानं कृत्वा पवित्राणि विसृज्य विप्रहस्ते अक्ष
तपुष्पाणि क्षिप्त्वा वाजे वाजे वत वाजिन इत्युक्त्वा उत्तिष्ठत पितर इति दर्भेण विप्रान् पि
तृपूर्वं विसर्जयेत् ॥ ततः पादप्रक्षालनदेशे आमावाजस्येति प्रदक्षिणीकृत्य दक्षिणाभिमु
खो दातारो नोऽभिवर्धंतां ॥ अन्नं च नो बहु भवेदिति च वरेषु याचितेषु तेष्वेताभ्यां श्लोका
भ्यां पुष्पदाख्याले शब्देन वा तथैवास्त्विति वा प्रत्युक्ते आशिषो गृहीत्वा प्रणिपत्य अ
द्य मे सफलं जन्मेति प्रसाद्य सवृंदपर्णमिश्रितलिश्चोवीयत्वा क्षम्यतामित्युक्त्वा निवेश
नांतमनुव्रज्य आस्यतामित्युक्त्वा प्रदक्षिणीकृत्यागत्य पाकांतरे पाथाश्राद्धशेषेण वा
वैश्वदेवादिकं कृत्वा इष्टैः सह श्राद्धशेषं पूर्ववत् भुंजीत ॥ निमंत्रणादि तत्तद् रात्रौ

॥४२॥

॥४६॥

च ब्रह्मचारी स्यात्॥ भोक्ता तु पुनर्भोजनाध्वगमनाध्ययनाध्यापनमैथुनदा
नप्रतिग्रहहोमादीन् वर्जयेत्॥ पार्वणश्राद्धं सर्वसंग्रहकारमतात् लिखितं॥ अनू
पनीतस्त्रीशूद्रा [illegible] श्राद्धे मलिजा कारयेयुः॥ स्वयं वा अमंत्रकं नामगोत्राभ्यां
कुर्युः॥ देवेभ्यो नमः पितृभ्यः स्वधा नमः इति मंत्राभ्यां वा॥ पितरो यत्र पूज्यंते त
त्र मातामहा अपि॥ अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत्॥ एवं काम्यश्राद्धे त
त्र धुरिरोचनौ विश्वेदेवौ॥ वृद्धिश्राद्धे रुचिश्राद्धे च तद्वत्॥ नैतके तु दक्षौ वि
श्वेदेवौ॥ ॥ अथ वृद्धिश्राद्धं॥ ॥ तत्र सत्यवसू विश्वेदेवा विश्वेदेवार्थं॥
मात्राद्यर्थं पित्राद्यर्थं सपत्नीकमातामहाद्यर्थं च द्वौ द्वौ विप्रौ युग्मा वा आह्निकोक्तो
यो ऽन्यः अमूलादर्भाः यज्ञोपवीती प्राङ्मुखेभ्यः उदङ्मुखो दद्यात्॥ उदङ्मुखे

स्मृत्य॰

भ्यो या ग्रास्तु स्वं॥ सर्वयोनेद क्षिणामुखेभ्यो दद्यात्॥ तिलार्थे यवाः॥ नांदीदैवेक्ष

णः क्रियतां नांदीश्राद्धे क्षणः क्रियतां॥ ॐ तथा प्राप्नुतां भवंतौ प्राप्नवावेत्यादि॥ क्ष

णे पित्र्ये पिंडे कूर्चे पवित्रके पित्र्ये नांदीमुख पूर्वं त्वेंयु प्रत्वं यपथोसि सोम देवत्यद्

लिपवावापः॥ स्वधा वास्थाने पुष्प्याः स्वधा नमः स्थाने स्वाहा नमः शब्दः॥ स्वाहार्घ्ये

दत्त्वार्घ्यं निवेदने॥ नांदीमुखाः पितरः प्रीयंतामिति वा॥ द्विद्विर्गंधादि देयं॥ प्रदक्षि

णमुपचाराः॥ उदगपवर्गत्वं॥ अग्नौ पाणौ वा होमः॥ अग्नये कव्यवाहनाय स्वाहा

सोमाय पितृमते स्वाहेति क्रमेण होमः॥ होमे वन्हेः स्थाने प्रक्षेपः॥ राक्षोघ्नं दत्वेति

मंत्रं घ्रावयेत्॥ मधुवाता इत्यत्र स्थाने उपास्मै गायतानर इति पंचवर्ग सूक्तं श्रावये

त्॥ अन्यमधुमंत्रान्वा॥ अक्षन्नमीमदंतेत्यंते श्रावयेत्॥ आचांतेषु भुक्त्वा सा

सारं॰

॥५०॥

यान् गोमयेनोपलिप्य प्रागग्रान्दर्भान्संस्तीर्य देवपूर्ववदाज्यदधिबदरफलमिश्र
मुक्तशेषेणैकैकस्य द्वौ द्वौ पिंडौ दद्यात्॥ आज्ये दधिप्रक्षेपो देयं पूर्ववदाज्यं॥ शेषं पा
र्वणवत्॥ अत्र पिंडपात्रस्य लोपो वा पिंडादिकस्य लेपो वा॥ ॥ अथैकोद्दिष्टं॥ ॥ त
त्र सर्वश्राद्धानि त्रिविधानि॥ ॥ नवश्राद्धानि नवमिश्राणि पुराणानीति॥ तत्र प्रथमाह
द्दशाहोत्तं विहितानि नवश्राद्धानि॥ एकादशादिन्यूनाब्दान्तं विहितानि नवमिश्रा
णि ततः पुरः पुराणानीत्युक्तानि॥ तेच सर्वैकोद्दिष्टेषु दैवं नास्ति एकोद्देश्यः ब्राह्म
णश्चैकः अश्रुस्नाया विप्राः एकपात्रं पवित्रं च पाणौ होमो नास्ति वा॥ नुक्तशेषेणैकः
पिंडो देयः॥ पुराणैकोद्दिष्टे पार्वणैकदेशवत् सर्वं दैवहीनं समंत्रकमेव पाणौ
मंत्राभ्यां होमः॥ नवमिश्रेषु दिवानि मंत्रणादि न स्वाध्यायः। पितृशब्दस्थाने मः
न्त्राद्यंतो मंत्राणां लोपः तिलावापादि सर्वं तूष्णीकार्यम्॥ तूष्णीमर्घ्यन्तिवेद्या

स्मृ.स.

सार.

नावाह्यमंत्रांते नाम्ना प्रेतोद्देशेनार्घ्यं दद्यात् गंधादि देयं ॥ पाणौ प्रेताय स्वाहेत्येकाहु
तिर्नवा ॥ धूपदीपं स्वधान्ते दद्यात् पितृशब्दं पिंडमनुज्ञपमं मिश्राचरणं चैव वर्जयेत् ॥ अक्षय्य
स्थाने उपतिष्ठतामिति वदेत् ॥ प्रतिवचनं च न दद्यात् ॥ अभिरम्यतामिति विसर्जयेत् ॥ अ
भिरम्यतास्मेति प्रत्युक्तिः ॥ नवमिश्रेषु सर्वममंत्रकमित्येके ॥ नवश्राद्धेषु सर्वममं
त्रकमेव कार्यं ॥ नामप्रेतशब्दं च न लोपयेत् ॥ सद्यः श्राद्धे निमंत्रणं ॥ धूपदीपं श्राद्धशेषभो
जनं वर्जयेत् ॥ नवश्राद्धं कृत्वा स्नायात् ॥ अन्यत् सर्वं पार्वणवत् ॥ नवश्राद्धान्येकोद

॥५९॥

ष्टक्रिया कार्याणि ॥ तत्राद्यं महैकोद्दिष्टं तत्रैव बहु दक्षिणा प्रेतवस्त्राभरणयानशय्यास

॥५९॥

नभोजनपादुकोपानच्छत्रादिकं देयं ॥ रुद्रगणप्रेतोद्देशपक्षे नवश्राद्धवत् ॥ रुद्रो
द्देशपक्षे तु यज्ञोपवीती विप्रान्समभ्यर्च्य भोजयेत् ॥ रुद्ररूपप्रेतोद्देशेन श्राद्धं स
दकुंभं सतिलं सर्वत्र दक्षिणा देया ॥ ॥ प्रेतश्राद्धे विशेषेण ॥ ॥ अथ सपिंडीकरणं ॥

तत्र मंडलत्रयं कुर्यात्॥ देवे द्वौ विप्रौ प्रेतस्थाने त्वेकः तत्पित्रादिषु त्रयः अशक्तौ देवे प्रेते
पित्र्ये चैकैको विप्रः कामकाली विश्वेदेवाः देवार्चनं पूर्ववत्॥ प्रेतार्घ्यमेकपात्रं तत्पित्राद्यर्थं
त्रीणि॥ प्रेतेन च मिश्रकोद्दिष्टवत्॥ पित्र्ये पार्वणवत्॥ पात्राणि हरयित्वा गंधादि क्षिपेत्॥
पात्राणि तत्रैवं निवेद्य प्रेतपात्रं पितृपात्रेषु संयोज्ययिष्य इति पृष्ट्वा संयोजयेत्यनुज्ञातः प्रे
तपात्रं कुशान् पितृपात्रेषु क्षिप्त्वा प्रेतपात्रादि किंचित् देवजलं सकुशं मधवशेषु ये समानाः
समनस इति द्वाभ्यां मंत्राभ्यां पितृपात्रेषु सिंचेत्॥ प्रेतपात्रावशेषेण प्रेतार्घ्यं पित्रे तत्पा
त्रार्घ्यं दत्वा छादनां तं कृत्वा पृथक् पृथक् अन्ने मुद्दिश्य प्रेताय पाणा वेकाकुर्ति जुहुया
न्नेवा॥ पित्र्ये पि अग्नौ पाणौ वा मंत्राभ्यां होमः॥ हुतशेषं पितृभ्यः पात्रेषु दद्यात्॥ तद
न्ने भोजनात्प्राक् नाश्नीयात्॥ प्रेतोद्देशेनैकं पिंडं दत्वा पित्र्ये त्रीन् पिंडान् मंत्रेणोदत्वा प्रे
तपिंडं पितृपिंडेषु संयोजयिष्य इति पृष्ट्वा संयोजयेत्यनुज्ञातः प्रेतपिंडं त्रिधा विभ

स्मृत्य॰

ज्यपूर्वमंत्राभ्यां पित्रादिपिंडेषु निदध्यात्॥ अनुमंत्रणादि सर्वं पार्वणवत्॥ सर्वैस्तंत्रैव
समापयेत्॥ श्राद्धे भोजने मिथः स्पृष्टौ तदन्नमत्यजन् भुक्त्वा गायत्र्यष्टशतं जपेत्॥ उ
च्छिष्टसिक्ते तस्य प्रक्षाल्य भुक्त्वा स्नात्वा द्विशतं जपेत्॥ उच्छिष्टभोजने सहस्रं जपेत्॥ ॥म
हेणां चैवं॥ ॥तत्र विशेषः॥ ६ ॥ अपुत्रायां मृतायां भर्ता स्वमात्रादिभिः सापिंड्यं कुर्या
त्॥ मातृपिंडदानादिकं आसुरादिविवाहोत्पन्नः॥ पुत्रिकापुत्रश्चैते पितृगोत्रेण वा
कुर्यात्॥ ब्राह्मादिविवाहोत्पन्नः पितृगोत्रेण भर्तृगोत्रेण वा कुर्यात्॥ अन्वारोहणेन
केचित्त्वारोहणैकदिनमरणे स्त्रियाः पृथक् सपिंडीकरणं न कार्यम्॥ भर्तुः कृते स्त्रि
याश्च कृतं भवति॥ दिनांतरमृतौ पुत्रस्य पितृपितामहपिंडमध्ये कुशानंतर्धाय पित्रे
केन मातुः सापिंड्यं कुर्यात्॥ सर्वत्र भर्त्रा पत्न्याः सापिंड्यमेकेनैव॥ श्वशुरेण नि
षिद्धं॥ केचित्त्रिभिरेव सह सापिंड्यमाहुः॥ आसुरादिविवाहोत्पन्नः पुत्रिकापु

सार॰

॥५२॥

॥५२॥

त्र्यब्दमातामहादिभिरेव॥ तथा च सति मातामहश्राद्धं नित्यमेव मृताहादौ॥ ब्रह्मादि
विवाहोत्पन्नः पित्रैकेनापि न स्त्रियोऽपि तामह्यादिभिर्मातामह्यादिभिर्वा सापिंड्यं
कुर्यात्॥ ब्राह्मणादिहतानां पतितानां प्रायश्चित्ते कारणे ब्रह्मचारिणामनपत्यानां च
सपिंडीकरणं नास्ति॥ तेषां सदैवैकोद्दिष्टमेव॥ व्युत्क्रममृतानां व्यवहितैः सापिंड्यं
कार्यं न वा॥ केचित्संवत्सरे सपिंडीकरणमाहुः॥ संवत्सरादर्वाक् सपिंडीकरणे सति
प्रतिदिनं प्रतिमासं वा सोदकुंभं श्राद्धं मृताहश्राद्धवत्॥ कृत्वा सपिंडीकरणमारभ्य
वा शुद्धिमारभ्य वा एकादशाहादिषु तान्येव षोडशश्राद्धानि मृताहश्राद्धवत्कृत्वा
यासंवत्सरं विमोक्षार्थं पार्वणश्राद्धं कृत्वा भोजनं च कुर्यात्॥ मृताहश्राद्धं
प्रत्यब्दमेकोद्दिष्टं पार्वणं च यथास्वाचारं कार्यं पुत्रैः॥ मरणक्षणे यन्मासे यत्पक्षे
यात्तिथिः तद्दिनं तस्य मृतस्य मृताहः पतितानां सदा स्त्रीभिः पार्वणमेव कार्यं मा(द)

स्मृ०स्य०

सार०

र्त्तेऽमलस्य प्रेतपक्षे मृतस्य च प्रत्यब्दं पार्वणमेव॥ यतीनां त्रिदंडीनां प्रेतत्वं नास्त्येव॥ एकादशेऽहनि पार्वणमेव कार्यम्॥ दंडग्रहणात्पूर्वं मृते तु स्वशाखोक्तविधिना दशाहमध्ये उदकपिंड प्रेतश्राद्धं सापिंड्यादीनि कार्याण्येव॥ शूद्राणां प्रेतश्राद्धं सर्वममंत्रकं द्वादशेऽहनि कार्यम्॥ मासे गते वा कार्यं॥ अनाहिताग्नेर्मरणाहादि प्रेतकार्यं मृताहे श्राद्धं वा॥ आहिताग्नेः प्रेतकार्यं मृताहः श्राद्धं च तद्दहनदिनादि कार्यं॥ त्रिपक्षोनं॥ तस्मात्पूर्वं मृताह एव॥ सर्वेषां मृताह एव श्राद्धं कार्यम्॥ अन्वष्टकासु गयायां च पितॄणां मातॄणां च श्राद्धं पृथक् कुर्यात्॥ न सपत्नीकं॥ मातामहानां सपत्नीकमेव॥ तत्र दैवं तंत्रमेव॥ पितृपूर्वत्वमेव॥ अनेकमातरण्येकत्रभोज्याः॥ अन्यत्पूर्ववत्॥ वृद्धौ न सपत्नीकं॥ स्त्रीपूर्वत्वं वा॥ दैवतंत्रत्वं चोक्तमेव॥ मृताहश्राद्धे पितृमृताहे पितॄणामेव कार्यं॥ न सपत्नीकं॥ मातृमृताहे मातॄणामेव कार्यं॥ पि

॥५३॥

॥५३॥

तॄणां तत्र श्राद्धप्राप्तिरेव नास्ति ॥ पित्रोर्मृताहैक्ये पितृमातृश्राद्धं पृथगेव न सपत्नीकं ॥
तत्र पूर्वं पितृश्राद्धं समाप्य ततो मातृश्राद्धं कुर्यात् ॥ पित्रोर्मृताहैक्ये सहदहने च श्रा
द्धं पृथगेव ॥ तत्र पितृश्राद्धं मातृश्राद्धं चैकेकाले एकपाकेन समापयेत् ॥ मृताहैक्य
एकचित्यारोहणे सति मातृश्राद्धं पृथगेव ॥ तत्र दैवं तंत्रमेव ॥ ततः पितरः ततो मातरः
अनेकमातरः पृथगेव क्रमेण कालपाकबर्हिः प्रयोगैक्येन ॥ भिन्नचित्यारोहणे सर्वं
पृथगेव ॥ मृताहश्राद्धस्यैकोद्दिष्टत्वेप्येष क्रमः ॥ अष्टकागयावृद्धिमृताहादन्यत्र
सपत्नीकमेव ॥ मातामहानां एतेषामपि सपत्नीकमेव ॥ मृताहवर्ज्जं तत्र पृथगेव सर्वेषां ।
पितृव्यभ्रातृऋत्विक्मातुलगुर्वाचार्याणां च तद्वत् ॥ ॥ अथ अपरपक्षमहालये
सर्वेषां पितॄणां श्राद्धं कार्यम् ॥ [illegible] ॥ तत्र मातृश्राद्धं पृथक् न तासां मातामहानां सप
त्नीकमेव ॥ गुर्वाचार्यपितृव्यमातुलश्वशुरोपाध्यायभ्रातृसखिशिष्यपोषकद्रव्य

दद्स्युत्रशिष्यर्त्विग्मादीनां तत्स्त्रीणां च श्राद्धं कार्यं ॥ अपुत्राणां विशेषेण कार्यं तत्र ए
कपाकं ॥ वैश्वदेवं तंत्रं ॥ पिंडबर्हिरेकं ॥ पक्षश्राद्धे च तथैव ॥ तस्य क्षत्र योदश्यामे
कवर्गस्य श्राद्धं न कार्यं ॥ पिंडदाने च निषिद्धं ॥ मघायोगे विशेषतो निषिद्धं पुत्रकामस्य
च ॥ पिंडबर्हिः कुशाः काशा दूर्वाः प्रशस्ताः ॥ ॥ व्रीहियवगोधूमा ग्रारे ध्रकुंडुरुमु
ज्ञेयल्वजाग्ग्र भवंति ॥ एकादश्यां त्रयोदश्यां मघायां कृत्तिकासु च ॥ पिंडदाने दूर्वा
निषिद्धाः ॥ तत्पक्षे च तु दश्यां नास्त्रहतस्यैव श्राद्धं ॥ त च्चैकोद्दिष्टमेव ॥ सर्वेषां पाप
मृतानां चैवं ॥ नत्वेदेवं पार्वणवत् ॥ नित्यश्राद्धमदैवं षट्पुरुषं च भवति ॥ तत्रान्न
देशकालनियमाः ॥ कर्तृभोक्तृनियमाश्चेन संति ॥ विप्रानुपवेश्यासने दत्वार्घ्यं हो
मपिंडवर्ज्जं संकल्पसिध्यं लंकृत्वान्नं त्यक्त्वा भुक्तोपसादयेत् ॥ ॥ विवाहमौंजीबं
धोर्ध्वं वर्षं वर्षार्द्धं कं मासं पिंडीकरणं वर्ज्जं श्राद्धेषु सपिंडाः सपिंडान्नं दद्युः शेषं स

र्वं कुर्युः पृथक् पिंडानर्पिदध्युः ॥ पितृयज्ञे यज्ञे च गयायां दक्षिणे वा सपिंडीकरण वर्ज्जं स
र्वश्राद्धेषु विस्तरेण पार्वणविधानासंभवे संकल्पविधानेन कार्यं ॥ संकल्पविधानं नाम
आवाहनार्घ्यं होमपिंड वर्ज्जं पार्वणोक्तं यथासंभवं भवति ॥ अन्नाभावे द्विजाभावे प्र
वासे पुत्रजन्मनि ॥ पत्न्यभावे ऽन्यभावे पाककर्त्र्यभावे सति पत्न्यां रजस्वलायामापु
दि तीर्थे ग्रहणसंभवे भोजननिषेधकाले मृताहे वान्यश्राद्धे च संग्रहे रात्रिसंक्रांतौ
च श्रवीरा विधुरः स्त्री शूद्राश्च सर्वदा आमश्राद्धं कुर्युः ॥ तत्राच्छादनं तत्कृत्वा आमं च
तुर्गुणं द्विगुणं समं वा सोपस्कारं त्यक्त्वा दक्षिणां दत्वा समापयेत् ॥ आमे होमपिंडौ वा न
वा ॥ स्वस्तिवाचनं नास्ति ॥ अन्नाभावादिनिमित्तेषु हेमश्राद्धं वा कार्यं ॥ विशेषतः पुत्रज
न्म अपत्नीकः प्रवासस्य नग्नितीर्थापत्सु संग्रहेषु ॥ हेमश्राद्धे आवाहनार्घ्यं गंधपा
क होम पिंडान् कुर्युर्न वा ॥ आच्छादनांते हिरण्यमष्टगुणं चतुर्गुणं द्विगुणं समं वा ॥ स
दक्षिणोस्य त्यक्त्वा एवं वा समापयेत् ॥ अन्नाभावाद्यनेकनिमित्तेषु सत्सु सांकल्पितं श्राद्धं

कार्यं॥ तत्र द्रव्ये विप्रे वा संनिहिते संनिहिते वा आमभूहेमवस्त्रधान्यादि वस्तु रोत्येया
पितृदेशेन संकल्प्यस्य केन्नू॥ मासिकानि मृताहश्च सलिसंभवे अन्नेनैव कार्याणि॥ स
पिंडीकरणं तु सर्वथा अन्नेनैव कार्यं म्॥ ॥अथ श्राद्धकालविधिः॥ ॥तत्र तावत् य
स्मिन्दिने यद्विहितं कर्म तत्तु घटिकासु तत्कर्मणः प्रारंभं समाप्तिं वा यहा॥ मृताहश्रा
द्धं च विशेषेण॥ असंभवे प्रारंभं समाप्तिं वा कुर्यात्॥ अह्नि पंचदशधा विभक्ते अष्ट
मुहूर्त्तः कुतुपः॥ कुतुपादि पंचमुहूर्तेषु श्राद्धं कार्यं॥ न सायान्हे न रात्रौ नालि
प्रातः कार्यं॥ अन्हः पंचधा विभागे त्रिमुहूर्त्तकाः प्रातः पूर्वाह्णो मध्याह्नोपराह्णः सा
यान्ह इति॥ प्रातःकाले वृद्धिनिमित्त श्राद्धं प्रशस्तं॥ पूर्वाह्णे आमश्राद्धं हेमश्राद्धं च॥
मध्याह्ने एकोद्दिष्टं॥ अपराह्णे पार्वणं॥ पिंडपितृयज्ञकरणदिने सायान्हेपि पार्वण
मनुष्ठायते॥ एवं पूर्णदिनेषु॥ ॥अथ खंडतिथिर्निरूप्यते॥ ॥अमावास्यादि दृष्टचंद्रा
सिनीवाली संज्ञा॥ नष्टचंद्रा कुहूसंज्ञा॥ अमावास्या भूतविद्धा न चेदपराह्णव्या

पिनी ग्राह्या भूतविद्धा वेलतां त्यक्त्वा अपरेद्युरपराह्ण व्यापिनी तिथिर्ग्राह्या ॥ मध्याह्न्ा
त्पुरस्तादमावास्याप्रतीतो भूतविद्धा भवति ॥ अत्यंततिथिक्षयविषये अपरेद्युरपराह्ण
मावास्याया अभावे भूतविद्धापि सिनीवाली सायान्ह व्यापिनी ग्राह्या ततो वा चीनक्षयेपि
भूतविद्धा सिनीवाली अपराह्ण व्यापिनी कुहूर्ग्राह्या ॥ यद्वा ॥ साग्निकैः सिनीवाली निर
ग्निकैः स्त्रीशूद्राश्च कुहूः ॥ अत्यंततिथिवृद्धौ भूतविद्धां सिनीवालीं त्यक्त्वा अपराह्णव्या
पिनी कुहूर्ग्राह्या ॥ ततो वा चीनतिथिवृद्धौ भूतविद्धां सिनीवालीं त्यक्त्वा मध्याह्न व्या
पिनी कुहूर्ग्राह्या ॥ द्वयोरपि मध्याह्न व्यापित्वे तिथिसाम्ये वृद्धया न्यतरा तिथिर्ग्राह्या ॥
यद्वा साग्निकैः सिनीवाली निरग्निकैः स्त्रीशूद्राश्च कुहूः ॥ यद्वा सर्वैः कुहूर्ग्राह्या दर्शादि
र्शमासयोः श्राद्धतिथिषु च वृद्धिह्रासस्वीकारः नान्यत्र भूताहेवापराह्ण व्यापिन्येव ग्रा

स्मृत्य०

तिथिर्ग्राह्या॥ अपराह्णस्वयंभुवापित्र्णां दत्तः॥ नास्तमयत्रिमुहूर्त्तव्यापिन्येव॥ तिथिर्द्वापरे च ग्राह्या॥ तिथिसाम्ये तु पूर्वापरा वा॥ तिथिक्षये त्वस्तमयत्रिमुहूर्त्तव्यापिन्येव तिथिर्ग्राह्या॥ परदिने श्राद्धकरणासंभवे सूतकादिविघ्नसंभवे च पूर्वैवास्तमयव्यापिनी ग्राह्या॥ केचित्सदा पूर्वविद्धा ग्राह्येत्याहुः॥ तत्तु बहुस्मृतिन्यायविदो न्ने च्छंति॥ पूर्वदिने श्राद्धकरणासंभवे परे वोदयव्यापिनी अयोगपर्याप्तकाला तिथि ग्राह्या॥ तत्रापि मृताहश्राद्धकृत्यासंभवेनान्येन विघ्नेन वा अनुपपत्तौ तदुपपत्त्यनंतरं कार्यं॥ सूतकादिविघ्ने वशुद्ध्यनंतरं कार्यं॥ यद्वा कृष्णैकादश्याममावास्यायां कार्यं॥ यद्वा अनंतरमासे तद्दिने कार्यं॥ एकोद्दिष्टे संज्ञाते विघ्ने सति अनंतरमासे तद्दिने कार्यं॥ तदानीमेव षोडशश्राद्धानि कार्याणि॥ अनुपपत्तिनिमित्तविघ्ने सति तदुपपत्त्यनंतरं सर्वाणि कार्याणि॥ तदुपर्यपि मासिकश्राद्धविघ्ने सति अनंतरमासि तद्दिने कार्यं॥ तदादीन्येव षोडशश्राद्धानि कार्याणि॥ श्रा

सार०

॥५६॥

॥५६॥

षित मरणे मृताहाज्ञाने मृतमासपरिज्ञाने सति ॥ तन्मासदर्शो ग्राह्यः ॥ मृतमासोऽज्ञाने मृता
हपरिज्ञाने सति मार्गशीर्षमासे वा भाद्रपदे वा माघे वा तद्दिनं ग्राह्यं ॥ मरणदिनमासौ
नविज्ञातौ चेत्प्रस्थानप्रवासदिनमासौ पूर्ववत् ग्राह्यौ प्रस्थानप्रवासादिनमासौ नज्ञातौ
चेन्मरणवार्ताश्रवणदिनमासौ पूर्ववत् ग्राह्यौ ॥ मरणदिनमासौ नविज्ञातौ चेत्पुनर्दह
नदिनमासौ पूर्ववत् ग्राह्यौ ॥ यद्वा सर्वत्रापि कृष्णपक्षस्य [illegible] ग्राह्यः ॥ शुक्लपक्षम
रणे पौर्णमासः ॥ सर्वात्मना मृताहाज्ञाने माघमासस्य दर्शो ग्राह्यः ॥ अज्ञातिष्वस्यापि सर्वा
त्मना मरणदिनमासाऽज्ञाने एवमेव ग्राह्यं ॥ युगादिमन्वादितिथिप्रभृतितिथिविशेष
विहितश्राद्धेषु तु शुक्लपक्षे उदयव्यापिनी तिथिर्ग्राह्या ॥ कृष्णपक्षे अस्तमयव्यापिनी ॥
शुक्लपक्षस्य पूर्वाह्णे कर्म प्रशस्तं ॥ कृष्णपक्षस्यापराह्णे कर्म प्रशस्तं नक्षत्रविहितश्रा
द्धेष्वपि शुक्लपक्षे उदयव्यापि नक्षत्रदिनं ग्राह्यं ॥ कृष्णपक्षे अस्तमयव्यापि नक्षत्रं ग्राह्यं ॥ ॥

अथ संक्रांतिरुच्यते ॥ ॥ संक्रांतिषु सर्वत्रोभयतः ॥ षोडश घटिकाः पुण्याः ॥ अष्टाष्ट
घटिकासु दृष्टफलं ॥ अदृष्टफलमुच्यते ॥ तत्र कर्कट संक्रमोद् दक्षिणायनं ॥ दक्षि
णायने पूर्वं त्रिंशत् घटिकाः स्नानदानश्राद्धादिषु पुण्याः ॥ तथा विष्णुपदेषु च पूर्वं षोड
श घटिकाः पुण्याः ॥ वृश्चिक कुंभ सिंह संक्रमाः विष्णुपदाः ॥ तुला मेषौ विषुव संक्रमौ
तत्र पूर्वं दश घटिकाः ॥ पश्चात् दश घटिकाः पुण्याः ॥ षडशीति मुखेषु पश्चात् षोडश
घटिकाः पुण्याः ॥ मिथुन कन्या धनु मीन संक्रमाः षडशीति मुखाः ॥ मकर संक्रम उत्त
रायणं ॥ उत्तरायणे पश्चात् चत्वारिंशत् घटिकाः पुण्याः प्राक् ॥ अर्द्धरात्राद् र्वाक् संक्र
मेषु सत्सु पूर्वदिनं पुण्यं तत्र भोगः कार्यः ॥ अर्द्धरात्रादूर्ध्वं संक्रमेषु सत्सु परदिनं पुण्यं
तत्र भोगः कार्यः ॥ अर्द्धरात्रे संक्रमणेषु सत्सु दिनद्वयं महापुण्यं तत्र भोगः कार्यः ॥ यु
द्धा ग्रहण संक्रांति विवाहोत्क्रांति वृद्धिषु रात्रावपि स्नानदानादिकं कार्यं ॥ व्यतीपातादि

॥५८॥

योगांकुतुपकालादि योगिग्राह्या ॥ विष्ट्यादिकरणे च तथैव ॥ इत्यादिसमस्त्यर्थसारेश्रा
द्धकालनिर्णयः समाप्तः ॥ ॥ अथ पर्वनिर्णय उच्यते ॥ पर्वणि संदृष्टे अन्वाधानं ॥ प्रति
पदि यागः ॥ स्वं इ पर्वणि विशेष उच्यते ॥ पौर्णमासी न्स्ननेवं ज्ञानुमतिः ॥ पूर्णचंद्रा राकेति
द्विधा ॥ अमावास्या दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूरिति द्विधा प्रधानकर्म तिथ्यष्टत्तम
तिथौ वृद्धिह्रासयोरर्द्धं पूर्वतिथौ प्रक्षिप्य कालेविज्ञेयः ॥ सूर्यस्यावर्त्तनात्पूर्वमावर्त्त
ने पार्वणप्रतिपत्संधौ सति तस्मिन्नहनि यागः ॥ आवर्त्तनादूर्ध्वं संधौ परेहनि यागः ॥
पर्वणो यश्चतुर्थांशः प्रतिपदश्चाद्यो स्त्र यो अंशाः यागः कालः प्रातः काले योगः ॥
अपराह्ने संधौ सति परेहनि प्रतिपच्चतुर्थांशोपि यागकालः ॥ नष्ट मध्याह्ने संधौ ॥ अत्रा
नेद्वधा विभागः ॥ एवं स्थिते पर्वद्वये समानं ॥ पौर्णमास्यां विशेषो वक्ष्यते ॥ आवर्त्तना
त्पूर्वं संधौ सति सद्यस्कालो नवा ॥ आवर्त्तनात्पूर्वं संगवादूर्ध्वं पर्वसंधौ तु सद्यस्का

स्मृ० सं०

लएव॥ सर्वपौर्णमासीयजनीयदिने पर्वणि वा सद्यस्कालं केचिदाहुः॥ प्रकृतौ सद्यस्का
लत्वं कदाचिदपि नास्ति विकृतावेव सीदति केचित्॥ किं च पौर्णमास्यामयं विशेषः॥ अह
स्वस्य तदीर्घपुतिथिक्षासे सति उदयसमीपे पर्व चतुर्थांशाभावेपि पूर्वाह्णे पर्वसंधि
श्चेत् भवति तच्चैव परवाह्णे संधिदिने यागबाधो नान्यत्र तत्रापरेहनि यागः॥ अमावास्या
यां तु अपराह्णादि पर्वसंधौ सति परेहनि दृष्टं चेदुपि यागः कार्यः॥ पूर्वाह्णे संधौ स
ति दर्शो नाहे यागो भूर्भुवः स्वः स्वाहेत्याज्याहुतिं हुत्वा विप्राय दद्यादानं प्रायश्चित्तं प्रा
च्यां चंद्रदृष्टौ तु दहर्यागे तैत्तिरीयाः कौष्युदितेष्टिं मनुस्वत्याज्याहुतिर्वा॥ ध्याह्न
त्याज्याहुतिर्वा॥ प्रतीच्यां चंद्रदृष्टौ अन्वाधाने सति परेह्नि नीष्टिं समाप्यान्यां त्रिह
विष्केष्टिं कार्यति अग्नि पथिकृदष्टाकपालः इंद्रो वृत्रहा एकादशकपालः॥ अग्निर्वै
श्वानरो ष्टाकपालः॥ सशरं धनुर्दक्षिणा॥ एषा वाजसनेयानां प्रकृतिरेव वा पुनः का

॥५८॥

सा० २०

॥५८॥

र्या मनस्व स्याद्या कृतिर्वा ॥ व्याहत्याद्याकुलिर्या ॥ दिनद्वये प्रातर्याग काले सत्यपि पूर्वा
ह्न संधिदिन एव प्रातर्यागः ॥ सर्वथा संधि देवयागोत्कर्षापकर्षे प्रयोजकः ॥ ए काधे
प्रयोजको तिथि वृद्धि ह्रासौ न प्रयोजकौ ॥ सप्तदशी तिथि रन्वाधाने निषिध्यते नया
गे प्रारब्धे प्रकृतौ हविर्विकृतौ द्वरपस्यः सद्यस्कालः ॥ आवर्तनात्पुरा संधौ प्रकृतिं स
माप्य विकृतिः कार्या ॥ ऊर्ध्वं संधौ विकृतिं समाप्य कृतेः प्रारंभः ॥ आग्रयण प वलिा भे
नुपुर्णपक्षे टयनक्षत्रे कार्यं ॥ कृत्तिकादि विशाखांते ॥ प्राच्यां वंड टत्रानि पिंड पित्
यज्ञ कालः ॥ इत्यादि संक्षेपतः सारे पर्वनिर्णयः ॥ ॥ एकादश्यामुपवासः कार्यः ॥
सवपुत्रवतां गृहीणां शुक्लैकादश्यामेव ॥ न कृष्णैकादश्यामेन मयाचितं न कृमे के
मन्के दानं वा ग्रक्षेया कार्यं ॥ सर्वथा न निद्रादरिको भवेत् ॥ नप्रकासाः शान्त्यैव कुर्या
न केदानं वा ग्रास्यो कार्यं ॥ सर्वथा न निद्रा रिको भवेत् ॥
तु ॥ पुत्ररहितानां गृहीणां यतिवनस्थ ब्रह्मचारि स्नानके विधवानां शुक्लैकादश्यां नि

स्म.स्य. | सार०

स्यात्व॥ यदीच्छेद्विपुलं सायुज्यं श्रियमायुः प्रजां सुखं॥ एकादश्यां न भुंजीत पक्षयोरुभयो
रपीति वैष्णवव्रतत्वेनोपवासतां कृत्वा न निषिद्धा॥ एकादश्यां श्राद्धे कृते श्राद्धशेष
माघ्रायोपवसेत्॥ आदित्यवारसंक्रांत्यादिषु एकादश्यामुपवासस्य निषेधो नास्ति॥ म
हापत्सु महोत्सवेषु आर्तेषु च अशौचे च नैत्याद्यं ह्यादशीव्रतं॥ तत्र नित्ये स्नात्वा
देवार्चनरहितमुपवासं कुर्यात्॥ काम्ये तु स्नात्वा पत्नीपतिपुत्रं भ्रातरं भगिनीमृत्विजं
अन्यं वा अर्चनादि कारयेत्॥ सूतके तु बाले दानं कुर्यात्॥ मध्ये चेत्स्यात् पत्नीवादानं
कुर्यात्॥ सपत्न्योपि परस्परं कुर्युः॥ नान्यथा॥ अन्यव्रतेषु चैवं॥ एकादश्याः पूर्वोत्तरदि
नयोरेकभक्तं चरेत्॥ कांस्यं मांसं मसूरं अतिघृतमतितैलं पुनर्भोजनं मैथुनं च पूर्वे
न्हि वर्जयेत्॥ अथ समाहित एकादश्यां प्रातः स्नात्वा संकल्पं कुर्यात्॥ एकादश्यां नि
राहारः स्थित्वाहमपरेऽहनि॥ भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युतेति संकल्प्य

॥५९॥ | ॥५९॥

दिवास्वापंमैथुनंतांबूलादिभक्षणमसरुज्ज्ञलेपानसर्वभोगानुउदक्यासूतिकापतितपाषंडी
हीनजातिसंभाषणंचवर्जयेत्॥पुष्पस्त्रीणांतुपुष्पालंकारवस्त्राणिगंधधूपानुलेपनं॥उपवा
सेनदुष्यंतिदंतधावनमंजने॥वाग्यमलोपेवैष्णवमंत्रान्जपान्॥विष्णुंसंस्मरेद्वा॥मनो
काक्रायनियमलोपेशारीरमतद्भृत्याद्वाजपेत्॥विष्णुस्तुदःसंपूज्यपुरतोजागरंनिद्रांचकु
र्यात्॥स्वीभूतेपुनःसंपूज्य॥अज्ञानतिमिरांधस्यव्रतेनानेनकेशव॥प्रसीदसुमुखोनाथ
ज्ञानदृष्टिप्रदोभवेतिनत्वोपारणंकुर्यात्॥कांस्यंमांसंक्षौद्रंलोभमसत्यंतैलंतिलपिष्टंव्यायाम
ममंजनंचपुनर्भोजनमध्वगमनमायासंदिवानिद्रांमैथुनंचवर्जयेत्॥उपवासफलंशक्तिं
वहन्त्यः एकादशीयदाशुद्धासंपूर्णाद्वादश्यांनास्तिद्वादशीवसमान्यूनाधिकावातदाएकाद
श्यामुपवासः॥यदापूर्णैकादशीद्वादश्यांचकियन्मात्राद्वादशीचत्रयोदश्यामस्तितदाद्वि
तीयेवसर्वैरुपोष्या॥यदासंपूर्णैकादशीद्वादश्यांचकिंचिन्मात्रास्तितत्रराविविशेषत्रयोद

स्मृ.स०

वो शीत दा गृहस्थैः पूर्वेद्युरुपोष्य तु तदुत्तरा यतिभिः यदा दशमीविद्धैकादशी द्वादश्यां च क्रियन्मात्रा
स्ति तत्र रात्रिशेषे त्रयोदशी तदा द्विनक्षये पि पुण्यार्द्धिती ये वोपोष्या यतिभिः ॥ न गृहस्थैः प्रजा
र्थिभिः ॥ गृहस्थैस्तु पूर्वैवोपोष्या यदा दशमीविद्धैकादशी द्वादश्यां च नास्ति द्वादशी तु त्रयोद
श्यामस्ति तदा द्वादश्येवोपोष्या यदा च दशमी २ विद्धैकादशी द्वादशी च समान्यूना वा तदा यति
व्यतिरिक्तानां दशमीविद्धैकादश्यामुपवासः ॥ यतीनां तु शुद्ध द्वादश्यामुपवासः ॥ यदा च द
शमीविद्धैकादशी रात्रिशेषे च द्वादशी त्रयोदश्यां चास्ति समान्यूना वा तदा सर्वेषां दशमीवि
द्धैकादश्यामुपवासः ॥ एकादशीव्रतं माहेश्वरमपि भवति लैंगादिपुराणे दृष्ट्या ॥ अष्टमी च तु
र्दश्यो नक्तं च कार्यं ॥ एकभक्तं वा ॥ तत्पुरुषेण संकल्पः कारणं च नाम्ना वा तदेकादश्यादिव्रतं
माहेश्वरत्वात् ॥ सौरमपि भवति सौरपुराणाद्वा ॥ नित्यं तु सर्वसमानमेव ॥ तत्राय विशेषः ष
ष्ठ्यामुपवासश्च कार्यः ॥ आदित्यवारे एकभक्तं च कार्यं ॥ सावित्र्या नाम्ना वा संकल्पः ॥ ॥ इत्या
दि स्मृत्यर्थसारे एकादशीनिर्णयः ॥ ९ ॥ ॥ अथ तिथ्यंतरनिर्णयः ॥ ॥ एकादश्यष्टमीष

॥ ६० ॥

शी पौर्णमासी चतुर्दशी ॥ अमावास्या तृतीया च तूपवासव्रतादिषु ॥ परविद्धाः पुण्याः ॥ शेषा
पूर्वविद्धाः कार्याः कृष्णपक्षेऽष्टमी चतुर्दशी च पूर्वविद्धाः प्रशस्ताः ॥ एतौ पाने वमी च तथैके
सर्वत्र व्रतदानादीनां कृष्णपक्षाच्छुक्लपक्षो विशिष्यते ॥ अपराह्णात्पूर्वाह्णो विशिष्यते ॥ तदा
संभवेन्तद यद्धि मुहूर्त्तग्राह्या ॥ उपवासे घटिकैकापि ग्राह्या ॥ अविद्धानामलाभे तु पयोदधि
घृतानि वा सकृद्देयाल्पमश्नीयाद् उपवासस्तेन भवेत् ॥ एकादशी तु पंचमुहूर्तविद्धान्युपा
ष्या ॥ तेन द्वेविद्धान्यन्यानि दिनानि तु उपवासे बुधः ॥ प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते
सदा ॥ उपवासस्थानीयं तु नक्ते तूपवासतिथौ कार्यम् ॥ तिथिनक्षत्रसंयोगविहितव्रतेषु च प्रदो
षव्यापिनी तिथिर्ग्राह्या ॥ न ह्यर्धरात्रिके तु व्रते अर्द्धरात्रादर्वाक् नक्षत्रव्यापिनी तिथिर्ग्राह्या ॥ नक्षत्रसं
योगेन याति तिथिः पुण्या तस्यां विहितव्रते सेवति तिथिर्ग्राह्या ॥ श्रवणद्वादशीव्रते उदयव्यापिनी
श्रवणद्वादशी ग्राह्या ॥ अपैकादशी द्वादशी च रात्रिशेषे त्रयोदशी ॥ द्वादश द्वादशे हन्ति त्रयोद
श्यां तु पारणं ॥ सर्वत्र तिथिनक्षत्रांते पारणं ॥ नियमाः पूर्वमेवोक्ताः ॥ संक्रांत्यां रविवारे ग्रहणे व्य

तीफाते कृष्णैकादश्यां च पारणं चोपवासं च न कुर्यात् ॥ पुत्रवान् गृहीति ॥ संक्रांत्यादिप्रयुक्तस्यायं
निषेधो नान्यप्रयुक्तस्य ॥ ॥ इत्यादि स्मृत्यर्थसारे तिथिनिर्णयः ॥ ६ ॥ ॥ अथ मलमासे कार्याका
र्यनिर्णय उच्यते ॥ ७ ॥ सूर्यसंक्रांतिरहितो मासो मलमासः ॥ तत्र मलमासे अनन्यगतिकं मरणपा
तित्योपादकं नित्यं नैमित्तिकं च कर्म कुर्यात् ॥ तत्र नित्यं स्नानसंध्योपासनाग्निकार्यपंचमहायज्ञा
तिथिपूजाग्निहोत्रोपासनहोमदर्शपूर्णमासपार्वणेष्टि पार्वणस्थालीपाकपिंडपितृयज्ञाऽमावा
स्यापार्वणश्राद्धं मासिकश्राद्धं देवार्चनं नित्यदानादिकं नित्यं मलमासेपि कार्यं अनन्यगतिकं नित्य
मनन्यगतिकं सोमयागपशुबंधाधानाग्रयणचातुर्मास्यादिकं मलमासे न कार्यं ॥ महालयाष्टकाक
र्मोपाकर्मोत्सर्जनश्रवणाकर्माश्वयुजीप्रत्यवरोहणयमयज्ञादिकं यत्कर्म ऋतुमासप्रयुक्त्या विहि
तं तच्च मलमासे न कार्यं ॥ उत्तरमासि कार्यमेव ॥ नैमित्तिकं च गर्भमासप्रयुक्त्या विहितपुंसवनान
वलोभनसीमंतजातकर्मादिकं तन्निमित्ताऽप्युदधिकं दानादिकं चंद्रसूर्यग्रहे स्नानतर्पणश्राद्धदा
नादिकं च मघात्रयोदशीश्राद्धादिकं च तीर्थस्नानजपतर्पणश्राद्धपिंडदानयवव्रीहितिलहोमं मर

धादि पकालोमासिकं दहनोदकपिंडदानाद्यं श्राद्धं नवश्राद्धं षोडशश्राद्धानि प्रेतत्वविमोक्षार्थान्यनन्या
न्यपि सपिंडीकरणादीनि नैमित्तिकान्यनन्यगतिकत्वेन मलमासे प्राप्ते कार्याणि॥ ततः संवत्सरवि
मोक्षांत मनुमासिकानि कुर्वन् मलमासे नैव कुर्यात्॥ उत्तरत्र मासे कुर्यादेव॥ संवत्सरांते सपिंडीकर
णं संवत्सरविमोक्षं च यथाकालं मासिकानि कुर्वन्नपि मलमासे नैव कुर्यात्॥ उत्तरत्र कुर्यादेव॥ म
लमासमृतानामाब्दिकं मृत्याब्दिकं च श्राद्धं मलमासे कार्यं॥ अन्येषामुत्तरमास्येव कार्यं॥ वार्धुषिके
भृत्ये वाधिकमासं न वर्जयेत्॥ अथ षट्कोरहोमाः नित्यनैमित्तिकप्रायश्चित्तार्थाः कार्याः। नित्यने
मित्तिकप्रवृत्तकाम्यार्था प्रायश्चित्तेष्टिस्थालीपाकहोमाद्याश्च मलमासेपि कार्याः। नैमित्तिक्यपि आ
तेष्टि मलमासे न कार्या। उत्तरे पर्वणि कार्या। आधानानंतरं मन्वारंभणीयेष्टिं वाग्रस्थालीपाकं च
६न मलमासे न कुर्यात्॥ काम्ययागहोमादिकं मलमासे न कार्यं॥ मलमासादर्वाक्प्रवृत्तं काम्यं कर्म म
लमासे आगते नैत्योऽस्य कार्यमेवा पुराणधान्याभावे तु निर्वाहाभावे मलमासेपि श्यामाकैराग्रयणमा
तुरः कृत्वा नवं भुक्त्वा यथाकालं व्रीह्याग्रयणं कुर्यात्॥ वसंतात्सर्वणः प्रागेव सोमयागो न कृतश्चेदिष्ट

स्मृत्य०

ष्टं पर्वैकमेव तच्च मलदूषितं चेत्तत्र तिस्त्योपि सोमयागेन कार्यः॥ तत्र लोप एव॥ पत्नी रजोदर्शने वेत्॥ ५४॥ सार०
इति स्मृत्यर्थसारे मलमासे कार्याकार्यनिर्णयः॥ ५५॥ ॥ अथ भक्ष्याभक्ष्यविधिः॥ ॥ संस्कारदुष्टं क्रिया
दुष्टं स्वभावदुष्टं चेत्यन्नं त्रिधा॥ संस्कारदुष्टं वेश्वादर्वीदरहितं क्रियादुष्टमेकपंक्तावन्यथा स्वांऽस्वभाव
दुष्टं लशुनाहिकलिंगदकवकुंभीकच्छत्ताकंबुवेन्यकंटकिकुसुंभसरच्छिग्रुकोविदारश्लेष्मातक
नालिकाक्षउदुंबरकंटकीवृंताकोनिर्दुगंधिकंदमूलफलानि च वर्जयेत्॥ पतिप्रतिनो सदा अलां
बुशिग्रुवृंताकानि जातिमात्रेणैव वर्ज्यानि॥ अन्ये पांनुष्टानि वर्ज्यानि॥ क्षीरः कपालस्त्रोत्राणि नखव
मेतिलानि च॥ यदि च्छेदूर्ध्वगमनमष्टम्यादिषु वर्जयेत्॥ सगोत्राभर्तुरन्नेकाककान्नं च स्त्रैणपाणि ॥ ६२॥
ना च धूतमेव घ्रातमवक्षुतमित्यादि आयश्चित्तविधाचपश्ठस्यं वक्ष्यते॥ ५६॥ इत्यादि स्मृत्यर्थसारे भ
क्ष्याभक्ष्यविधिः॥ ५७॥ छ॥ अथ भोजनविधिः॥ ५८॥ कृतसंकल्पः पादौ प्रक्षाल्य बहिर्दिराच
म्य प्राङ्मुख उदङ्मुखो वा यज्ञोपवीती सोत्तरवासा विभवे सति हिरण्यपाणिर्गंधाक्षतमाल्यवान्
शुचिः प्रशस्तः आपर्ण्यादिफलकश्चतुष्पात्पीठस्थ आसीनो भूमौ पादौ प्रतिष्ठाप्यांतर्जानुकरो वाग्य

॥ ६२॥

तस्माच्चिन्नश्चतुरस्रगोमयमंडले सपर्यंते विप्रो दीपसन्निधौ भुंजीत॥ त्रिकोणमंडले नृपः। वर्तुले वैश्यः।
श्च भुंजीत शूद्रो भुंजीत तत्र मंडले पालिकायां त्रिकादौ शुद्धपात्रं निधाय प्रक्षाल्य पंचव्यंजनावशिष्टं पूर्वं तु
संस्कृतं हितं मितं घृताद्युपस्कृत्यमाहृत्य मायादि दत्तं मिथ्याभ्यागतपुत्रप्रदत्यादिपरिवेषणं कांते भुं
जीत॥ तदन्नमकुत्सयन्नं ब्रह्मग्रंथिरहितपवित्रदक्षिणपाणि गायत्र्याभ्युक्ष्यान्नं॥ ॐ भूरित्यादि
दक्षिणप्रणवमंत्रेणाभिमंत्र्य॥ यमाय नमः। चित्रगुप्ताय नमः॥ सर्वेभ्यो भूतेभ्यो नम इति बलिं दत्वा
हस्तपादप्रनाडुः करमध्ये नान्नमलंघयन् सत्यं त्वर्तेन परिषिंचामीति प्रदक्षिणं परिषिच्य अमृतोपस्तरणम
सीत्यापोशनं गृहीत्वा सर्वांगुलिभिः सर्वान्नग्रासान् प्राणायापानायव्यानायोदानायसमानाय स्वा
हांतैः पंचाहुतीः सघृताः सक्षीरा वा कृत्वा। वाक्पाणिपादचापल्यं वर्जयन् हस्तं ग्रासं सांगुष्ठं
ग्रसन् भुंक्ते अमृतापिधानमसीति गंडूषमर्द्धं पीत्वा अर्द्धं भूमौ बहिः पाणिं निनीय पवित्रं विसृज्य
ग्रसन् भुंक्ते ... ग्रासमप्युच्छिष्टं प्रक्षाल्य द्विराचामेत्॥ ततो हस्तौ संमृज्य पार्श्वांगुष्ठे
भूमौ मंडले वा पात्रे वाक्षिप्त्वा समस्य गुल्फक्षेत्रं अग्निमुपस्थायेष्टदेवतां स्मरेत्॥ भोजनगृहे वासनस्थो वा नाचामेत्॥
न वेक्षयोनिधिष्ण्याक्षिणी स्पृष्ट्वाग्निमुपस्थायेष्टदेवतां स्मरेत्॥

स्मृ॰सा॰ सा॰र॰

नांजलिना पिबेन्न पितृतीर्थेन॥ गोमयमृन्मयं वाश्वत्थं पालाशं वार्कं घुणाकेन भिन्नमयोबद्धं पीठं च व
र्जयेत्॥ ताम्ररौप्यसौवर्णाश्मवर्जं भिन्नभाजनं वर्जयेत्॥ न शुष्कपाणिपादो भुंजीत न तिष्ठन्न गच्छन्न
प्रक्रो न शयानो न शयने न खट्वायां न शय्यां नादिस्थानस्थो न तत्र भाजनं निधाय न जानुनि नोत्संगे
न वामपाणितले निधाय न भुंजीत॥ न शिशुभिः न पश्यतां येषामप्रदाय॥ न सहे जामिबालवृद्धा
तुरेभ्योऽप्रदाय नाग्निविप्रेभ्योऽदाय न भार्यया सहाश्नीयात्॥ विवाहवर्ज्यं॥ नार्द्रवस्त्रो न वस्त्रादिकं
पर्यंकिकां कृत्वा न प्रौढपादेनासनारूढपादो न विदिङ्मुखो न दुष्टपंक्तौ जलतरणा भिन्नासनपृथि

॥६२॥

स्तंभैः पंक्तिर्भिद्यते ग्रहणे नाश्नीयात्॥ नदीस्नानतर्पणश्राद्धदानादिकं कृत्वा मोक्षस्नानं वद्
त्वाश्नीयात्॥ सूर्यग्रहे पूर्वं चतुर्यामं नाद्यात् चंद्रग्रहे त्रियामं अमुक्तयोरस्तगतयोर्दृष्ट्वा स्नात्वा
परेऽहन्यद्यात्॥ न संध्ययोर्नार्धरात्रे नाग्निपाके शून्यगृहेषु नायज्ञोपवीती न वा महस्तेन न
न्नाब्देन न पाणिपृष्ठेन न केवलपाणितलेन वस्त्रे भुंजीत नान्यसहासनो न यंत्रिकायां यतीब्रह्म
चारी विधवा न भुंजीत निस्यादि सर्वं ज्ञेयं॥ अथ काले सायंसंध्यामुपास्य होमं वैश्वदेवं मतिथ्य

चनं च कृत्वा भृत्यैः परिवृतो लघु भुक्त्वा स्वपेत्॥ स्त्रिया सह स्रग्गंधानुलेपनमाल्यतांबूलादि से-
वमानः स्वपेत्॥ न संध्यायां शून्यालये श्मशाने एकवृक्षे चतुःपथे शिवमातृकायक्षनागस्कंदभै-
रवादि उग्रदेवगृहेषु कूले च न स्वपेत्॥ धान्यगोदेवविप्राग्निगुरूणां चोपरि वा भग्ने वा अशुचि-
रार्द्रवस्त्रपादो नग्नो न स्वपेत्॥ प्राक्शिरा दक्षिणतः शिरा वा इष्टदेवतां नत्वा स्मरन् वैष्णवदं-
डं शयनसमीपे निधाय स्वपेत्॥ प्रक्षालितपादः कृतरक्षः स्वपेत्॥ प्रदोषात्परयामे विद्याध्य-
नयेत्॥ ९॥ ॥ इत्यादि स्मृत्यर्थसारे आह्निकं समाप्तम्॥ ७॥ ॥ अथ द्रव्यशुद्धिरुच्यते॥
तत्र विण्मूत्रशुक्ररक्तवसास्रक्मज्जामद्यान्यस्पृष्टोपहतिकारणानि॥ श्वविड्वराहविड्गला-
दि पुरीषादीनि च कर्णाक्षिपनखश्लेष्मास्रुदूषिकास्वेदादीन्यस्पृश्योपहतिकारणानि॥ तथोच्छि-
ष्टशूद्रेण सूतकिभिः द्विजैरस्पृश्यकाकादिभिश्चास्पृश्यश्वविड्वराहादि पशुभिः स्पर्शनि मल्पो-
पहतिरुच्यते॥ तथा अस्पृश्यदेशे अस्पृश्यादिकाल मूत्रोच्छिष्टशूद्रगोलादि स्पर्शनं चास्योपहतिरु-
च्यते पंचमाद्यं त्यजाति चंडालाद्यैः सूतिकया रजस्वलया पतितैश्च शवेन शवस्पृशा च स्पर्शे

अत्यंतोपहतिर्भवति ॥ अत्यल्पकालेऽल्पप्रदेशे मद्यसंस्पर्शे तिष्ठिष्टरुधिराद्यैर्बहुकालं वस्त्रदोषवात्यंतोपहतिर्भवति ॥ सौवर्णराजतं लोहं विण्मूत्रादि चंडालादिस्पृष्टमात्रं निर्लेपं जलप्रक्षालनाच्छुध्येत ॥ सलेपं तु भस्मजलाभ्यां शुध्येत ॥ अत्यंतोपहतं वन्हिं तप्तजलप्रक्षालनाच्छुध्येत ॥ सौवर्णराजतं लोहं ताम्रं चंडालादिक्याद्युच्छिष्टैस्त्रिः सप्तैर्भस्मभिरम्लोम्लादिकेन वशुध्येत ॥ कांस्यादेरावर्त्तनं ॥ बहुप्रघाते सर्वेषामावर्त्तनमेव ॥ तैजसानां गोमूत्रपरिवासेन लेपानमपगमे आवर्त्तनं ॥ ताम्रस्य विण्मूत्रादि चंडालादि दूषितस्य च आम्लोदकाभ्यां शुद्धिः ॥ कांस्यपित्तलयोर्विण्मूत्रादिगंडूषपादप्रक्षालनचंडालादिस्पर्शैतिदेवत्रिः सप्तकृत्वो भस्मना परिमार्ज्य प्रक्षालनाच्छुद्धिः अत्यल्पकालोपहतौ तापनपरिलेखनाभ्यां शुद्धिः । बहुकालोपहतौ आवर्त्तनं ॥ पद्माभूमौ निखाते षण्मासपरिमार्जनमेवानलदग्धमल्पस्यास्य तापैवं सर्वसैजसानामावर्त्तनं पुनः करणं परिलेखनं तक्षणं कांस्यपित्तलयोः ॥ गोघ्रकाकोच्छिष्टशूद्रस्पर्शेदिर्भस्मभिः प्रक्षालनं ॥ अल्पकालोपहतो भस्मना सलवणलेलाच घर्षणाच्छुद्धिः ॥ बहुकालेत्वावर्त्तनं ॥ त्रपुसीसायसानां भस्मजला

॥६४॥

ण्यां शुद्धिः सर्वतैजसानां पात्राणां स्वल्पोपहतौ गोमूत्रगोमयमृत्क्षारभस्माम्लोदकैः शुद्धिः यथार्थं
कार्यं॥ शुक्तिशंखपाषाणमणिरत्नानामस्थ्नां विण्मूत्रादि चंडालाद्युच्छिष्टस्पर्शमात्रे ज्वलने
तु जलप्रक्षालनाच्छुद्धिः। सलेपानां भस्मजलाभ्यां मृज्जलाभ्यां वा शुद्धिः। अत्यंतोपहतानां स
प्ताहं भूमौ निखाय प्रक्षालनाच्छुद्धिः॥ सौवर्णराजतताम्रशंखशुक्त्यश्मस्फाटिकादिरत्नेषु भ
दिनदोषः। शृंगदंतास्थिमयानामल्पोपहतौ बिल्वफलचूर्णगौरसर्षपमृद्भस्मगोमूत्रगोमयान
मन्यतरेण वा प्रक्षालनाच्छुद्धिः। अत्युपहतौ तत्सर्पांत्रमेध्यरसैर्वधे स्वल्पोपहतौ त्यागः। दारुवे
णुवेत्रपात्राणां अल्पोपहतौ तक्षणं। अतिदुष्टानां त्यागः। कपित्थबिल्वालाबुनालिकेरफल
नां तैलघृतपात्राणां चाल्पोपहतौ प्रक्षाल्य गोपुच्छनिघर्षणेन शुद्धिः। अत्यंतोपहतौ त्यागः। शृंगास्थिदं
तपात्राणां मज्ञानां वरत्नानां वडुलभानामत्यंतोपहतौ लक्षणप्रक्षालनाच्चेच्छुद्धिः॥ मृन्मयानां पा
त्राणामीषद्दुष्टानां पुनर्दहनाच्छुद्धिः। विण्मूत्राद्युपहतानां शवसूतिकोदक्यादिस्पृष्टानां त्याग
एवा महाजलभाजनभांडेषु बाह्यदोषे अंतरं न दुष्यति। तत्र बाह्यं प्रक्षाल्य स्करूस्कवादिदा

स्मृ.स. सार०

हपात्राणां जलप्रक्षालनाच्छुद्धिः। सस्नेहानां यज्ञियानामुष्णजलप्रक्षालनाच्छुद्धिः। सर्वपात्राणां संह
तानामेकस्योपहतौ तस्यैव शुद्धिः कार्या न तेस्पृष्टानां कंदमूलफलशाकानां चर्मपक्कानां वेणु
वत्रवस्त्रकाष्ठानां चाशुचिस्पृष्टानां जलप्रक्षालनाच्छुद्धिः। अरत्नानां च वस्त्राणामेकेषु रूपेषो ह्यपर्य
भाराधिकानां स्थूलानां बहूनामन्येषां बहूनां च चंडोलादिस्पृष्टानां महतकीलानां वृक्षास प्रोक्ष
पाच्छुद्धिः॥ श्वेतसूक्ष्मवस्त्रेषु पण्येषु नूतनेषु विंशतो बहुत्वां। विचित्रवस्त्रेषु क्षौटरेषु बहुत्वं।
कुसुंभादिरक्तेषु त्रिषु बहुत्वं पण्येषु तेनूतेषु नेषु च तातोल्पानामपि बहुत्वं। स्त्र्यासूवितेअस्य ॥ ६५॥
तमेनपि बहुत्वां न तदल्पानां प्रक्षालनाच्छुद्धिः। अधौतानां मलिनानां चाल्पानां च बहूनां चैतदेक
॥ ६५॥ कार्ये नवानां च स्थिरंगाणां च प्रक्षालनां। आविकं बलस्याल्पदोषे सूर्यरश्मिभिः शुद्धिः। विण्मू
त्रादिदोषे च ल्मीकमृत्तिका प्रक्षालनाच्छुद्धिः। कौशेयवस्त्रस्याल्पदोषे प्रोक्षणाच्छुद्धिः। विण्मू
त्राद्युपहतस्य तु मृज्जलप्रक्षालनाच्छुद्धिः। क्षौमवस्त्रस्याल्पदोषे प्रोक्षणाच्छुद्धिः। विण्मूत्राद्यु
पहतो बिल्वचूर्णगौरसर्षपाद्यवघर्षणे जलप्रक्षालनाच्छुद्धिः। नीलयुक्तं वस्त्रं स्वरूपेण चेत्तु व

लै: परित्याज्यं केवं पट्टे यानीलीदोषो नास्ति नेपालकंबले अल्पोपहते प्रोक्षणं। मूत्रादिदोषे श्री
फलसंभवैः फेनैर्विघृष्य जलप्रक्षालनाच्छुद्धिः। तूलशय्योपधानानां कुसुंभादिरंजितवस्त्रा
णां चाल्पोपहतौ आतपकिंचित्प्रोक्षणं। विण्मूत्रादिसंस्पृष्टौ संशोध्य संप्रोक्षणाच्छुद्धिः॥ ॥
ऊर्णाकार्पासतूलकुसुंभकुंकुमकुसुमकर्पूरादिनिर्यासनां चैवं। श्वेतवस्त्रं चंडालादिस्पृष्टं प्र
क्षालनात्शुध्येत्। मूत्रपुरीषादिदोषे प्रक्षालनाच्छुद्धिः। शयनासनयानसंबंधानां संहता
नां रंकुरोमवस्त्राणां च प्रोक्षणाच्छुद्धिः। चैलवच्चर्मणां शुद्धिः। नवानां तु जंबुद्रक्षादिनिर्मितस
त्तकषाये पात्रिफलोदकेन वा गंधक्षये शुद्धिः। चर्मभांडेषु बहिर्दोषे अंतरं न दुष्यति तत्रैव ब
हुं सम्यक्प्रक्षालयेत्। धान्यमेकपुरुषोद्धार्यस्ताराधिकं च चंडालादिस्पृष्टं प्रोक्षणाच्छुध्यति। ए
कपुरुषोद्धार्यभारं प्रक्षालनाच्छुध्येत्॥ धान्यमशुद्धमृत्तिकायुक्तं तंदुलीकरणाच्छुध्येत्।
धान्यराशौ मूत्रादिलिप्ते लिप्तांशमपसार्य त्रिःप्रोक्षणाच्छुध्येत्। धान्ये गृहेस्थिते गृह
दाहे सति तत्र नरपशुमरणे तद्धान्यं त्याज्यमेव। भूमिगर्भस्थे कुसूलस्थे च धान्यमभ्युक्षण

मद्रप

शुध्येत्॥ मुद्गमाषादिशिंबीधान्यमल्पोपहतं प्रोक्षणाच्छुद्धिः। धान्यमशुद्धधूलिसंस्पृष्टं
निस्तुषीकरणाच्छुध्येत्॥ अत्यंतोपहतं संत्याज्यमेव॥ ९८ धान्यं पुरुषभाराधिक्ये बहुत्वे शि
थिलेषु द्रोणप्रमाणे बहुत्वे। तंडुलविदलादीनां तत्र दर्धे बहुत्वे तत्र स्पर्शदोषे प्रोक्षणं।
सर्वत्र विण्मूत्रादिदोषे तावन्मात्रं त्यक्त्वा शेषं प्रोक्ष्यं शिथिलतंडुलादि सर्वत्र प्रोक्ष्यमेव
पुरुषान्नानान्यूनं त्याज्यमेव। मृच्चर्मतृणकाष्ठादिकं नरभाराधिकमल्पोपहतं वा तालप
शुध्येत्। नरभारान्न्यूनमार्द्रं प्रक्षालनाच्छुध्येत्। शुष्कं चेत्स्वदत्यल्पमपि प्रोक्ष्यमेव। मूत्रा
द्यैरप्युपहतं त्याज्यमेव। पुस्तकं चंडालादिसंस्पृष्टं प्रोक्षयेत्। अन्नं तलं केशकीटाद्युष्टं भक्षि
नं मार्जनादप्युक्षणाच्च शुध्येत्। अन्नं तलं श्वखरोष्ट्रविड्वराहादिसेवितं गोक्रमणमार्जनाद्युच्छि
पोः शुध्येत्। अन्नं तलं विण्मूत्राद्यैरत्यंतोपहतं चेदुल्लेखनगोनिवाससमार्जनप्रोक्षणैः शुध्येत्। अन्न
तलं भारीप्रसवदूषितं चंडालादिनिवासदूषितं चिरकालं विण्मूत्रादिदूषितं चिरकालं श्व

।६६॥

सार॰

॥६६॥

खरोष्ट्रविड्वराहादिदूषितं तत्स्थानान्मृत्तिकामुद्धृत्यान्यमृत्तिकामाहृत्य गवाक्रमणमार्जनप्रो
क्षणैः शुध्येत्तृणेन देवभूतलमस्येतोपहतं चेत् खात्वा दहनाग्निना दग्ध्वा अन्यमृत्तिकापू
रणगवाक्रमेण मार्जनप्रोक्षणैः शुध्येतु। गृहस्याशुचित्वेपि कुड्यादीनां मृज्जलालेपनं
भूमेः परिलेखनं मार्जनं च कार्यं। भूतलस्य चिरकालं विण्मूत्रादिवासितस्य श्मशानत्वं ग
तस्यापि वेष्टितप्रक्षालनात् पृथ्व्यास्तूक्तविधिना शुद्धिः॥ आरामक्षेत्रश्मशानत्वं गते विण्मू
त्रादौ चिरकालमत्यंतदूषिते दृष्टे सर्वं दहनाकर्षणात् शुद्धिः। गृहे विप्रक्षत्रविशां मरणे त
त्रस्थं मृन्मयं भांडं पक्वमन्नं च संत्यजेत्। भूतलं देशं गोमयेनोपलिप्याऽऽघ्रा गवाक्रांतेन वा
ब्राह्मणपुण्याहवाचनैर्वा कुर्यात् वरुणमंत्रोदकैः प्रोक्षणाच्छुद्धिः॥ ॥ गृहे कश्चिद्राजादिनि
गडबंधनीनां तच्चेत् भूमिं कुड्यं च संप्रोक्ष्य दहनाग्निना नोपद्रुत्वा सूर्यरश्मिप्रचाराद्वा
प्रागुक्तविधानाच्छुद्धिः। गृहे जनने मरणे वा जाते आशौचादूर्ध्वं मेध्यभूमिं मृत्तिकाप्रक्षेपा
त् पुण्याहवाचनाच्छुद्धिः। विप्रगृहे शूद्रादिमरणे गृहस्य दशाहमशौचांते असपूडमम

स्मृत्य॰

णे मासमात्राशौचं ॥ चंडालपतितादिमरणे चतुर्मासमात्राशौचं ॥ रजकादिमरणे द्विमासमात्राशौचं ॥ स
र्वत्राशौचांते आमेध्यभूमिवच्छुद्धिः । कार्या विप्रगृहे दग्धे तत्रस्थमार्जारादौ मृते सति तद्गृ
हस्य कर्षणात्प्रोक्षणाच्छुद्धिः ॥ श्वकाकादौ मृते चैवं ॥ कर्षणे विशेषो विशेषः । प्रतिमा लोहजा लो
पहति दूषिता भस्मनो घर्षणात्पंचगव्येन शुध्येत् ॥ प्रतिमा पाषाणजा स्वल्पोपहति दूषिता चे
त्वे वल्मीकमृत्तिकया जलैः प्रक्षालिता पंचगव्येन शुध्येत् ॥ प्रतिमा महत्स्वर्णादिधातुजा विण्मू
त्रैर्गोमरसादिदूषिता चेत्पंचगव्यैः पंच पंचाहमधिवास्याप्लाव्य गोमूत्रगोमयवल्मीकमृ
त्तिकाभिः सम्यक्प्रक्षाल्य पुनः प्रतिष्ठाप्य शुध्येत् ॥ रत्नजानां पंचगव्यैः प्रक्षाल्य पुनः प्रक्षाल
नं कार्यं ॥ ॥ जले भूमिष्ठं गंधवर्णरसान्वितं विण्मूत्रादिदूषितं त्रिगवां पानसमर्थं शुद्धं ॥ त
तोऽल्पं च काकाद्युपहतं एकगोः पानसमर्थं तथैव शुद्धं । जलं शुद्धं भांडाहृतं तस्मिन्नेव दिने
शुद्धं । तेनान्यदिने अनुष्ठानादिकं न कार्यं । इह भांडगतं चतुर्द्रोणाद्धिकं विण्मूत्रादिदूषि
तं जलं परित्याज्य भांडं प्रक्षाल्य कुशैः संघर्षणात्पुनः प्रक्षाल्य पंचगव्येन प्रोक्ष्य पुनर्जलैः

सार॰

॥ ६७ ॥

॥ ६७ ॥

रणाद्बध्येत॥ ॥वापीकूपतडागादिष्वल्पजलेषु श्वमार्जारादिशवे क्लिन्ने जीर्णे सति तज्ज
लं सर्वमुद्धृत्य मृत्तिकां परिनिष्कास्य पंचगव्यप्रोक्षणाच्छुद्धिः॥ पाषाणैरिष्टिकाभिर्वा बद्धे
तत्क्षणस्थाने दहनं॥ अन्यत्तु मानं दारुबद्धे प्रक्षालनमेव॥ बहुजले षष्ठिकुंभोद्धारमेव॥
मूषकादिक्षुद्रप्राणिपाते त्रिंशत्कुंभोद्धारे गोमूत्रादिप्रक्षेपश्च॥ जले जलप्राणिशवेन
दोषः॥ वापीकूपजले नरस्त्रीवस्त्रितेनघटन्नितजलमुद्धृत्य पंचगव्यप्रक्षेपाच्छुद्धिः॥ पशुगा
वपातेप्येवाशुद्धिः। तत्रैव जले नरमरणे ततजलस्य त्रिंशान्वमात्रं चांगात्रोचोने पूर्वोक्ताशु
द्धिकार्या॥ वापीकूपजले उपानच्छ्लेष्मविण्मूत्रपतने स्नानाच्चवसाभस्मास्थिदूषिते षष्ठि
कुंभेजलोद्धारात्शुद्धिः॥ जलबाहुल्ये शतकुंभेजलोद्धारात्पंचगव्यप्रोक्षणाच्छुद्धिः। कू
पादिजलेष्वशुद्धरजसा दूषिते दिवा सूर्यरश्मिवायुस्पर्शनाच्छुद्धिः रात्रौ वायुवेदनक्षत्र
रश्मिस्पर्शनाच्छुद्धिः॥ संध्यायां वायुस्पर्शनाच्छुद्धिः। नदीस्रोतस्तटाकजलेष्वंत्यजैर्दूषि
ते तत्त्वीकृतजलस्थानादन्यत्र जलं शुद्धमेव॥ ॥शाणपाणितलंमानं कुडवं प्रस्थमाढ

स्मृ०स०

सा०२०

कं॥ द्रोणं चखारिकाचेति पूर्वं पूर्वं चतुर्गुणं॥ द्रोणप्रमाणनिर्मितधान्यान्नं गवाघ्राते खरेण वा शु
नावाविड्वराहग्रामकुक्कुटकाकैर्वा स्पृष्टे स्पृष्टमात्रं मुद्धृत्य शेषमन्नं पर्यग्निकृत्वा सहस्राग
यत्र्याभिमंत्रितैर्जलैः पवमानः सुवर्जनः इत्येतेनानुवाकेन सकृदभिमंत्रितैर्वा शुद्धव
तीमि ऋग्भिर्वा शुचिलिंगैर्मंत्रैर्वा जलैरभ्युक्ष्य एतच्छुद्धमस्त्विति विप्रवचनं लब्ध्वा शुध्येत्॥
अजामुखेन वा घ्रातं शुध्येत्॥ तदन्नं श्वकाकादिलीलया घर्षितेनावन्मात्रं समुद्धृत्य शेषं
कनकवारिणा रौप्यवारिणा वाभ्युक्ष्य उल्मुकेन स्पर्शयित्वा आज्यकनकैः स्पृष्टं शुध्येत्॥
अन्नं पूर्वोक्तविण्मूत्रनखरोमादिदुष्टं चेत्तद्दुष्टमन्नमुद्धृत्य पूर्ववन्मंत्रितोदकेनाभ्युक्ष्य
भस्म क्षिप्त्वा घृतेनाभिघार्य शुद्धमन्नमस्त्विति विप्रवचनाच्छुध्येत्॥ घृतस्य नवनीतस्य
आढकप्रमाणस्य श्वकाकपिपीलिकादिदुष्टस्य दुष्टांशमुद्धृत्य वस्त्रेण परिशोध्य तज्ज्वा
तोयेन तक्रं दूरयित्वा सर्वमन्नोपताप्य गायत्र्याभिमंत्रितजलाभ्युक्षणाच्छुद्धिः॥ तक्रेत
लक्षीरदधिप्रभृतीनां द्रोणप्रमाणानां काकाद्युपहतौ घृतवच्छुद्धिः॥ तक्रदधिक्षीराणि
शूद्रभांडस्थानि द्विजभांडे प्रक्षिप्तानि शुद्धानि॥ नवनीतघृततैलक्षौद्रादासादभांडस्थं गृही

॥ ६८ ॥

॥ ६८ ॥

त्र भांडे क्षिप्तं शुध्येत्। नवनीतं घृतं क्षौद्रं वा मूल भांड स्थं चेन्नस्त्रतान्यविप्र भांडे क्षिप्तं बद्ध शु
ध्येत्। नवनीतं घृतं वंड्रालेन प्रमादेन स्पृष्टं जलक्षिप्त्वा घृतं शुध्येत्। द्रोणप्रमाणान्यूनप्रमा
णधान्यनिर्मितान्नानां माटक प्रमाणान्यून नवनीतघृतादीनां द्रोणप्रमाणान्यूनतक्रादीनां
च पूर्वोक्तोपहतौ परित्यागो नापदि। आपदि तु पूर्वोक्त विधिना शुद्धिः॥ ॥ अतिक्षामे च लुः पुरु
षान्नान समर्थ्य जने प्लावने शुद्धिः। अस्पानां त्यागः। गुड लवणादीनां पयग्निकरणं। श्वोल
ने कृमकीटादि दर्शने तावन्मात्र मुद्धृत्य जलेभस्म मृदं वा क्षिप्त्वा शुध्येत्। मुखदृष्टा निष्ठीव्य
जकं वा घृतं वा प्रोक्ष्याश्नीयात्॥ पाके केशादि स्थितो त्यागः। तच्च मुख्यो पवेसहा। यद्वस्क धर्मो
पयोगि सदृत्यं तथिपं देशकालोच्यं तदुर्लभं। तदुपहतं चेदल्पमपि पूर्वोक्त विधिना शुद्धे
त्। अश्वमुखमजामुखं रतिकाले स्त्रीमुखं मृगयेश्वनोमुखं प्रश्रवणे वत्समुखं फलपातने
पक्षिमुखं चापणद्रव्यं सदा शुद्धमेव। बालानां उपनयनादर्वाक् शुद्धिः। स्त्रियश्च विवाहा
दर्वाक् शुद्धाः। मूखक मशक पतंग मक्षिका धान्य स्था धान्यकीट गोह स्त्यश्वच्छाग शुकाश्च
जलस्थाश्च सर्वे जीवाः स्वभावशुद्धाः। अशुद्धसंस्पर्शविनदुष्यंति। चंद्र सूर्यरश्मयः स्वभाव

७॰
स्मृ॰सा॰

तदर्धं जपः ॥ सर्वत्र चतुर्थस्याचमनं ॥ रजस्वलाविषये द्वितीयादि दिनेषु स्ना-
नपूर्वं पादपादोनं जपमाकुः ॥ तत्तु स्पृष्टस्पृष्टादिषु च स्नात्वा तत्तदर्धं जप
कार्यः । अचेतनेन दंडादिना चंडालादिस्पर्शने स्नानमात्रं तृतीयस्याचमनं । दृष्ट्वा प्रोक्षणं । भ-
स्या रजकादिस्पर्शने सचैलं स्नात्वा दशगायत्रीजपं कुर्यात् । मत्या तत्स्पृष्टस्पर्शने सचैलं स्ना-
नं । अमत्या रजकादिस्पर्शने सचैलं स्नानमेव । तत्स्पृष्टस्पर्शने स्नानमात्रं तृतीयस्य ज्योतिर्द-
र्शनं । मत्या पंचमजातिस्पर्शने सचैलं स्नानं पंचजपः ॥ तत्स्पृष्टस्य स्नानं । हीनशूद्रस्पर्शने स-
चैलं स्नानं । सच्छूद्रस्पर्शने स्नानमात्रं । निषादस्पर्शने स्नानं कृत्वाचमनं कार्यं ॥ शवश्वा-
न्तौ विष्ठा तधूमदेवड्यापजी खिग्रामयूजकं सोमविक्रेयी यूपचितिचिति श्राद्ध [illegible] यानान्तिम-
मद्यभांडस्नेहमानुषीस्त्रीनिस्पृष्ट्वा सचैलं स्नात्वा गायत्र्याष्टशतं जपेत् [illegible] घृतं प्राश्य पुनः स्ना-
त्वा त्रिराचामेत् । अस्नेह स्नानमात्रं । अमात्य स्नानमेव । सर्वत्र स्त्रीणां जपहोमस्थाने अन्न-
धान्योदकुंभादिदानं कार्यं । देवबाह्यशैवशाक्तेयपाशुपतलोकायतिलकनास्तिकदेव

सार॰
॥
७॰

लकविकर्मस्थो द्विजानश्चारूढपतितं विस्पृष्टाग्निमभिनत्सेराठंत्रावदाहकेत्रावस्पृष्ट्वा
सचैलं स्नायात्॥ अत्र मत्या स्नानमात्रं कार्यं॥ अजीर्णे सत्यप्युदिते स्नामितो विप्रे केदुःख
प्ने दुर्जनस्पर्शे क्षुरकर्मणि भुक्त्वा मुहूर्त्तादूर्ध्वं [illegible] दिने च स्नानं। [illegible] नैमैथुने स्नानं।
मैथुने अनृतौ तु सम्यक् [illegible] आचमनं। दिवा मैथुने [illegible]
ने च सचैलं स्नानं स्मृतं प्रायश्चित्तं कार्यं मूत्रपुरीषादो [illegible] आचमनं [illegible] त्वा यामद्वया
द्वा बहुकालस्थितो सचैलं स्नात्वा व्याहृतिहोमाज्यपानां कार्यः। वृद्धयास्तम [illegible] रेत
स्कंदित्वा सचैलं स्नात्वा पुनर्माम् इति जपित्वा सप्त व्याहृतीभिः राज्याहुतीर्जुहुया
त्। जपेद्वा अमात्या सचैलं स्नानमेव। आक्षिस्पंदने कर्णनिःसरणे सचैलं स्नानं [illegible] पर
मिः कार्यः। श्वजंबूकवृकादिकैर्व्यादखरोष्ट्रविड्वराहमेषवानरस्पर्शे नाभेरूर्ध्वं करामु
क्तो स्नानं सचैलं नाभेरधः स्पर्शने स्नानमात्रं। रात्रौ चेत् [illegible] स्पर्शने स्नानमात्रं नाभे

रध स्पर्शने प्रक्षाल्य पुनराचम्य शुध्येत् ॥ काकोलूक ॥ स शुक कपोत ग्रामकु
क्कुटादिकं ध्यादपक्षिस्पर्शने नाभेरूर्ध्वं करौ मुक्त्वा सचैलं स्नानं ॥ तत्रौ चेन्ना
भेरूर्ध्वं स्नानं ॥ नाभेरधः प्रक्षालनं ॥ रथ्याकर्दमतोयोभिः छीव नाद्येनो
भेरूर्ध्वं स्पृष्टः सद्यः स्नायात् ॥ नाभेरधः प्रक्षालनं ॥ उभे अध्ये शुद्धे ॥ ... ॥
पक्कीय विण्मूत्ररेतोरक्तान्यैर्वा स्पृष्टमज्जायसा ... मलैः ... नामधो ...
रधः प्रक्षाल्य शुचिः स्याद् ... जले ... लेपं प्रक्षाल्य स्नानं नाभेरूर्ध्वं स्पर्शने
स्नात्वोपवासः ॥ ... ये ... स्पर्शने स्नात्वे ... ॥ ...
कीयमलस्पर्शने तु नाभेरूर्ध्वं म ... प्रक्षालनं ... वा ॥ ... द्विजा ...
र्शने विप्रस्य सचैलं स्नानं ॥ निःस्नेह ... नमात्रं ॥ ...
क्षालयेद् ... शुध्येत् ॥ ... द्विजो ... स्नेहे ... मात्रं ... स्नेहे ... कराणं

॥ अभावे तु पेलुभक्ष्यवर्जं पंचनखत्रावदंतास्थिसंस्पर्शे हे स्नानं ॥ विक्रांत रथारभां॥
दृष्टौ सकर्दमग्राम संकर अवेनोर्जं घ्यो क्लिन्नोभूमिकाः॥ पादयोः षड्भेदः
क्षित्वा अक्षालने ॥ वा भुक्त्वा केकर्दमादौ न दोषः॥ श्वपाकादिच्छाया रोहणे स
चैलं स्नात्वा घृतं वा हिरण्योदकं वा कुशोदकं वा पिबेत्॥ श्वपाकादिस्पर्शने
सचैलं स्नात्वाऽष्टसहस्रं जपः॥ मत्या चेदुपवासश्च॥ न त्वश्वादिसूतारतौ
न योग्यं कल्प्यं॥ दिवा रजःस्रावादिके जनने मरणे च तद्दिनादिकमशुचित्वं
स्यात्॥ रात्रौ रजःस्रावादौ सति अर्धरात्रादर्वाक् चेत्पूर्वदिनमित्येकः पक्षः॥
रात्रिं त्रिधा विभज्य पूर्वभागद्वये चेत्पूर्वदिनमित्यन्यः पक्षः॥ उदयं सूर्व
चेत्पूर्वदिनमित्यन्यपरः पक्षः॥ एतेषां पक्षाणां देशाचारतो व्यवस्था॥ अज्ञा
ज्ञाते रजस्रावे चतुर्दिने षु ज्ञातेषु रजस्रावादिकमशुचित्वं स्यात्॥ जन

नादौ तु स्नानादिकमशुचित्वं स्मृतं। सर्वथाप्यस्नातं वेद्यशुचित्वमेव। अतो ज्ञानात्पूर्वं रजस्वला
स्पृष्टं दुष्टमेव। एवं सर्वपापनिमित्तं स्वसत्त्वादिपापपादकं। सूतकं तु ज्ञानादिकमेव। रजस्व
ला त्रिरात्रमशुचिः स्यात्। चतुर्थेऽह्नि स्नात्वा शुध्येत्। भर्तुः स्पृश्या स्यात्। दैवे पित्र्ये च कार्ये
रजोनिवृत्तौ शुद्धा। स्मृतिकारास्तु शौचान्ते मलं प्रक्षाल्य दन्तान्धावयित्वा सचैलं स्नायादिति। रज
स्वला चतुर्थेऽह्नि षष्टिमृत्तिकाभिः शौचं कृत्वा क्षत्रियादिस्त्री च पादपादपादन्यूनमृत्तिका
भिः शौचं विधवा द्विगुणमृत्तिकाभिः शौचं कृत्वा मलं प्रक्षाल्य दन्तधावनपूर्वकं संगवे स्नाया
त् सचैलं। रजस्वलायाः स्नातायाः पुनरपि रजोदृष्टौ अष्टादशादिनादर्वाग् अशुचित्वं ना
स्ति। अष्टादशादिने रजोदृष्टावेकरात्रमशुचित्वं। नवदशादिने द्विरात्रं। विंशादिने त्रि
रात्रमेव। प्रायेण विंशतिदिनादूर्ध्वं रजस्वलाविपीनामेवं भवति। विंशतिदिनादर्वाक् प्राय
शो दर्शनवतीनामष्टादशादिनेऽपि त्रिरात्रमशुचित्वं। किं चात्र षोडशादिनादूर्ध्वं प्रायशो रजो
स्वलाविपीनामेकादशादिनादर्वाग् अशुचित्वं नास्ति। एकादशादिने रजोदृष्टावेकरात्रमशुचित्वं।

द्दशो द्विरात्रं त्रयोदशे त्रिरात्रमित्यादि ज्ञेयं। सचैलं स्नानमेवं वस्त्रं प्रक्षाल्य स्नात्वा पुनः। स
चैलं स्नानं। एकवस्त्रस्पृष्टं चेत्तथा स्नातोपि सचैलं स्नानं एवा संग्रामे हट्टमार्गे च यात्रा देवगृहेषु
वा। उत्सवे क्रतुतीर्थेषु विप्लवे ग्रामदेशयोः। महाजलसमीपेषु महाजनरवेषु वा। अग्न्युत्साते
महापत्सु च स्पृष्टास्पृष्टिर्न दुष्यति। प्राप्य कारीरिदिये स्पृष्टमस्पृष्टिर्वितरं दियं। तयोश्च विषये श्रा
द्धः स्पृष्टास्पृष्टव्यभिधानतः॥ ॥ इत्यादि स्मृत्यर्थसारे आचारकांडे स्पृष्टास्पृष्टिप्रकरणं द्विती
योध्यायः॥ २॥ छ॥ ॥ ॐ नमो भगवते वासुदेवाय॥ छ॥ कामधेनौ प्रदीपव्यो कल्पवृक्षे लता
दिषु। स्मृत्युड्विड्केदारलोल्लटाद्यैश्च भाषितं। मन्वत्रियाज्ञवल्क्यादिव्याख्यातं प्रतिपादि
तं॥ स्मृत्यर्थसारं वक्ष्यामि स्वखानुष्ठानसिद्धये॥ ॥ अथाशौचविधिः॥ ॥ चातुर्मास्यंतरे
गर्भमात्रनाशः स्रावइत्युच्यते। तत्र स्रावे आद्यमासत्रये मातुस्त्रिरात्रमाशौचं। उपरि मातुर्ग
र्भमाससंख्यया समदिनमाशौचं। सगोत्रसपिंडानां स्नानेन सद्यः शुद्धिः। यतः प्रभृति संता
नविश्लेषः सकूटस्थस्तमारभ्य गणिताः सप्तपुरुषाः सपिंडाः। अत ऊर्ध्वं सप्तसमानोदकाः
ततः समोत्रा[illegible]पंचषष्ठयोर्मासयोर्मासयोर्गर्भमात्रनाशः। पातनइत्युच्यते। पातमातुर्वै

स्मृ०स्य०

गर्भमाससंख्यासमदिनमाशौचं। सपिंडानां त्रिरात्रं। द्द गर्भनाशप्रयुक्त्याशौचं सर्ववर्णसमं। स
त्तममासप्रभृति पूर्णगर्भनिर्गमः प्रसव इत्युच्यते प्रसवे जनननिमित्तमाशौचं सपिंडानां संपूर्णं
दशाहादिकं सपिंडानां सर्वेषां यथावर्णं भवति। सोदकानां त्रिरात्रं। जनननिमित्ताशौचं मातुरे
व यावदाशौचं। न पितुः। तस्य स्नानानंतरं अस्पृश्यत्वं नास्ति। सपिंडानां अस्पृश्यत्वं सर्वदा नास्त्ये
व। सूतिकास्वयं न शौचे गते संव्यवहारयोग्यैव। अदृष्टार्थेषु तु कर्मसु पुत्रप्रसूतौ विंशतिरात्रेण यो
ग्या। स्त्रीप्रसूतौ मासेन योग्या। पुत्रजननदिवसे हिरण्यभूगावाश्वाजवासःशय्यागृहादिकं सर्वं
प्रतिग्राह्यं। पक्वान्नं वर्ज्यं। कृतान्नग्रहणे चांद्रायणं कार्यं। पुत्रजननदिवसे दानं कुर्याद्वाहिर
ण्याद्यभावे तदानीं संकल्प्य पश्चात्समर्पयेत्। प्रथमदिवसे हिरण्यादिदानं षष्ठे सप्तमे वा बलि
दानं। दशमदिने अन्नदानं इत्यादि यथाचारं कार्यं। सूतिकागृहरक्षा च कार्या। रात्रौ विशेषेण।
जन्माशौचमध्ये तच्छिशुमरणे तूच्यते॥ ॥नाभिच्छेदादूर्ध्वं शिशुमरणे निःप्राणनिर्गमने तु ज
नननिमित्ताशौचं कृत्स्नं यथावर्णं सर्वेषां सपिंडानामस्त्येव। मरणनिमित्ते सद्यःशुद्धिः। नाभि
च्छेदात्पूर्वं शिशुमरणे तु जनननिमित्ताशौचं सपिंडानां त्रिरात्रं। मरणनिमित्ते सद्यःशुद्धिः। मा

॥७३॥

सार०

॥७३॥

तुर्जननीनिमित्ताशौचं कृत्स्नं यथावर्णमस्ति मरणनिमित्ते सद्यः शुद्धिः। नामकरणात्पूर्वं शि
शुमरणे निखननमेव। नानुगमनं। नाग्न्युदकं दानादिकं। ज्ञातीनां सचेलस्नानात्सद्यः शुद्धिः।
ततो दंतजननात्पूर्वं शिशुमरणे तु निखननमेव। तूष्णीं दहनोदकदानं वा कार्यं। अनुगमनं
कृताकृतं। खननपक्षे सद्यः शुद्धिः। दहने त्वेकाहः। खननं च शवं मलं प्रक्षाल्य घृतेनाभ्यज्य
संस्नाप्य नववस्त्रसूत्रगंधमाल्यानुलेपनाद्यैरलंकृत्य ग्रामाद्बहिः शुचौ देशे का
र्यं। दहनं चेच्छवं तथा संस्नाप्यालंकृत्य बांधवा ज्येष्ठपूर्वाः श्मशानं नीत्वा लौकिका
ग्निना तूष्णीं कुर्युः। तूष्णीमुदकादिदानं च। दहने अमेध्यचांडालसूतिकापतितविला
ग्नीन्वर्जयेत्। दंतजननादूर्ध्वं त्रिवर्षपर्यंतमकृतचौलस्य मरणे खननं दहनं वा कार्यं।
खनने एकाहमाशौचं दहने त्रिरात्रं। अत्रोनद्विवर्षांतमनुगमनं कृताकृतं। पश्चान्नित्यं।
दंतजननादूर्ध्वं त्रिवर्षपर्यंतं कृतचौलस्य मरणे तूष्णीं दहनं तूष्णीमुदकदानं त्रिरात्रमा
शौचं च नियतमेव कार्यं। त्रिवर्षात्परं कृतचौलस्याकृतचौलस्यापि मरणे यावदुपनय

स्मृ०स्य० सा०र०

नंतावद्धतुगमनं तु स्त्रीदहनोदकादीनां त्रिरात्राशौचानि नियतानि कार्याणि। अनुपनीतमरणे
मातापित्रोर्दशाहाशौचपक्षो नादृतः। अनुपनीतमृताशौचे वर्णाः स्वाशौचकालत्रिभागादूर्ध्वं स्पृश्याः।
अनूपनीतमरणेऽकृते अवलीनाशौचं नास्ति। स्नानमेवाद्रदेयः। प्रयुक्ताशौचे सर्ववर्णसमं आ
शौचान्ते स्नात्वा स्वस्तिवाचनपूर्वं ब्राह्मणान्भोजयित्वा स्वस्तिवाचनं कार्यम्। स्त्रीमरणे तु त्रिपुरुष
विषये ज्ञातीनामाचौलकरणाद्वा चौलकालाद्वा स्नानेन सद्यः शुद्धिः। स्त्रीपुंसापिंड्ये पुरुषमेवाऽत्र
प्रत्तासु तो वाग्दानादर्वागेकाहमाशौचं। ततो विवाहादर्वाक् पतिपक्षे पितृपक्षे च त्रिपुरुषपर्यंतं
त्रिरात्रं। वाग्दानाभावे विवाहमित्युभयोवधिरित्येके। अत्रानेन द्विवर्षे खननात्पश्चाद्दहनात्पुरुष

॥७४॥ ॥७४॥

वद्वा। अस्पृश्यत्वादि सर्वं पूर्ववद्देयं। उपनयनादूर्ध्वं पुरुषमरणे विवाहादूर्ध्वं स्त्रीमरणे च वि
धिनदग्ध्वा उदकपिंडदानसहितं यथावर्णं पूर्णमाशौचं कार्यं। तत्र दहने ब्रह्मचर्यादिरन
ग्निकस्य विधुरादेश्च फेपालाग्निना स्वशाखोक्तविधिना कार्यं। आहिताग्नेस्त्रेताग्निभिर्दह
नं कार्यं। गृहस्थस्य अनाहिताग्नेर्गृह्याग्निना कार्यं। तत्राशौचं ब्राह्मणानां दशाहं। क्षत्रिया
णां द्वादशाहं। वैश्यानां पंचदशाहं। शूद्राणां मासं। वृत्तस्थानां द्विजशुश्रूषापेरमहोपन्नवतां

शूद्राणां तु पंचदशाहं । चतुर्थे दशरात्रं स्यादित्यादि पक्षा दूषिताः । एकाहाद्यध्ययेते विप्रस्याद्यास्त्र
नादृताः । तत्राशौचमाहिताग्नेर्विधिवद्दहने अथवा दहनदिवसमारभ्यैव कार्यं । विदेशस्थे मृते याव
त्तविधिना न संस्कारः । तावत्तत्पुत्रादीनां संध्यादिकर्मलोपो नास्त्येव । अनाहिताग्नेर्मरणदिवस
मारभ्याशौचं कार्यं । अनाहिताग्नेर्विधिवद्दहनाभावे तदानीमाशौचग्रहणं कृतेऽकृते । अनाहिता
ग्नेर्विधिवद्दहनाभावे त्वाशौचग्रहणं नास्त्येव । एवमनंतपुत्राणां प्रथमाह्निकार्यं । दशमे वा । अ
द्वादशे वा कस्मिंश्चिद्दिने वा ग्रामाद्बहिः कार्यं । नखनिकृंतनं च । गुरुमरणे चैवं । मृतशरीराभावे
अस्थ्नां संस्कारं कुर्यात् । अस्थ्नामभावे पालाशवृंतैः कुशैर्वा शरीरं प्रकृतिं कृत्वा पुनः संस्कारं
कुर्यात् । आहिताग्निः पुनः संस्कारस्तत्र सूतकमध्ये चेत्तत्तत्सूतकशेषेणैव शुद्धिः । अती
ते सूतके पुनः संस्कारे तु पूर्वमगृहीताशौचस्य पुत्रस्य पत्न्याश्च दशाहादिकं संपूर्णमाशौ
चं । गृहीताशौचस्य पुत्रस्य पत्न्याश्च त्रिरात्रं । पत्नीपुनःसंस्कारे पत्युश्चैवं । सपत्न्योर्मिथ
श्चैवं । अगृहीताशौचानां सपिंडानां त्रिरात्रं । गृहीताशौचानां सपिंडानां पुनराशौचं नास्ति ।
विदेशस्थजनेन मरणे वा प्रथमदिवसादूर्ध्वं ज्ञाते पुत्रादीनां स्वाशौचशेषेणैव शुद्धिः । हीन

वृषस्य ब्राह्मणपाद्युत्कृष्टज्ञातिसपिंडत्वेऽत्कृष्टजात्याशौचमेव। दासीदासस्य च प्रेतस्य स्वामिका
र्ये स्वाम्याशौचसमकालेन तेस्यऽशुद्ध्याः। स्वकर्माधिकारस्तु स्वाशौचांतएव। प्रतिलोमजानां नाशौ
चं तेषां मलप्रक्षालनमेव। पंचादग्ध्वा हस्तौ तोऽस्मन वेश्यमाणमागच्छेत्। स्फुटितं श्लक्ष्णं पा
षाणं गृहीत्वा महाजलं गत्वा तत्र महाजलेऽशरीरमलं प्रक्षाल्याचम्य संशोध्य स्नात्वा पुनः
सचैलं स्नात्वाचम्य यथाम्यतः समाहिताः सगोत्रसपिंडाः समानोदकाश्च वृद्धपूर्वाः प्राचीना
वीतिनो दक्षिणामुखाः प्रेतस्य नामगोत्रेउच्चार्य प्रेतस्त्वप्यत्वितिजलपूर्णांजलिसतिलं सु
व्योत्तरपाणिकाः पाषाणे सकृत्सिंचेयुः। एवमुदकं दत्वाजलात्समुत्तीर्णा नवजाततृणाके
भूप्रदेशे सम्यकूस्थितान पुत्रादीन कुलवृद्धाः। पूर्वैतिहासैः शोकोनिष्फलः श्लेष्माश्रु बा
धवैर्मुक्तं प्रेतास्य पतिन तस्मान्नरोदनं कार्यं विहितोः क्रियाः कार्याः इत्याश्वासयेयुः। एव
माश्वासितावस्त्राणि निष्पीड्य शोषयित्वा बालपूर्वं गृहंगत्वा द्वारिस्थितास्समाहिताः निंब
पत्राणि दंतैर्नवदश्यित्वाचम्याग्न्युदकगोमयगौरसर्षपदूर्वांकुरगोवृषभान्स्पृष्ट्वा अमपि प्रवा
लादीश्च स्पृशा स्वान्तोश्च यथालाभं संस्पृष्ट्वाः अश्मनि पदंशनौनिधायप्रविशेयुः। तस्मि

न्हे निरेकस्मिन्मृन्मये पात्रे जलं प्रेतात्र स्नाहीति आकाशे शिक्यादौ स्थाप्यं ॥ अन्यस्मि
न्मृन्मये क्षीरं प्रेतेदं पिबेति तथैव स्थाप्यं ॥ निंबपत्रभक्षणं पाषाणस्थापनं वा कार्यं ॥ त
न्नाशौचमध्ये दिनेतस्मिन्नेरहेन्नं न पचेयुः ॥ क्रीतान्नेन वा अयाचितान्नेन वा अन्यगृह
पक्वेन वा हविष्येण वर्तेरन् ॥ अन्नस्य गृहे पक्वेन ॥ क्षारलवणमांसमांस स्त्रूपादूसपाय
सवर्ज्यं अधःशयनाः ॥ बालवृद्धातुरवर्ज्यं ॥ एकपथक्रमेण ब्रह्मचर्यं शुक्लाभ्यंगवेयुः
गुरौ मृते गुप्तवसेयुः ॥ पुत्राः पत्नीचाज्ञाने स्वतस्तु ते के ते सर्वे नियमानस्युः ॥ महा
गुरुमरणे गुप्तक्षारलवणान्नि नो द्वादशमासं दानाध्ययने वर्ज्येरन् ॥ पितापुत्र
गुणाधिसंज्ञकत्व्यवेदान्वेदार्थमाहयित्वा वत्तिकल्प यित्वा महागुरुः संवृत्ति ॥ ततो
यावद्दशाहं तावत्प्रत्यहं एकैकमंजलिं दद्युः ॥ तथा च सति दशादिनेषु दशांजलयः
स्युः ॥ यद्वा आद्ये दिने एकं द्वितीये दिने द्वौ ... एवं दशमे दशांजलिं ... त्वा ... इति दि
न संख्यया पदद्यात् ॥ तथासति पंचपंचाशदंजलयः स्युः ॥ एवं मातामहादीनामाचार्यणां

स्मृत्य०

घोदकदानं कुर्यात्। सखीनां प्रत्तानां दुहितृभगिन्यादीनां पत्नीनां भागिनेयशिष्यश्वश्रूश्वशुरर्त्वि
जां चेच्छया उदकदानं कुर्यात्। अस्थिसंचयनमाहिताग्नेरनाहिताग्नेश्च संस्कारमारभ्य प्रथमे
न्हि द्वितीये तृतीये चतुर्थे सप्तमे नवमे वा विरुद्धखन्त्राखोके विधिना कार्यं। तत्र पिंडत्रयं देयं।
एकः पिंडः श्मशानवासिभ्यः पूर्वप्रेतेभ्यो मध्यम एकः पिंडः इदानींतनप्रेताय दक्षिणतः। ए
कः पिंडः तत्सखिभ्य इति दक्षिणसंस्थं दद्यात्। अस्थीनि गंगायां वा प्रक्षिपेत्। अन्यतीर्थे वा
शुद्धप्रदेशे वा संचयने कृते वर्णस्वाशौचकालत्रिभागे त्रिचतुःपंचदशादिनैः स्पर्श्याः। द
शद्वादशपंचदशविंशतिदिनैर्भोज्यान्नाः॥ ॥ब्रह्मचारी मातापितृमहागुर्वाचार्योपाध्याय
व्यतिरिक्तानां दहनाशौचोदकदानादिकं न कुर्यात्। आसमावर्तनात्। मातापित्रादीनां तु कु
र्यादेव। अकृते प्रायश्चित्तं व्रतश्चास्य समाप्ते दहनादिके न कुर्यात्। कृतेपि नोपतिष्ठते। माता
पितृगुर्वाचार्योपाध्यायानां प्रेतकार्ये ब्रह्मचारिणो व्रतलोपो नास्ति। ससूतकान्नं नाश्नीयात्।
न सूतिकाभिः सह संविशेत्। अन्यप्रेतकर्मकरणे पुनरुपनयनं कार्यं। समावृत्तशिष्यस्य द

॥७६॥

सार०

॥७६॥

शाहाग्नौ वं गुरुदहने। स्वकर्मपतिता महापातकपतिताः पुरुषाः स्त्रियश्च हीनजातिगामिन्यो
ब्राह्मणगर्भपातिन्यो भर्तृघ्न्यश्च स्तेयस्वभाव विविधधर्माकरणाश्च कृीबाद्याश्च दहनोदको
दिकं न कुर्युः। मोहात्कृते पिनोपतिष्ठते। प्रेतस्य पुत्रो दिनत्रये ग्रामाद्बहिः पाषाणस्य पुरतः
कुशाग्रमंत्रकं नाम गोत्रेण पिंड पितृयज्ञप्रयोगेणात्रीन् पिंडान् दद्यात्। पिंडे पाषाणे च अक्षत
माल्य धूपदीपादीन् दद्यात्। धूपदीपौ न वा दद्यात्। यद्वा दशाहादिनेषु दश पिंडान् दद्यात्।
आशौचव्हासे पित्रयः पिंडा देया वा। अनेकपुत्रत्वे इतरानुमतो ज्येष्ठ एव दद्यात्। ज्येष्ठेण
विभक्तेन वा अविभक्तेन वा। पुत्राभावे पितृसपिंडाः मातृसपिंडाः शिष्यास्तदर्थं जीविनो वा
संबंधिनो बांधवा वा दद्युः। असगोत्राः सगोत्रा वा पुरुषो वा स्त्री वा प्रथमेन्हि यो दद्यात् दशा
हांतं स एव। प्रथमेन्हि षडंग्यं दशाहांतं तदेव दशमेहन्यधिकं पिंडत्रयं देयं। एकः पिंड
स्तत्सखिभ्यः। इदानीतन शिष्टाचारमध्यमः। दक्षिणतः एकः पिंडो यमाय ततः कर्त्ता प्रार्थिता
बांधवाः संबंधिनश्च त्री स्त्रीन् धर्मोदकांजलीन् दद्युः। ने पाषाणनियमः। ततः सुवासिन्योऽपत्यं

स्मृत्य०

गस्नाताः श्मश्रुकेशवासांसि बालकेशपूर्वाः बालपूर्वाः स्वगृहं गत्वा अन्यभोजनादि स्वगृहे पाके न यथावारं कुर्युः । त्रिरात्राशौचे च दत्तांजलयः । शतांजलयो वा । दत्तांजलिपक्षे प्रथमेऽह्नि त्रयो जलयः । द्वितीये चत्वारः । तृतीये त्रयः । शतांजलिपक्षे प्रथमेऽह्नि त्रिंशत् । द्वितीयेऽह्नि चत्वारिंशत् । तृतीयेऽह्नि त्रिंशत् । पिंडाश्च त्रयः दश पिंडा वा । प्रथमेऽह्नि त्रयः । द्वितीयेऽह्नि चत्वारः । तृतीये त्रयः । सेचनं च द्वितीयेऽह्नि । अनुपनीतस्य पिंडं सूमोदयात् । न बर्हिषि । स्त्रीशूद्र विवाहादर्वागेवं ॥ ॥ आशौचदिनमध्ये पुनः संस्कारे तु दृष्टबधप्रथादिनं संभवे शौच्यं । कालांतरे तु संपेतकार्ये तु दिनं शौच्यमेव । संवत्सरादूर्ध्वं प्रेतकार्यं तु तत्र यथाकालः । अथानुतत्रापि कृष्णपक्षश्रेष्ठा नु । तत्रापि नंदा त्रयोदशी चतुर्दशी च दिनक्षयं च वर्जयेत् । शुक्रे शनैश्चरवारे वर्ज्यौ नक्षत्रे पुनर्वसु तिष्यश्लेषा ज्येष्ठा मघा धनिष्ठादि पंचकं त्रिपुष्कराणि चातिदुष्टानि सर्वथा वर्ज्यानि । व्यतीपाते परिघे वैधृतौ च योगे विष्टिकरणे चतुर्थी षष्ठी द्वादशी अष्टमी चंद्रे वा लिदोषः । रोहिणी मृगशीर्ष पुनर्वसु पूर्वोत्तरा चित्रा विशाखा नुराधा पूर्वाषाढोत्तराषाढा

सार०

॥७०॥

॥७०॥

निद्धिपुष्कराणिवर्ईषदुष्टानिसंभवेवर्ज्यानि। शिष्टान्यदुष्टानिग्राह्याणि। सर्वथादिनशुध्यसं
भवेऽनतिदुष्टं बाह्येन नक्षत्रं ग्राह्यं। न पुनः प्रेतसंस्कारे चांतरं नक्षत्रं ग्राह्यं। निदायां स्वकं बा
रे च तुर्दश्यां त्रिजन्मनक्षत्रेषु एकोद्दिष्टमितिनिषिद्धं। साक्षाद्देकादशाहे श्राद्धएकोद्दिष्टं कार्य
मेव। तत्रतिथिनक्षत्रवारादिकं नैव शोध्यं युगादिमन्वादिसंक्रांतिश्वमावास्यासु प्रेतकार्यपु
नः संस्कारे च किंचिदपि नैव शोध्यं॥ ॥ धनिष्ठापंचकमृते पंचरत्नानि तन्मुखे। न्यस्याहुति
त्रयं दद्यात्कर्त्ता विहरेव पापमिति। ततो निर्हरणं कुर्यादेष साग्नेर्विधिः स्मृतः। इतरं निखनेदेव
जलेवा प्रतिपादयेत्। द्विपदक्षर्यमृते तद्वद्धिरण्यशकलं मुखे। प्रत्यक्षशवे संस्कारे पुनः सं
स्कारे च कर्त्तव्ये ऽष्ठ्यौ द्विष्टाधेरोद्विष्टो भयोद्विष्टास्त्यस्पृष्ट मरणे वद्धे मरणे बद्ध मरणा
दिषु सत्सु त्रीन् कृच्छ्रान् षट् कृच्छ्रान् द्वादशकृच्छ्रान् पंचदश कृच्छ्रान् वा प्रायश्चित्तानि मित्तानु
सारेण श्राद्धे एव वनाल्ग्रहीत्वाशक्तौ तदै पंच्छौ कृच्छ्रप्रत्याम्नायं धेनुहिरण्यरूपं धनधान्यं वस्त्रा
दिदत्वा तदानीं तच्छुद्धिं संपाद्य दहनादिकं कार्यमशक्तौ भक्त्याः पुत्रादयः पित्रादेः पापिनः

श्रुत्य०

सर्वात्मना शुद्धिमिच्छंतश्चेत्प्रायश्चित्तप्रकरणोक्तसर्वप्रायश्चित्तानामन्यतमं योग्यं कृत्वा दहनादि
कं कुर्यात् दहनादिकर्त्तव्याधिकाराभावे एव मेयशुद्धिमात्मनः संपाद्य दहनादिकं कुर्यात् । एवं
मृतस्यात्मनश्चेच्छुद्धिमनापाद्य [illegible]दिना दहनादिके कृते तत्सर्वं नोपतिष्ठते । अंतरिक्षे विनश्ये
ति । उभयोर्नरके छेव । पाषंडीनां वेदबाह्यलिंगिनां सत्यधिकारे अनाश्रमिणां स्वकर्महीनपति
तानां महापातकिनां पुरुषाणां स्त्रीणां च हीनजातिगामिनीनां ब्राह्मणगर्भघ्नीनां भर्तृघ्नीनां कुल
टानां च आपोनाञ्चकेशस्त्राग्निविषोदकोद्बंधनप्रपतनाद्यैर्बुद्धिपूर्वकमात्मघातकानां दहनादि
कं न कुर्यात् । चंडालजलसर्पब्राह्मणवैद्युतदंष्ट्रिशृंगिपशुभिर्बुध्यादभक्षोधादिना मृतानां च दे
हनाद्यौर्ध्वदेहिकादिकं न कुर्यात् । मोहात्कृते नोपतिष्ठते । अंतरिक्षे विनश्यत्युपघातेषां शरीरं गंगा
यां क्षिपेत् । अन्यस्यां महानद्यां वा क्षिपेत् । अतो मीनस्य प्रक्षिपेत् । गृह्याग्निं चतुःपथे । यज्ञपात्रा
णि दहेत् । तेषां शवानां स्पर्शनस्नानालंकारवहनरज्जुच्छेदनदहनाश्रुपातकथादीन् अज्ञा
नतः कृत्वा महासांतपनं चरेत् । ज्ञानात्तेप्तकृच्छ्रं । एतेषामेकैककरणे तज्ञानादुपवासः । मत्या

सार०

॥७९॥

॥७९॥

भ्यासे कृच्छ्रातिकृच्छ्रं चांद्रायणं योग्यतया कुर्यात्। तेषां पाखंड्यादीनां सर्वेषां निष्कृतिर्नास्ति। प्रायश्चि
त्ताकारणं संवत्सरांते लोके गर्हापरिहारार्थं शुध्यर्थं श्राद्धादौ योग्यत्वार्थं च नारायणबलिं च कृत्वा
श्राद्धं कार्यं। अथ तेषामतिविरक्ता भक्ताः शक्ताः प्रायश्चित्ते समर्थाः पुत्रादयः संति चेत्तर्हि आत्म
घातकप्रायश्चित्तं। चांद्रद्वयं तप्तकृच्छ्रचतुष्टयं षड्त्रिंशत्कृच्छ्राणि कृत्वा पाषंड्यादीनां सर्वप्रा
यश्चित्तं योग्यं कृत्वा तद्दैवे कालांतरे वा संवत्सरादर्वाक् दहनादिकं कृत्वा श्राद्धं कुर्युः। अनि
त्यत्वादायुषः। व्यायोमहाप्रस्थानं प्रपतनं गिरिवृक्षादिभ्यः॥ ॥अथ नारायणबलिरुच्यते॥ ॥
कस्यापि च दुष्टलोकादन्यपा ब्राह्मणैरिश्च विष्णुं चैव स्वस्तं यमं च यथावदभ्यर्च्य तत्समीपे मधुघृतप्लुता
न्तिलमिश्रान् पिंडान् विष्णुरूपेण प्रेतमनुस्मरन् प्रेतस्य नाम गोत्रे उच्चार्य दक्षिणाग्रेषु दर्भेषु द
क्षिणामुखो दत्वा गंधाद्यैरभ्यर्च्य पिंडप्रवाहणांतं कृत्वा नद्यां प्रक्षिपेत्। न पत्न्यादिभ्यो देयो।
ततस्तस्यामेव रात्र्यामयुग्मान् ब्राह्मणानामंत्र्य उपोषितः। श्वोभूते मध्याह्ने विष्णुमभ्यर्च्य तत्स
मीपे एकोद्दिष्टविधिना ब्राह्मणादिपादप्रक्षालनादितृप्तिप्रश्नांतं कृत्वा पिंडपितृयज्ञवदुल्लेखनादि

स्मृत्या॰

घनेजंनांतं कृत्वा विष्णवे ब्राह्मणोग्निवायवे यमाय सपरिवाराय चतुरः पिंडान् दत्वा नामगोत्रसहितं
प्रेतसंस्मृत्य विष्णोर्नाम संकीर्त्य पंचमं पिंडं दद्यात्। ततो विप्रानाचांतान् दक्षिणाभिस्तोषयित्वा
तन्मध्ये चैकं गुणान्वितमं ब्राह्मणं प्रेतबुध्या संस्मरन् भूमिहिरण्यादिभिरतिभक्त्या येन संतोष्य ततः
पवित्रपाणिभिर्विप्रैः प्रेतायतिलादिसहितमुदकं दापयित्वा स्वजनैः सहितो भुंजीत॥ ॥सर्पह
तत्वयविनाशः॥ ॥तस्य नागव्रतं कार्यं तत्र संवत्सरे भाद्रपदशुक्लपंचमीमारभ्य अन्यशुक्लपं
चमीमारभ्य वा पंचम्यामुपवासः कार्यः। चतुर्थ्यामेकभक्तं पंचम्यानक्तं कुर्वन् दारुमयं मृ
न्मयं वा नागं पंचफणं कृत्वा गंधैः करवीरैः शतपत्रैः जातिपुष्पैः धूपैर्दीपैरनंतं वासुकिं शंखं
पद्मकं कंबलं कर्कोटकं अश्वतरं धृतराष्ट्रं शंखपालं कालियं तक्षकं कपिलं च पंचम्यां संपूज्य प
श्चाद्ब्राह्मणान् घृतपायसमोदकैर्भोजयेत्। संवत्सरांते चैवं संपूज्य महद्ब्राह्मणभोजनं सौवर्ण
नागदानं गोदानं च कुर्यात्। अथवा उभयोः पक्षयोः पंचमीषु भूमौ नागं पिष्टेन विलिख्य सित
पुष्पैर्गंधैः सितेन गंधेन वा तिलतंडुलैरभ्यर्च्य गव्यक्षीरं मोदकं च भूमौ निवेद्य उपस्थाये

सार॰

वंवदेत्। मुंचमुंचेममिति। तद्दिने मधुरमश्नीयात्। एवमब्दमुक्तविधिना नागमभ्यर्च्य पूर्णे
ब्दे नारायणबलिं कृत्वा सौवर्णनागं गां च दद्यात्। ततः श्राद्धादिकं सर्वं कुर्यात्। बालगोब्रा
ह्मणपशुदंष्ट्रिसर्पाग्न्युदकादिभिः प्रमादान्मरणे चांद्रायणं तप्तकृच्छ्रद्वयं च कृत्वा पद्मापंच
दशकृच्छ्राणि कृत्वा विधिना दहनाशौचोदकदानादि सर्वं कार्यमेव। अनुष्ठानासमर्थजीर्ण
वानप्रस्थादीनामचिकित्स्यगुरुव्याधिपीडितानां वाग्न्युदकाद्यनशनगिरिप्रपतनादिभिर्बु
द्धिपूर्वकमात्मघातकत्वेप्यनुज्ञाते। तेषां विधिवद्दहनं कृत्वा त्रिरात्राशौचं कार्यं द्वितीयेह्नि
संचयनं। तृतीयेह्नि उदकपिंडदानं चतुर्थेह्नि श्राद्धं कुर्यात्। एवमन्येषां विध्यनुगृहीतात्म
घातकानां कार्यं। अभिषिक्तक्षत्रियादिहतानां गोविप्रैरंत्यजैः पशुदंष्ट्रादिभिर्युद्धे बुद्धिपूर्वा
त्मघातकानां पाषंडयना अभिपतितानां सद्यः शौचं। जाताशौचे मृताशौचे चैव त्रेताग्निसाध्याग्नि
होत्रदर्शपूर्णमासाद्या नित्यनैमित्तिकाः क्रियाः कार्याः। औपासनाग्निसाध्याश्च सायंप्रातर्होम
पार्वणस्थालीपाकाद्या नित्यनैमित्तिकाः श्रौतिचोदितौ तत्कार्यो एवा असंभवे हावयेत्। सर्वथा

स्मृत्य॰

नहापयेत्। स्मार्त्तत्वेपि पिंडपितृयज्ञश्रवणाकर्माश्वयुजीकर्मादिकं स्वसगोत्रेण कारयेत् न नहा
पयेत्। यजमानस्तु स्नात्वाऽचम्योद्देशत्यागं कुर्यात्। सर्वं काम्यं वर्ज्यमेव। स्मार्त्तत्वेपि संध्यायां
गायत्र्यांजलिदानं कार्यं। मार्जनं कार्यं न वा। यद्वा प्राणायामान्यत्र त्यक्त्वा मनसा मंत्रमुच्चार्य न मार्जना
दिकं त्वावा वा गायत्रीमुच्चार्यांजलिं दद्यात्। स्मार्त्तानां दानप्रतिग्रहपंचमहायज्ञनित्यश्राद्धस्वा
ध्यायादीनां त्याग एव। नित्यस्नानशौचाचमनभोजननियमानस्पृश्यस्पर्शनिस्नानं च कुर्यादेव।
सूतकान्नभोजने मस्वकुल्यानां न कार्यम्। सकुल्यानां न दोषः कर्तृभोक्त्रोरन्यतरस्य सूतकेज्ञा
तेपि न भोक्तव्यं। उभाभ्यामुपरिज्ञाते न दोषः विवाहोत्सवयज्ञेषु अंतराजननमरणाशौचे पूर्वसंक
ल्पितद्रव्ये न दोषः। तत्रकृतान्नेषु परैरन्नं प्रदातव्यं। दातृभोक्तृन सूतकीनस्पृशेत्। भुंजानेषु वि
प्रेषु तत्र पुष्पिते अन्यगेहोदकाचांताः शुद्धाः। सर्वत्राशौचे लवणमधुमांसपुष्पमूलफलेक्षु
शाककाष्ठतृणपयोदधिघृततैलौषधाजिनेषु नास्त्याशौचं स्वाम्यनुज्ञया स्वयमेव गृहीत
यात्। अन्नसत्रप्रवृत्तानां तंडुलादिधर्पकेषु सर्वेषु पण्यद्रव्येषु च नाशौचं। शवसंसर्गनिमित्ता

सार॰

॥ ८० ॥

शौचं अनुगमनाच्छौचं च राथसंसर्गिणः एयनेन क्रीयपुत्रादीनां उव्यादीनां च अतिक्रान्ताच्छौ
चं च तदुव्याणानास्त्येव। कारुशिल्पिवैद्यदासीदासराजप्रेष्यमूल्यकर्मकराणां सद्यस्नाता
नां तद्व्यापारे नाशौचं। गत्यभावे तु चिरस्थस्य त्वेवस्यात्। स्वविहितकर्मस्वाशौचमस्त्येव का
रवः शिल्पिकरादयः। शिल्पिनश्चित्रकर्मचैलनिर्णेजकादयः। रेतानामृत्विजादीक्षिणाष्ठि
दीक्षितानां यज्ञियं कर्म कुर्वतां मन्त्रसत्रिणां ह्रषुचांद्रायणादिव्रतिनां प्रायश्चित्तत्वेन व्र
त्तव्रतिनां ब्रह्मचर्यादिव्रतिनां च प्रवृत्ते श्राद्धकर्मणि कर्तॄणां निमंत्रितानां भोक्तॄणां यत्किं
चिन्नियमस्थानां अप्रतिषिद्धग्रासनित्यदातॄणां एतेषां यावदुपाधिस्तावदशौचं नास्त्येवा
ब्रह्मचारिणां यतीनां च सर्वदा आशौचं नास्त्येव। अञ्जलिंगादीनां तदानीं स्नानमस्ति। पूर्वं प्रवृत्त
चोलोपनयनविवाहादिसंस्कारकर्मसु पूर्वं प्रवृत्तयज्ञेषु पूर्वप्रवृत्तप्रतिष्ठारामाद्युत्सवेमात्रेषु
पूर्वप्रवृत्ते वृषोत्सर्गादिपाकयज्ञेषु वधूद्वयुद्धार्थविहितेषु शान्तिकर्मसु च स्फोटकादिभिरुप

स्मृ०स्या०

सर्गेण राज्ञभयेन चादेशस्य विप्लवे च विवाहोत्सवदुर्गयज्ञयात्रातीर्थ[illegible]कर्मसु च सद्यः
शौचं लत्तदर्थे शांतिकर्मणि च सद्यः शौचं व्याध्यादिनामुमूर्षावस्थायां तदुपशमनार्थदाने
तथा संकुचितवृत्तेः क्षत्रियश्चांतमातापित्रादिबहुकुटुंबस्य तदर्थयोग्ये प्रतिग्रहे अश्वस्त-
निकस्य च सद्यः शौचं ॥ अतिकष्टादिदेशादिविप्लवे च विशेषेण सद्यः शौचं ॥ एकाहसंचितध-
नस्यैकाहमाशौचं ॥ त्र्यहसंचितधनस्य त्र्यहं ॥ चतुरहार्थसंचितधनस्य च कुंभीधान्यस्य
चतुर्हं कुसूलधान्यस्य दशाहं ॥ आशौचकालमध्येऽनुपपत्त्यपगमे अवशिष्टाशौचमास्यव ॥
एवं दशाहस्थाने त्रिरात्रपक्षिण्येकाहः सद्यः शौच पराणि वाक्यान्यापद्विषयाणि योऽन्यानि समा-
नोदकविषयाश्च संकुचितानि शौचकल्पाः ॥ पक्षिण्येकाह सद्यः शौच रूपाश्चापद्विषयाः येन प्रति-
ग्रहादिनार्त्तिनाशस्तद्विषयाः न सर्वत्र अल्पज्ञाभिनिमित्ते बहुदेवस्य स्वाध्याये सद्यः शौ-
चो आशौचानंतरं सर्ववर्णाः सचैलं स्नानं ततो ब्राह्मणो दक्षिणाहस्तेनापउपनयपठ ध्येत स-
त्रियो वाहनमायुधं वा वैश्यः प्रतोदं रश्मीन्वा ॥ शूद्रो यष्टिं स्पृष्ट्वा शुध्येत ॥ तावत्समपिंडैः सम-

सा०र०

॥८१॥

नोदकैर्वस्त्रयुग्मादिभूषितं नयेयुः। न गृहग्रामाभिमुखं प्रेतं नयेयुः। न शूद्राऽपितानि श्वगृव
त्तृणकाष्ठहवींषि नयेयुः। न नग्नेन न गृहे शवं दहेयुः। धर्मार्थं ब्राह्मणस्यैव निर्हरणं स्नानालं
कारं यहनदहनादिके कृते द्विजानां सचेलस्नानात्सद्यः शुद्धिः। महापुण्यफलं भवति।
तत्राप्यनाथप्रेते अनन्तं पुण्यफलं वायुपुराणवचनात्। धर्मार्थमुत्कृष्टजातेः प्रेतस्य निर्हरणादिके
सचेलस्नानाच्छुद्धिः। धर्मार्थं सजातिप्रेतनिर्हरणादिके सचेलस्नानप्राणायामैः शुद्धिः। धर्
मार्थं हीनजातिप्रेतनिर्हरणादिके सचेलं स्नात्वाग्निं घृतप्राशनादि गृहप्रवेशनान्ते शुद्धिः।
स्नेहादिना स्वजातिषूत्कृष्टजातिषु च प्रेतनिर्हरणमात्रे कृते त्वेकाहाशौचेन शुद्धिः। स्नेहादि
ना स्वजातिनिर्हरणं तद्गृहे स्थितौ त्रिरात्रमाशौचं। स्नेहादिना स्वजातिनिर्हरणे च तद्गृहे स्थिता
नेदन्नाशने दशाहाशौचं नैव शुद्धिः। स्नेहादिना स्वजातिय निर्हरणे तु तज्ज्ञातीयाशौचमेव
कार्यं। अनुगमनं तु स्वजातिष्वपि ब्राह्मणाद्यैर्न कार्यं स्नेहादिना स्वजातिषूत्कृष्टद्विजातिषु चा
नुगमने कृते सचेलं स्नात्वाग्निं स्पृष्ट्वा घृतं वा प्राश्य शुद्ध्येत। घृतप्राशनं शुद्ध्यर्थमेव न भोजन

स्नाने सपिंडे अनुगमनं विहितमेव। हीनजातिप्रसूते यो ब्राह्मणस्य क्षत्रियानुगमने एकाहमाशौचं वै
श्यानुगमने पक्षिणी। शूद्रानुगमने त्रिरात्रमाशौचं कृत्वा समुद्रगायां नद्यां स्नात्वा प्राणायामशतं कृ
त्वा घृतं प्राश्य शुद्ध्येत्। क्षत्रियस्य वैश्यानुगमने त्वेकाहं शूद्रानुगमने पक्षिणी वैश्यस्य शूद्रानुग
मने त्वेकाहं रोदने चैवं। असपिंडस्य दहनादिकरणे पादकृच्छ्रः त्रिरात्रं दशरात्रं वाऽऽशौचं अ
शक्तस्य मरणभये सति शुद्धिः कार्या यथायोग्यप्रायश्चित्तैः शौचस्नानपूर्वकं सिक्तगात्रा स
र्वासा वस्त्रपीडनमन्यवस्त्रधारणं च कृत्वा व्रता निवर्तेत्॥ ७॥ रजस्वलोदीरिता चतुर्थेऽहनि
अन्या स्त्री सचेलमवगाह्याऽऽचम्य दशकृत्वो द्वादशकृत्वो वा स्पृशेत्। अंते वाससस्त्यागः। ततः
रजस्वला शुद्ध्या शक्त्या दानं कृत्वा पुण्याहेन विशेषतः शुद्ध्येत्। आतुरस्नाने प्राप्ते अनातुरो दश
कृत्वः स्नात्वा स्नात्वाऽऽचम्याऽऽतुरं स्पृशेत्। ततः आतुरः शुद्ध्येत्। सूतिकायां मृतायां कुंभजल
मादाय पंचगव्यं क्षिप्त्वा आपो हि ष्ठीय वामदेव्यादि पुण्यर्ग्भिरभिमंत्र्य ब्राह्मणा पावनैः
प्रायश्चित्तं लब्ध्वा तेनैव स्नापयित्वा विधिना दहेत्। रजस्वलां मृतां प्रक्षाल्य पंचगव्येन स्नाप

धित्यावस्थांतराश्राद्धत्तां विधिना दहेत्। अत्रापि ब्राह्मणवचनं कार्यमित्याहुः। यद्वा सूतिकां
रजस्वलां च मलं प्रक्षाल्य स्नापयित्वा काष्ठवद्दग्ध्वा ब्राह्मणवचनं लब्ध्वा अस्थीनि विधिना द
हेत्। अतीताशौचं तु स्वाशौचकालादूर्ध्वं ब्राह्मणादीनां सर्वेषां वर्णानामुपनयनादूर्ध्वं स्त्रीणामू
ढाणां विवाहादूर्ध्वं भवति। तत्र मासत्रये त्रिरात्रं षण्मासे पक्षिणी। नवमासे त्वेकाहो। ततः
परं सचेलं स्नात्वोदकेदानाच्छुद्धिः। इदं सर्ववर्णसमं। अतीताशौचे स्वाशौचकालत्रिसा
दूर्ध्वं स्त्रस्याः। जन्मन्यतिक्रांताशौचं सपिंडानां नास्त्येव। पुत्रजन्मनि पितुः स्नानमस्त्येव। देशां
तरादर्वाकृतनेरेशे मृते स्वाशौचकालादूर्ध्वं श्रुते तद्दशविंशति योजनादिकं त्रिधा विभज्य
आद्ये स्वसमीपभागे त्रिरात्रं। ततो दूरभागे पक्षिणी। ततो दूरभागे त्वेकाहं स्यात्। एवं देश
कालौ पर्यालोच्य यत्रास्याशौचं तदेव ग्राह्यं। अत्रापवाहानिनेवर्द्धयेत्। देशांतरस्थे मृते स्वा
शौचकालादूर्ध्वं श्रुते सर्वेषां सपिंडानां सचैल स्नानं। न त्रिरात्रादि। मातापित्रोर्मरणे दशा
हादूर्ध्वं दूरदेशेऽपि संवत्सरादूर्ध्वमपि पुत्रैः श्रुत्वा मरणश्रवणादिनमारभ्य दशाहादि

स्मृत्य०

कं यथा वर्णं पूर्णमाशौचं कुर्यात्॥ उदकपिंडादिकं वा। महागुरुमरणे चद्वरदेशेऽपि त्र्यतीतेऽब्दे
पि आई यस्त्रोपयासिना तथैवाशौचादिकं कार्यं। स्त्रीपुरुषयोः परस्परं चैवं। सवर्णोत्तमवर्ण
सपत्नीषु चैवं। देशांतरे कालांतरे च हीनवर्णायाः मातुः सपत्न्या मरणे तु पुत्रस्य त्रिरात्रं।
हीनवर्णसपत्नीषु चैवं। संवत्सरे तीतेऽपि सपत्न्योः परस्परं चैवं। दूरं वाशौचं सर्ववर्णसमं।
देशांतरं अनेकधा स्मृतं स्मृतिपुराणतीर्थकल्पेषु। आशौचकालमध्ये यत्र मृतवार्त्ता न श्रूय
ते योजनाद्बहिस्तद्देशांतरं। तच्च योजनद्वयाधिकप्रमाणस्य निषिद्धत्वाद्विधिवशेन विप्र
स्य दशाहाशौचिनो विंशतियोजनैर्देशांतरं। क्षत्रियस्य द्वादशाहाशौचिनश्चतुर्विंशतियो
जनैः। वैश्यस्य पंचदशाहाशौचिनस्त्रिंशद्योजनैः। शूद्रस्य मासाशौचिनः षष्टियोजनैर्देशां
तरं। तथा षष्टियोजनमेकचत्वारिंशद्योजनेऽन्यस्त्रिंशद्योजनमपरे। एतानि योग्यतया
व्यवस्थितानीति केचित्। देशकालस्वगमदुर्गममार्गपर्यालोचनया सर्वेषामविशेषेण
भवंतीत्यन्ये। तथा नियोजनाद्बहिरेव षट्चतुस्त्रियोजनानि त्रीणि देशांतराणि स्मृता

सार०

॥८३॥

॥८३॥

नि। तानि त्रिरात्रपक्षिण्येकाहाशौचविषयाणि तथा भाषाभेदविषमहागिरिव्यवधानानि महा
नदीव्यवधानानि त्रीणि देशांतराणि। द्वादशाष्ट चतुर्योजनानि त्रीणि देशांतराणि तानि समान्यु
क्तानि। तानि त्रिरात्रादिविषयाण्यपि भवंति तानि भाषाभेदादीनि त्रीणि पूर्वोक्तचतुर्विधदेशां
तरेषु संति चेत्। क्रमेण द्वादशाष्ट चतुर्योजनन्यूनानि देशांतराणि भवंति। तथा भाषाभेदमा
त्रे गिरिव्यवधाने नदीव्यवधानानि च त्रीणि देशांतराणि स्मृतानि तानि षट् चतुर्द्वियोजनसमा
नि। तानि च त्रिरात्रादिविषयाणि भवंति तानि च भाषाभेदादीनि च पूर्वोक्ते चतुर्विधदेशांतरे
षु संति चेत् षट् चतुर्द्वियोजनान्यूनानि देशांतराणि क्रमेण भवंति। त्र्यादिशयेति। तिर्य
ग्यवोदराण्यष्टौ वा ऊर्ध्वा वा व्रीहयस्त्रयः। प्रमाणमंगुलस्योक्तं वितस्तिर्द्वादशांगुलः। वित
स्तिर्द्विगुणा रत्निस्ते चतुष्किष्कुः स्यात् धनुः। धनुःसहस्रे द्वे क्रोशश्चतुःक्रोशं तु योजनं। मा
तापित्रगृहे व्यूढायाः पुत्र्याः प्रसवे मातापित्रादिकानामेकाहमाशौचं। तत्र स्थायामरणे ते
षां त्रिरात्रं। गृहांतरमरणे पितृपित्रोरेवं। ग्रामांतरमरणे पक्षिणी। असपिंडे गृहे मृते त्रि

रात्रं सपिंडानामेकाहं । अन्याश्रितास्वपत्नीषु परपत्नीपतिषु च पत्युः पितुश्च त्रिरात्रं । सपिंडा
नामेकाहं । असन्निधौ पितुरेकाहः । सपिंडानां स्नानमित्यादि । अधिकाशौचं सन्निधौ । अस
न्निधौ न्यूनं । इदं च सर्ववर्णसमं । मातापितृमरणे सर्ववर्णेषु व्यूढपुत्र्यास्त्रिरात्रं आलाशौ
चमृताभ्यां चेत्सोदकानां त्रिरात्रं । मातामहगुर्वाचार्यदौहित्रस्वस्त्रियसंबंधिश्रोत्रियबंधुय
ज्ञकर्तृकर्मकृद्दत्विग्याज्येषु गुणिष्वेकग्रामे मृतेषु त्रिरात्रं । ग्रामांतरे पक्षिणी देशांतरे त्वेकाहः ।
अगुणिष्वेकग्रामे पक्षिणी । ग्रामांतरे त्वेकाहः । अनौरसेषु पुत्रेषु क्षेत्रदत्तादिष्वेकाहमाशौचं ।
याज्यर्त्विक्दौहित्रसहाध्यायिसहोपलीतालमबंधुपितृबंधुमातृबंधुश्वशुरमातुलप्रिय
शिष्योपाध्यायानूचानगुरुपुत्राचार्यपुत्रमित्रभागिनेयेषु श्वश्रूभगिनीमातामहीषु मातृष्वसृ
पितृष्वसृमातुलानिगुर्वाचार्यपत्नीषु च मरणे एकग्रामे पक्षिण्याशौचं ग्रामांतरे त्वेकाहमा
शौचं । अगुणवत्सु तु एकग्रामे एकाहः । ग्रामांतरे स्नानं । उपनयनादर्वाचीनसंस्कारपूर्वकं वे
दाध्यापकोगुरुः । मंत्रज्ञानोपदेशकश्चोपनयनपूर्वकं वेदाध्यापक आचार्यः । त्रा [illegible]

स्मार्त्तकर्मस्वाचार्यश्चावेदाध्यापकउपाध्यायोवेदैकदेशाध्यापकश्चानूचानोवेदांगवक्तास
च्छास्त्रवक्ता वा । श्रोत्रियएकशाखाध्यायी । आत्मपितृष्वसुः पुत्राः आत्ममातुःष्वसुःसुताः । आत्म
मातुलपुत्राश्च विज्ञेया आत्मबांधवाः । पितुःपितृष्वसुःपुत्राः पितुर्मातृष्वसुःसुताः । पितुर्मातुलपु
त्रा विज्ञेयाः पितृबांधवाः । मातुःपितृष्वसुःपुत्राः मातुर्मातृष्वसुःसुताः । मातुर्मातुलपुत्राश्च विज्ञे
या मातृबांधवाः । सब्रह्मचारिणि रात्रौ । एकाचार्योपनीतः सब्रह्मचारी । स्वदेशराजमरणे तु दिने
मरणे दिनं समाप्त्याशौचं । रात्रिमरणे रात्रिपर्यंतमाशौचं । ग्राममध्ये शवे स्थिते ग्रामस्य तावदाशौ
चं । क्षत्रियादीनां भूमिरक्षार्थमभिषिक्तानामाशौचं नास्ति । भूरक्षार्थमनन्यसाध्यव्यापारे । भि
षगादौ पुरोहितादेर्नाशौचं । स्वविहितेषु भूपादेरनधिकार एव । स्त्रीविप्रार्थं गवार्थं च संग्रामे
विद्धस्तानां च हतानां सपिंडानां नाशौचं शुद्धक्षतेन कालेन मरणे ग्रामे स्वैरं कुलपतौ च मृते वै
काहं । भगिन्यां संस्कृतायां संस्कृते भ्रातरि संस्कृते मित्रे जामातरि दौहित्रे भागिनेये स्यालके
तत्सुते च एतेषु सवर्णेषु मरणे सद्यः स्नानेनैव शुद्धिः । स्वल्पसंबंधिषु सचैलं स्नानं इत्यादि

सर्ववर्णसमं। सवर्णान्तमेव वर्णान्यां नष्ट भार्यामरणे सह दिने काहमाशौचं। जातस्पर्शे त्रिरात्रं प्रतिलो
मगानां कुलप्रायश्चित्तानामाशौचादिकं कार्यमेव। अकृतप्रायश्चित्तानामाशौचं नास्त्येव। स्वेभि
व्याख्यानामाश्रयस्य त्रिरात्रं सन्निधौ पितृस्त्रिरात्रं॥ ॥जाताशौचमध्ये तत्समे तन्न्यूने वा जा
ताशौचे सति नतन्न्यूने मृताशौचे वा सत्यपि पूर्वशेषेण वं शुद्धिः। जाताशौचमध्ये तु मृताशौचं
समं तेत्वेन पातिला मृताशौचेनैव नत्र शुद्धिः। न जाताशौचेन मृताशौचमध्ये तु तत्समे तन्न्यू
ने वा जाताशौचे सति पूर्वशेषेण वं शुद्धिः। सर्वत्र सूतिकायाः स्वाशौचकालेनैव शुद्धिः। जन्म
मरणनिमित्त स्वल्पकालाशौचमध्ये दीर्घकालाशौचे सति दीर्घकालाशौचेनैव शुद्धिः। न स्व
ल्पकालाशौचेन। मातृमृताशौचमध्ये पितृमृताशौचे सति पित्राशौचेनैव शुद्धिः। न मात्रा
शौचेन। पितृमृताशौचमध्ये मातृमृताशौचे सति पित्राशौचं समाप्य अधिकं पक्षिण्याशौ
चं कुर्यात्। न पित्राशौचेनैव शुद्धिः। मृताशौचे त्रिरात्रिमात्रावशिष्टे मृताऽशौचान्तरे स
ति पूर्वाशौचसमाप्यानंतरं द्वाभ्यां रात्रिभ्यां शुद्धिः। तस्या रात्रेश्चतुर्थयामे मृताशौचान्तरे
सति पश्चात्त्रिरात्रेणैव शुद्धिः। न पूर्वशेषेणैव॥ ॥जाताशौचमध्ये मृताशौचे सति प्रेतमुद्दिश्य द

हनोदकपिंडदानादिकं कार्यमेव । मृताशौचमध्ये जाताशौचे सति जातकर्मादिकं कार्यमेव । मृता
शौचे गते कार्यमित्येके । मृताशौचयोः संनिपाते प्रेतकृत्यं कार्यमेव । जाताशौचयोः सन्निपाते जात
कर्मादिकार्यमेव । तत्र कर्तुस्तात्कालिकी शुद्धिरस्त्येव । स्त्रीपुरुषमरणे एकस्मिन् दहनकाले प्रा
प्ते सवर्णानां समानधर्मीणां पत्नीनां पत्यासह दहने कृत्वा उदकपिंडदानादिकं पृथक्पृथक्
कार्यं । पत्युः पश्चान्मरणे च पत्युः पूर्वं सत्वा पश्चात्पत्न्याः सापिंड्यं कार्यं । असवर्णानामसमानध
र्मीणां सपत्नीनां दहनादिकं सर्वं पृथगेव कार्यं । सवर्णानां समानधर्माणां सपत्नीनां च सदाहः कार्यः ।
नुदकपिंडादिकं ज्येष्ठात्पूर्वं पृथगेवा । असवर्णानामसमानधर्मीणां सपत्नीनां दहनादिकं सर्वं पृथगे
व कार्यं । पितापुत्रयोः सवर्णयोः समानधर्मयोः कपालाग्निदाहयोर्दाहः सहैव । उदकादिकं प
[illegible]गेव । असमानयोः सर्वं पृथगेवा । भ्रातृणां सवर्णानां समानधर्मीणां कपालाग्निदह्या
नां सहैव दाहः । उदकादिकं ज्येष्ठपूर्वं पृथगेवा । असमानानां सर्वं पृथगेवा । बालानां भ्रातृ
णां स्त्रीबालानां च दहने खनने चैव । अन्वारोहणं सर्वजातिस्त्रीणां पतिव्रतानां अग्रास्तं आत्म

स्मृ॰स॰ सार॰

नो सन्तुष्ट्यै सर्वपापक्षयकरं। नरकोत्तारणं अनेकस्वर्गफलदं मोक्षदं च। स्वर्गे तिआयुरारोग्यै
श्वर्यपुत्रमित्रादिसर्वसंपत्प्रदं च। दुःखदारिद्र्यवैधव्यादिनाशकरमित्यादि पुराणस्मृतिषु श्रू
यते॥ छ॥ ॥ तत्रान्वारोहणं गर्भिण्यां निषिद्धं॥ ॥ ब्राह्मणा गर्भिण्या ब्रह्महत्यासमं। क्षत्रियादिजा
तिगर्भिण्यास्तज्जातिवधं वा। सवर्णायाः पत्न्याः पत्यासह एकचित्यारोहणं कार्यं। ब्राह्मण्या एक
चित्यारोहणमेव न पृथक्चित्यारोहणं कार्यं। क्षत्रियादिस्त्रिया भर्त्तरि देशांतरे मृते पृथक्चि
त्यारोहणमेव। असवर्णायाः पृथक्चित्यारोहणं कार्यमेव। तत्रान्वारोहणमेव कार्यं। अत्रान्वा
रोहणं करिष्यामीति संकल्प्य पतिं नमस्कृत्य चितिमारुह्य सर्वं प्रयोगं कारयेत्। यद्वा संकल्पप्र
योगे कृते दह्यमाने भर्त्तरि तं नत्वाग्निं प्रविशेत्। चिन्तितप्रष्टा नारी मोहाद्विचलिता प्राजापत्यं
चरेत्। सहदहनेतु पिंडश्राद्धादौ पाकैक्यं कालैक्यं कर्त्रैक्यं च भवति एकचित्यारोहणे एकदि
नमरणे स्त्रिया पृथक् सपिंडीकरणं न कार्यं भर्त्तुः एतत्स्त्रियाश्च फलं भवति। पृथक्चित्यारोह
णादिनांतरमरणे सर्वत्र पृथक्। सर्वत्र पिंडादिदाने योग्यः पुत्रो देयात्। पुत्राभावे मियो दंप

॥८६॥

ती सपत्न्यश्च तदभावे भ्राता भ्रातृपुत्रः स्नुषा दुहिता दौहित्रः अन्यः सगोत्रः सपिंडः सब्रह्मचारी मित्रं
शिष्यो गुरुर्बांधवो धनसंबंधी वा दद्यात्। न पुत्रस्य पिता दद्यान्नानुजस्य तथाग्रजः। अदत्तानां तु
कन्यानां पितरौ दत्तः अन्याभावे दत्तानामपि पितरौ दत्तः दौहित्रमातामहौ परस्परं दत्तः। मातामह्या
श्च दौहित्रो जामातृश्वशुरौ मिथः। श्वश्रूश्च स्नुषापतिपत्न्याः सहोदरौ तु। भ्रातरौ च मिथो दत्तौ गुरुशि
ष्यौ परस्परं। एकैकेनोत्तमाचेयः कश्चित्तु कुर्यात् कुर्वतः सर्वसंपत्प्राप्तिरिति वेदविद्भिर्ज्ञायते। एका
दशाहादौ पुत्रो ज्येष्ठादिर्योग्यः कुर्यात्। न यस्मात्पूनि षोडशश्राद्धानि विभक्तैः विभक्तैर्वा एकत्रैव कु
र्यात्। सपिंडीकरणं तु विभक्ताः पुत्राः सधनाश्चेदेकस्मिन्नेव दिवसे वृद्धिकामाश्चेत्पृथक् पृथक् कु
र्युः नान्यथा। तत ऊर्ध्वं सर्वं सर्वे पृथगेव कुर्युः। शूद्रस्यामंत्रकं सर्वं द्विजवत्कार्यं। सर्वत्र गोत्रेऽज्ञा
ते नाम्नैव कार्यं। व्रीह्यादिपिंडद्रव्यालाभे फलेन मूलेन पयसा शाकेन गुडेन च तिलमिश्रेण पाक
र्षीं दद्यादाहितं काम्यं सपाणिः स्यात्। अनाहिताग्निर्यज्ञमानां लौकिकाग्निना दहेत्। पत्न्याः पति
परोक्षे कपालाग्नेरस्य तु नास्ति दहनकाले अग्निनाशे दग्धकाष्ठैरग्निं मथित्वा दहेत्। लौकिका

स्मृ०
८७
सार०

न्नो तु स्नात्वैव स्वाहेत्याज्याहुतिं हुत्वा वा दहेत्॥ गतदेहं महाजले वा क्षिपेत्॥ दग्धाहं प्रे
त पिंडं दत्वा प्रस्नात्वा अन्ये कोऽग्रस पिंडस्य त्रिरात्रं सपिंडस्योपवासः॥ मृत्योर्ध्व
कुर्यां॥ प्रेतकृत्यं कुर्वतः स्वयं यदि नाद्यवक्रि स्त्रीसंगमे कृते चांद्रं॥ ऊर्ध्वं कायस्य चैका
र्धं॥ अत्र अन्ये चांद्रं प्रेतान्नो विनां पूर्वं त्रिरात्रं॥ पश्चादुपवासः प्रेतकार्यं कृत्वा तद्
व्यं हरं स्नानं दुर्णवपं प्रायश्चित्तं कुर्यात्॥ पत्न्योश्च परस्परं। देशांतरमरणे
पशकदहयम बोऽरुकं कृत्वा दहेत्॥ दूर देशांतरगते जीवद्वार्तां पुनः पुनः पर्यालो
च्य जीवद्वार्ता यामन्के येन प्रथमवयस्के एकविंशत्यब्दादूर्ध्वं मध्यमवय
स्के पंचदशाब्दादूर्ध्वं अपरवयस्के द्वादशाब्दादूर्ध्वं चांद्रायणत्रयं त्रिंशत्कृ
च्छ्राणि वा कृत्वा पालाशवृंतैः कुशैर्वा प्रतिकृतिं कृत्वा दाहाशौचोदकपिंडश्रा
द्धानि कार्याणि॥ एवं कृते पुनः समागतश्चेत्तं घृतकुंडे निमज्य तस्य जातक

मग्निसंस्कारं कृत्वा पूर्वपत्न्या सह विवाहं कुर्यात् ॥ ६ ॥ प्रथमश्राद्धक्रमः ॥ तत्रा
दौ नवश्राद्धं ॥ प्रथमेह्नि तृतीये पंचमे सप्तमे नवमे एकादशेह्नि विहितं ॥ तत्र
प्रथमे एकादशेह्नि उत्कृष्यते नवाउत्कर्षपक्षे तृतीयाहादिषु पंचाहर्गणि
संज्ञं नवश्राद्धं भवति ॥ अनुत्कर्षपक्षे चैकादशाहादिकस्य विकल्पितत्वा
त्प्रथमाहादिषु पंचाहर्गणसंज्ञं भवेत् ॥ यद्वा प्रथमाहे तृतीयपंचमसप्तम
नवमाहादिष्वेकस्मिन् ॥ एवं त्र्यहर्गणसंज्ञं नवश्राद्धं कार्यं ॥ यद्वा तृतीये
ह्नि पंचमसप्तमयोरेकस्मिन्नवमेह्नि वेत्येवं त्र्यहर्गणमेवं कार्यं ॥ अह
र्युग्मं च न कार्यं ॥ एवं नवश्राद्धमेकादशेह्नि वा कार्यं ॥ तथा चोक्तं श्राद्धा
नि नवमिश्रसंज्ञकानि कार्याणि ॥ सपिंडीकरणादूर्ध्वं नवमात्र विधीय
ते ॥ पंचविंशति मन्त्राणां प्रकुर्यादूनमासिकं ॥ तानि च प्रतिमासं मृताहे

स्म. च.
२२

संवत्सरौविहितानिद्वादशा। तथाद्वादशाहेन्यूनमासेत्रिपक्षेचऊनषण्मासेन्यू
नाब्देचेतिवचनात्॥ एवंषोडशोत्तराघमेकादशोन्हिउत्कृष्टंविधीयते॥ तत्रक्रमः
त्रयोदशेन्हियद्वाहंप्रथमंमासिकंस्मृतं॥ आमेनैवतुकर्तव्यंनपाकेनकदाचन।
त्रिपक्षेद्वादशेपक्षेचतुर्विंशतिपक्षके॥ पक्षंत्रिपंचकंकुर्यादंत्यमध्यादिपंचके॥ ए
कादशाहेद्वादशाहेद्वितीयमासेत्रिपक्षेतृतीयेचतुर्थेपंचमेषष्ठेमासेन्यूनषष्ठे
सप्तमेअष्टमेनवमेदशमेएकादशेद्वादशेमासेन्यूनाब्देचेति॥ ततोपरेद्युःसंवत्स
रांतेसपिंडकरणंततःपरेद्युर्द्वितीयंसंवत्सरादावाब्दिकं॥ तृतीयसंवत्सरादौप्रत्या
ब्दिकमितिक्रमः॥ यद्वापिंडपितृयज्ञेष्ट्याहृत्यपर्श्वअग्निमान्दशाहादूर्ध्वंद्वादशाहे
त्रिपक्षेवावह्निमाहृत्यउपस्थितेआयुषस्यानित्यत्वाद्वाआब्दिकंसंवत्सरात्
सपिंडीकरणंकुर्यात्॥ तत्रषोडशश्राद्धानिकृत्वैवकार्यं॥ तत्रएकादशे

८८
पार्वण

सार.
१८

न्हि चत्वारि श्राद्धानि भवंति। नवश्राद्धार्धं नवश्राद्धांत्यं मासिकार्धं स्वतंत्रैकोदिष्टं चेति। तत्र स्वतं
त्रैकोद्दिष्टे क्रियमाणे अन्येषां तत्रैवानुष्ठानसिद्धिरिष्टतामस्ति। अतः श्राद्धैकोदिष्टं नवमिश्रमित्यु
च्यते। तत्र नवश्राद्धकर्मकर्तुं प्रायदोषो भवति। ततो विशिष्टं नवश्राद्धं। ततो विशिष्टं मासिकं। पृथग्गत्
स्थानपक्षे स्वआदौ स्वतंत्रैकोदिष्टं कार्यं। तत्रोभयदोषमेवाततो नवश्राद्धं। ततो मासिकं। एकाद
शेऽह्नि एकादशब्राह्मणभोजनं प्रेतोद्देशेन रुद्ररूपप्रेतोद्देशेन वा कार्यं। एकादशरुद्रोद्देशेन रु
द्रगणामिति श्राद्धे [illegible] प्रत्यास्यते। द्वादशाहस्थाने न्यूनमासिकं षडब्दादिषु भवति।
संचयने कृते मनुष्यलोकात्प्रेतलोकं गच्छत आमेन पाथेय श्राद्धमेकोदिष्टविधानेन कार्यं। सपिं
डीकरणे कृते प्रेतलोकात्पितृलोकं गच्छत आमेन पाथेय श्राद्धं पार्वणविधानेन कार्यं। ततः पु
ण्याहवाचनं कार्यं। संवत्सरादर्वाक् सपिंडीकरणे कृते अनुमासिकानि पृथक् कुर्यात्। एकोदिष्ट
वत्पार्वणवद्वा। मृताहश्राद्धवदनुमासिकं। ते संवत्सरविमोक श्राद्धे। पुण्याहवाचनं च कार्यमि
ति क्रमः॥ ॥ अथ संन्यासविधिः॥ ॥ १८॥ संन्यासस्य विधिं कृत्स्नं प्रवक्ष्याम्यनुपूर्वशः। गोवि

द राजस्यमतं बौधायनमतं तथा। एकोद्दिष्टविधानेन कुर्याच्छ्राद्धानि षोडश। अग्निमान्पार्वणेनैव विधि
ना निर्वपेत्स्वयं। कृच्छ्रं तु वेतुरः कृत्वा पावनार्थमनाश्रमी। आश्रमी चेत्तप्तकृच्छ्रं तेनासौ योग्यतां व्रजेत्॥
सदैवमार्षकं दिव्यं पित्र्यं मातृकमानुषे। भौतिकं चात्मनश्चांते त्वष्टौ श्राद्धानि निर्वपेत्। केशश्मश्रुरो
मनखं वापयित्वोपकल्पयेत्। यष्टिं जलपवित्रं तु शिक्यं पात्रं कमंडलुं। अनग्निरग्निमुत्पाद्य नित्येनवि
धिना सतः। स्वाग्नावेवाग्निमान्कुर्यादिष्टं पवर्गां समादितः। ग्रामांते ग्रामसीमांते अग्न्यागारे वृक्षमूले वा। आ
ज्यं पयो दधीत्येतत्त्रिवृत्प्राश्योपवासयेत्। अभावे चाप्यपो वा। ॐ भूः सावित्रीं प्रविशामि। तत्सवितुर्वरेण्यं।
ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि। ॐ स्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयादिति
पच्छोर्द्धर्चशः समस्तपादान्ते। ॐ भूर्भुवः स्वः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धि
यो यो नः प्रचोदयादिति। आत्मानमात्मना आश्रमादाश्रममनुनीय ब्रह्मभूतो भवतीति विज्ञायते। अथा
ग्निमुपसमाधाय अन्वाधाय समिद्भिः पूर्वाग्नौ स्वाहेति पूर्णाहुतीर्जुहुयात्। तेनैव ब्रह्मन्नाधानमिति विज्ञाय
ते। अनाहिताग्नेरिष्टेष्टा नैवैश्वानरं वा तु। अनाग्निश्चाग्निहोत्रं तु ब्रह्मचारिणा इष्यते। अग्नीन्समारो
प्य गुरवे सर्वस्वं दत्वा। ॐ भूर्भुवः स्वः संन्यस्तं मया इति त्रिरुपांशु त्रिरुच्चैस्त्रिरस्तु चैत्रिसंन्याहि

॥८९॥

देव्याहिरित्यादिदेवाइति विज्ञायेत। तथा च कात्यायनः। पंचायुधधरं सौम्यं सर्वाभरणभूषितं। ध्या
त्वादित्यं चानुज्ञातो गुरुणा प्रेषमीरयेत्। ततो मात्रे इति चापां पूर्णमंजलिं निनयेत। ॐ सखे मो गोपाये
ति दंडं गृह्णाति। यदस्य पारे रजस इति शिक्यं। येन देवाः पवित्रेणेति स जलपवित्रं। सावित्र्या कमं
डलुं। ससमिव्याहृतिभिर्वस्त्रभाजनं गृह्णाति। ततउदुत्यं चित्रं तच्चक्षुर्हंसः शुचिषन्नमो मित्रस्ये
ति। नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे। त्रयीमयाय त्रिगुणात्मधारिणे वि
रिंचिनारायणशंकरात्मने नम इति आदित्यमुपतिष्ठते। तथा च व्यासः। कटिप्रक्षालनं कृत्वा प्रणवे
न मृदा बहिः। ततः स्नानं प्रकुर्वीत मंत्रवच्चेजलात्रपे। तिस्रस्वपि च संध्यास्व ध्यात्वांजलिं प्रदाय।
ॐ भूः स्तर्पयामि। ॐ भुवः स्तर्पयामि। ॐ स्वः स्तर्पयामि। ॐ भूर्भुवः स्वस्तर्पयामीति तर्पणं कुर्या
त्। अथोदिते भानौ भूर्भुवः सुवरित्यंजलिं प्रदाय। उदुत्यं चित्रं तच्चक्षुः हंसः शुचिषदिदं विष्णु
र्विचक्रमे त्रिर्देवो ब्रह्मेशानीमित्यादित्यमुपतिष्ठते। ॐ सर्वभूतेभ्यो नम इत्यात्मानं प्रदक्षिणी
कृत्य नमस्कुर्यात्। ॐ आदित्याय विद्महे सहस्राक्षाय धीमहि। तन्नः सूर्यः प्रचोदयादिति त्रि

स्मृत्य॰

र्जपेत्त्रिकालं। अथ भिक्षिष्यन्नुद्वयं तमसस्परीति च तस्मिन्नादित्यमुपस्थाय मौनी भूत्वा पंचागा
रं सप्तागारं वा प्रविशेत्। ततः पूर्णमसि पूर्णं मे भूया इति जपित्वा पुनरावर्त्तेत्। शुचौ देशे शुचिर्भू
त्वा चतुरः पिंडान्निर्वपेत्। ॐ भूः स्वधा नमः। ॐ भुवः स्वधा नमः। ॐ स्वः स्वधा नमः। ॐ भूर्भुवः
स्वः स्वधा नम इति। सार्वभौतिकं चतुर्थं शेषं भुक्त्वा प्राणायामान्षडाचरेत्। ब्रह्मभूयाय कल्प
ते ब्रह्मभूयाय कल्पत इत्याह भगवान्बौधायनः॥ इत्यादि स्मृत्यर्थसारे संग्रहे संन्यासवि
धिः॥ ग्रामाद्बहिः प्राचीमुदीचीं वा गत्वा ब्रह्मवृक्षस्याधस्तान्नदीतीरे वा शुचौ देशे वा दंडप्रमाणं
दिग्यजनं व्याहृतिभिः खात्वा सव्याहृतिभिः प्रोक्ष्य दर्भान्संस्तीर्यालंकृत्य शवं निदधाति। श्र
त्रे विशो हव्यं रक्षस्येति [illegible] विष्णुर्विचक्रम इति दक्षिणहस्ते दंडं निदधाति। यदस्य पारे रजस इ
ति सव्यहस्ते शिक्यं। येन देवाः पवित्रेणेति मुखे जलपवित्रं। सावित्र्योदरे ब्रह्मभोजनं। भूमिर्भू
मिमगान्माता तेति गुह्ये कमंडलुं। चित्तिस्स्रुगिति दशहोतृभिरनुमंत्रयेत्। नात्र शेषसंस्कारः। पू
र्वमनुष्ठितत्वात्। सर्वसंगनिवृत्तस्य ध्यानयोगरतस्य च। न तस्य दहनं कार्यं नाशौचं नोदकक्रि

सार॰

॥६०॥

॥६०॥

यति ॥ ॥ अथ संन्यासिनां दहनविधिः ॥ ॥ भूमिभागे खाते । सन्निकृष्टे स्कः संन्यस्ते पितर्युपरते ।
स्कृते: । दहनं तस्य कर्तव्यं यत्रान्यच्छेष संहितं । यस्य समीपे अग्निं प्रज्वाल्य यतेर्दक्षिणहस्ते उ
पारोहेत्स्व वरोह्य तस्याग्निं पुत्रा पितुर्विधानतः । अग्निहोत्रविधानेन सावित्र्या प्रणवेन या दहेत ।
यतीन्दहेन्स्य त्रेन्चा पुत्र लावगाहनादेव सद्यः शुद्धः श्राद्धोत्स्य श्वमेधफलं । अहन्येकादशे
श्राद्धे पार्वणं तु विधीयते । एकोद्दिष्टं न कुर्वीत त्रिदण्डीनां कदाचन । सपिण्डीकरणं तेषां न क
र्तव्यं स्मृतेन तु । त्रिदण्डधारणान्त्रैस्यं न ष्टमा होत्रानामुनिः । कुटीचरं तु प्रदहेत् पूरयेच्च बह
दकं । हंसं जले तु क्षिपेत् परमहंसं विकीरयेत् इत्याह भगवान् बौधायनः ॥ ॥ इत्यादि स्मृ
त्यर्थसारे आशौचप्रकरणं समाप्तं ॥ ॥ अथानुक्रमणिका आदौ परिभाषा ॥ ॥ युगधर्माः ॥ ॥
गर्भाधानादिसंस्कारपरिगणनं । तत्कालदक्षिणामैत्रायश्चित्तं । उपनयनं । षंढादिसंस्कारः वि
धिः । गौणपुत्रपरिगणनं । यज्ञोपवीतादिविधिः । ब्रह्मचारीधर्माः । उपाकर्म तत्कालविधिः ।

स्मृत्य० ततो विवाहविषयनानाप्रपंचः। वरनिर्णयः। पुनश्च विवाहप्रपंचः। अथान्हिकं। तत्र मूत्राद्युत्स- सार०
र्गविधिः। शौचं आचमनप्रपंचः। दंतधावनस्नानतर्पणादिप्रपंचः। संध्योपासनं होमः समि-
धः। होमद्रव्यं तत्प्रमाणं च। अथ दर्भविधिः। बर्हिः। इध्मः। स्रुगादिः। हविष्यद्रव्यं। निषिद्धं च
हविः। प्रतिनिधिप्रपंचः। आपद्धोमः पक्षः। स्वकर्महानिपतनोक्तिः। तत्र निष्कृतिः। देवतार्चन-
विधिः। पंचमहायज्ञाः। अथ श्राद्धानि पार्वणश्राद्धं। एकोद्दिष्टादि। सपिंडीकरणप्रपंचः। अ-
॥६१॥ ष्टकामृताहादिश्राद्धविधिः। महालयश्राद्धं। सपिंडश्राद्धं। संकल्पविधानश्राद्धं। आमहेम-
श्राद्धं। संकल्पितं। अमावास्यामृताहश्राद्धं तिथियुगादिमन्वादिसंक्रांत्यादिनिर्णयः। पर्व- ॥६१॥
निर्णयः। एकादशीनिर्णयः। तिथ्यंतरनिर्णयः। मलमासनिर्णयः। भक्ष्याभक्ष्याणि। भोजन-
विधिः॥ ॥इत्यान्हिकं॥ ॥अथ द्रव्यशुद्धिप्रपंचः॥ ॥तत्रादावुपहतिकारणगणनं। सौव-
र्णरौप्यताम्राणां शुद्धिः। कांस्यादौ। स्रुगादौ। कपित्थादौ। मृन्मये। शृंगादौ। कंदमूलफला-

दौ। वस्त्रादौ। धान्यादौ। तृणचर्मादौ। पुस्तकोपरि तलादौ। प्रतिमास्वजले। अन्येषु घृतादौ। रसो गुडा
दौ। भोजनोऽन्नादौ शुद्धिः। अन्यमुखादेरदोषोक्तिः। श्वकाकादिधूलिपातादौ दोषोक्तिः। इत्यादि
चंडालस्पृष्टिकोदक्यापतितादिस्पर्शे। तत्स्पृष्टे। तत्स्पृष्टादौ च स्नानमादिनाशरीरशुद्धिप्रपंचः। ततो
नित्यनैमित्तिकस्नानानि। रजस्वलासूतिकाया विशेषोक्तिः। इत्यादि स्पृष्टास्पृष्टशुद्धिः॥ ॥अथाशौ
चविधिः॥ ॥तत्रादौ गर्भस्रावपाते प्रसवे। जन्माशौचमध्ये शिशुमरणे नामकरणात् पूर्वं मरणे
दंतजननात् पूर्वं मरणे त्रिवर्षात् पूर्वं मरणे एते ष्वनेकधाशौचानि। स्त्रियाशौचभेदः। उपनयनात् पूर्वं वि
हिताग्निभिर्विधिवद्दाहः। स्वजात्याशौचसंग्रहणोक्तिः। वपनविधिः। पुनः संस्कारः। तत्रादौ शौच
भेदः। विदेशस्थे शेषाशौचविधिः। हीनवर्णे सपिंडस्योत्कृष्टाशौचविधिः। दत्तकस्याशौचं प्रतिलोमजानां
चाशौचः। स्नानोदकविधिः। आश्वासः। जलाशीरस्थापनं। दहनदिने अन्नलाभप्रकारः। आशौचनि
यमः। अंजलिसंख्यामातामहाद्युदकदानं। अस्थिसंचयनं। प्रतिप्रहे चारिणोऽन्यप्रेतहत्यनिषे
धः। पित्रादौ विधिः। पतितानां दाहोदकादिकर्तृत्वनिषेधः। पिंडविधिः। कर्तृद्रव्यनियमः। दत्ता

स्मत्य०
६

माहविधिः। त्रिरात्राशौचं जलपिंडादिविधिः। मृतानां प्रायश्चित्तोक्तिप्रपंचः। दाहाधिकारिणश्च। सार०
पाषंडिपतितानां चंडालोच्छंडालौकादिमृतानामात्मघातकानां मृताशौचादिनिषेधः॥ तत्र बलिह
रणप्रायश्चित्तं पाषंडादिनिष्कृतिः॥ ॥ नारायणबलिश्च॥ सर्पहते विशेषोक्तिः। प्रमादेन चंडा
लादिहतानां दाहादिविधिः। विध्यनुग्रहीतात्मघातकानां दाहादिविधिः॥ आशौचे होमसंध्या
दिविधिः। लवणमधुमांसादेराशौचे निषेधः। कारुशिल्पिवैद्यादीनां शिल्पादिषु चक्र
चिमादीनां च पूर्वप्रक्रान्तकर्मादिषु च। शवनिर्हरणगमनादिविधिनिषेधप्रायश्चित्तानि। उ
॥६२॥ क्रांतिकालशुद्धिः। ज्वलितनरस्थलायां मरणे शुद्धिः। अतीताशौचविधिः। देशांतरे चाशौ
दिप्रपंचः॥ असगोत्रासपिंडाशौचादिप्रपंचः॥ आशौचानां सन्निपातप्रपंचः॥ सहदहना ॥६२॥
दिविधिः। अन्वारोहणादि। पिंडाधिकारविधिः। प्रायश्चित्तविधिः। अन्वारोहणादिपि
डाधिकारविधिः। प्रायश्चित्तादिविधिः। देशांतरविज्ञातमरणे च विधिः। श्राद्धक्रम
संन्यासविधिः। लक्षसंस्कारादि। इदं स्मृत्यर्थसारं तु मल्लौं स्मरणात्तद्धुना॥ नाचमा
न्यं सतां मलं पश्यंते च बुधः [illegible] तः॥ ॥ विश्वामित्रगोत्रमहामहेश्वरनागवि

स्तुभट्टोपाध्यायसूनुनापन्नूनाश्रीधराचार्येणश्रुतिस्मृतिविदाकृतेस्मृत्यर्थसारेआचारप्रकरणं
समाप्तं ॥ ॥ श्रेयः ॥ ॥ अथप्रायश्चित्तप्रकरणं ॥ श्रोत्रियानांयाजनंकृत्वापरेषामल्पकर्मवाअतिचारमही
नंचत्रिभिःकृच्छ्रैर्व्यपोहति ॥ छ ॥ ॥ १८५ ॥ ॥ स्वस्तिश्रीगणेशायनमः ॥ ॥ कामधेनौप्रदीपाब्धौकल्पवृ
क्षलतादिषु । शंभुःडविडकेदारलोल्लटाद्यैश्चभाषितं । मन्वत्रियाज्ञवल्क्यादिव्याख्यातृप्रतिपादितं । स्मृ
त्यर्थसारंवक्ष्यामिस्वखानुष्ठानसिद्धये ॥ ॥ अथप्रायश्चित्तान्युच्यंते ॥ ॥ तत्रपापीनामाचीर्णप्रायश्चित्ता
नांनरकभोगांतेयेकर्मविपाकाःस्युःतेइहोच्यंते । अज्ञानाद्ब्रह्महाश्वगर्दभशूकरोष्ट्राणांयोनिंयाति ।
सुरापःखरपुल्कसवेनानां । सुवर्णस्तेयीविट्जन्यकृमिकीटपतंगत्वं । गुरुतल्पगस्तृणगुल्मलतात्वं
क्रमाद्याति । ज्ञानाद्ब्रह्महामृगश्वसूकरखरोष्ट्रगोजाविमृगपक्षिचंडालपुल्कसानांयोनिंयाति । ज्ञाना
त्सुरापोविट्कृमिकीटपतंगपक्षिहिंस्रसत्वानांयोनिंयाति । सुवर्णस्तेयीऊर्णनाभकृकलासतिरश्चां
वांबुचारिणांचहिंस्राणांपिशाचानांसहस्रशोयोनिंयाति । गुरुतल्पगस्तृणगुल्मलतानांक्रव्यादानां
क्रूरकर्मणांचयोनिंयाति । नहस्संयोगीचतद्वत् । ततोमनुष्यजन्मनिब्रह्महाक्षयरोगीस्यात् । सुरापोनि

स्मृ०सं०

सार०

जलस्रुदंतः। स्वर्णस्तेयी कुनखी। गुरुतल्पगः कुष्ठी। तत्संयोगी च तद्वत्। परस्य स्त्रियं षंढ्यं च हत्वा
अरण्ये निर्जले देशे ब्रह्मराक्षसः स्यात्। अनध्याप्याध्यापिते हत्वा दुष्प्रतिग्राही च। अन्नं रत्नं वा हृत्वा
अजीर्णव्याधिः स्यात्। तद्दरिद्रो वा। ज्ञानं वेदपुस्तकं च मूकः। पत्रशाकं मयूरः। हेमरत्नानि हेमकारीप
क्षी। अत्यंतदरिद्रो वा। न्यासमनपत्यो दरिद्रो वा। स्रूगंधान् छुछुंदरी। राजमूषिकाख्या। धान्यानि मू
षकः। तैलं तैलपायी कीटकः। परस्व हर्ता नानानिर्यरूस्यात्। अद्भुतं हविरनश्नं हृत्वा खा अति
दुःखी वा। यानं हरन्नुष्ट्रः। फलं कपिः। जलं जलप्लवः। पत्रं गोवी पक्षी मत्स्यो वा। क्षीरं कोकौबकाको
वा। गृहोपस्करं गृहहारी कीटः। मधु दंशः कीटो वा। मांसं गृध्रः। गां गोधा सर्पो वा। अग्निं बकः। वस्त्रं कु
छापं तं गोवा। रसं श्वा। लवणं चरीकीटः। तैजसं मंडली। गोहृद्र आहत्य स्वं पांडुरोगी। न्यासं क्राणः। अ
नपत्यो वा। स्त्रियां क्षपणकः। शंखं शुक्तिं हरन् कपाली। दीपो कौशिकः। स्नेहं क्षयी। पशुं परत्रैष्यः।
यद्यद्धपहरति तत्तत्स्वकोऽरः प्राणी जायते तेत्साध्यविकलो वा। आहत्यां गच्छन् निर्बंजी। मातरं स्नु
षां वा वातवृषणः। चंडाली पुल्कसी वा अजगरः। प्रव्राजितां मरुपिशाचः। शूद्रां दीर्घकीटः। सवर्णां द
रिद्रः। राजस्त्रियं नपुंसकः। गां गच्छन्मंडूकः। धान्यमिश्रको गिरिकोगः। पिशुनो दुर्गंधिनासिकः॥ ॥

॥९३॥

॥९३॥

स्त्र बंधो दुर्गंधास्यः। देवब्राह्मणाक्रोशकः खल्लतिः। गरदोग्निदो उन्मत्तो। गुरुप्रतिहंता अपस्मारी रोगी।
धर्मपत्नीमुत्स्कान्यत्रप्रवृत्तः न्रा ब्देवधी घ्राणी। कुंडाशी जंगक्षः कः। स्त्रीपण्यजीवी खंजः। कौमारदार
त्यागी दुर्नखः। मृष्टैकाशी वानरो वा तनुश्मीवान्। अभक्ष्यभक्षको गंडमाली। क्रूरकर्मा वामनः। मित्रध्रु
क् क्षयी। मातापित्रोराक्रोशी ऽखंड कारो नृतवा कृ स्वस्त्नु वा कृ। कूटसाक्षी उच्छूनजंघा चरणः। विवाह
विघ्नकर्ता छिन्नोष्ठः। ब्राह्मणावगूरणे छिन्नहस्तः। चतुष्पथे विण्मूत्रविसर्गे मूत्रकृच्छ्री। कन्यादूष
कः षंढः। ईर्ष्यालुर्मशकः। पित्रादिवेदमानो अपस्मारी। विद्याविक्रयी पुरुषमृगः। वेदविक्रयी द्वीपी। शूद्र
याजको जलप्लवः। अपाङ्क्त्ययाजको वृगाहः। अग्निमंत्रिलप्तो जीवापसः। यलस्तेनोश्मन्तार्जोरः। कक्ष
वनदाही खद्योतः। दारिकाचार्यो विगंधः। पर्युषिताशी कृमिः। अदत्तदायी बलिवर्द्धः। मत्सरी भ्र
मरः। अग्न्युत्सादी मंडलकुष्ठी। शूद्राचार्यः श्वपाकः। वार्धुषिको गहीनः। अविक्रेयविक्रयी गृध्रः। राज
कोशाकोगदूतः। अनध्यायाध्यायी शृगालः। मत्स्यवधे गर्भवासी इत्यादीनि उनूर्ध्वंगमनानि। स्त्रि
योप्येषु निमित्तेषु तत्तज्जातिषु स्त्रियो जायंते। एवं तत्तत्पातकानां प्रायश्चित्तोमुत्तवशाचं पूर्वजन्मविपा
कादर्शिताः।। ।। ब्रह्महा सुरापो ब्राह्मणस्वर्णस्तेयी गुरुतल्पगः।। ।। एते महापातकिनः। अबंत

स्मृत्यं॰ सार॰

संयोगी पंचमश्चेनद्वत्। साक्षात्कर्त्ता अनुग्राहकः। आज्ञापयिता। अर्थ्यस्य थ्रपितोपदेष्टा च प्रयोजयिता।
स्वार्थं परार्थं वानुमंता अनिमित्तं भर्त्सनताडनार्थहरणादिना कोपं जनयन्निमित्तकर्त्ता तत्र कर्त्तृषु सा
क्षात्कर्त्तुरनुग्राहकस्याल्पो दोषस्तस्मात्प्रयोजकस्यात स्मादुपदेष्टुः। प्रयोजकादनुमंतुस्तस्मान्निमि
त्तकर्त्तुरल्पं प्रायश्चित्तं च नद्वत्॥ ॥अथोपपातकानि॥ ॥तत्र ब्रह्महत्यासमानि। यागस्थस्य क्षत्रियवैश्य
यो र्वधः आरणागतस्य वा रजस्वला गर्भिण्या अत्रिगोत्राया वाग्ना विज्ञातगर्भस्य च सुहृन्मात्रस्य
च वधः। गुरुविषयेऽलीकाज्ञानं मिथ्याभिशंसनमधिक्षेपो सकृन्मत्या निर्बंधश्च राजगामि पैशून्यं
॥२५॥ गुरोर्महादूषणं नास्तिक्यात्। वेदनिंदा। कृताध्यायस्याभ्यासाभावे वेदनाशनं च॥ ॥अथ सुरापानसमानानि॥ ॥२५॥
लसुनविड्वराहछत्राकग्रामकुक्कुटपलांडुगृंजनादीनां मत्या भक्षणं गुरुविषये मिथ्याभिशंस
ने नान्यपोढिते मन्यपूर्वत्वे वा। जैह्म्यं कौटिल्यं वा तद्वत् आत्मनोत्कर्षार्थं राजकुलादावनृतोक्तिः।
उदक्यावक्त्रास्वादो मित्रवधः। कूटसाक्ष्यवदत्या गोवेदनिंदा तयोरन्नस्य भुक्तिः॥ ॥अथ सुवर्णस्ते
यसमानानि॥ ॥ब्राह्मणासंबंधि अश्वरत्नमनुष्यस्त्रीभूम्युधेनुहरणं निक्षेपस्य चापहृतिः सुवर्णसमा

नात्॥ अथ गुरुतल्पगसमानानि॥ स्नुषाभगिनीसगोत्रा चंडालीसखि
भार्या अंत्यजातिकन्यासु रेतः सेकः तथा पितुः स्वसारं मातुः स्वसारं मातुला
नीं मातुः सपत्नीं भ्रातृपत्नीं स्नुषाभगिन्यौ जाया पपत्नीं आचार्यत
नयां श्वश्रूं पितृव्यमातामह मातुलश्रोत्रियर्त्विगुपाध्यायमित्रशिष्य स्त्रि
यं गुरुतमां मुदक्यां निक्षिप्तां प्रव्राजितां व्रतस्थां गुरुत्तमां प्राप्तयौ निरयाणां सगोत्रां
तां मातुः सखीं राजपत्नीं स्तान्यधात्रीं उपमातरं स्वसुः सखीं स्वस्त्रियां स
खीं च गच्छन् गुरुतल्पगवत्सद्यः पतति॥ तथा पितृमातृयोनिसंबंधाग
तस्तेन नास्तिक निंदितकर्माभ्यासि पतितात्यागि अपतितत्यागिनः
पतिताः पातकसंयोजकाश्चेत्यनुपातकानि॥ अथोपपातकानि॥ त
त्र याज्ञवल्क्यः॥ गोवधो व्रात्यता स्तेयमृणानां चानपक्रिया॥ अना

स्मृ॰स्या॰ सार॰

हिताग्नित्वमृपण्यविक्रयपरिवेदनं । भृतादध्ययनादानं भृतकाध्यापनं तथा । पारदार्यं पारिवित्त्यं
वार्धुष्यं लवणक्रिया स्त्रीशूद्रविट्क्षत्रवधो निंदितार्थोपजीवनं । नास्तिक्यं व्रतलोपश्च सुतानां चैव वि
क्रयः । धान्यकुप्यपशुस्तेयमयाज्यानां च याजनं । पितृमातृसुतत्यागस्तडागारामविक्रयः । कन्या
संदूषणं चैव परिवेदकयाजनं । कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनं । आत्मनोर्थे क्रियारंभो म
द्यपस्त्रीनिषेवनं । स्वाध्यायाग्निसुतत्यागो बांधवत्याग एव च । इंधनार्थं द्रुमच्छेदः स्त्रीहिंसौषधिजी
वनं । हिंस्रयंत्रविधानं च व्यसनं चात्मविक्रयः । शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणं । तथैवा
नाश्रये वासः परान्नपरिपुष्टता । असच्छास्त्राधिगमनमाकरेष्वधिकारिता । भार्याया विक्रयश्चैषामे ॥६५॥
॥६५॥ कैकमुपपातकं । गोर्वधः प्रसिद्धः । काले ऽनुपनीतत्वं व्रात्यत्वं । ब्राह्मणसुवर्णातिरिक्तसुवर्णादेरप
हरणं स्तेयं । गृहीतस्य वस्त्रस्य ऋणादेरप्रदानमृणानपाकरणं दैवर्षिपितृऋणानपाकरणं वा
सत्यधिकारे अनाहिताग्नित्वं । अपण्यस्य लवणादेर्विक्रयः । अपण्यविक्रयः । सोदरे ज्येष्ठभ्रातरि
स्थिते कनिष्ठस्य दाराग्निहोत्रग्रहणं परिवेदनं । पणं कृत्वाध्ययनं पणं कृत्वाध्ययनं वा । भृतकाध्ययना
ध्यापनं । गुरुतल्पतत्समव्यतिरिक्तपरस्त्रीगमनं पारदार्यं । कनिष्ठस्य विवाहे ज्येष्ठस्य विवाहरा

हिंस्यं पारक्षित्यं। निषिद्धवृत्त्युपजीवनं वार्धुष्यं। लवणस्योत्पादनं लवणक्रिया। अनात्रेय्या आग
मिण्या अपि स्त्रिया वधः स्त्रीवधः। शूद्रवधः। अदीक्षितक्षत्रवैश्यवधश्च। अरुजस्यापि नार्थजी
वनं निंदितार्थोपजीवनं। परलोकाभावबुद्धिर्नास्तिक्यं। ब्रह्मचारिणः स्त्रीसंयोगे व्रतलोपः। देवता
राधनाद्यर्थं गृहीतव्रतलोपश्च। अपत्यानां विक्रयो दासीभार्यार्थं। आत्मनो भार्यापश्च तद्वत्। तडा
गारामोपवनादेर्विक्रयश्च अव्ययग्रहणं नेता। व्रीह्यादिधान्यहरणं स्तेयं। असारद्रव्यं त्रपुसीसकादिकु
प्यस्य। गवादेः पशोश्च। अतिदुष्टशूद्रादीनां याजनं। कर्मदुष्टव्रात्यादीनां च याजनं। भोजनं चोभय
त्र। अपतितानां पितृमातृसुतानां गृहान्निर्गमस्त्यागः। अंगुल्यादिना योनिविदारणं कन्यादूषणं।
परिवेदकयाजनं। तस्मै कन्याप्रदानं च। गुरोः कौटिल्यं। आत्मार्थं पाकादिक्रिया। मद्यपायास्त्रियाश्चो
पभोगः। कुटुंबरक्षणार्थं स्वाध्यायस्य वत्सरस्य त्यागः। अधिगमनं। श्रौतस्मार्ताग्नीनां च। संस्काराद्य
करणेन सुतस्य वा। शक्तौ त्यागः। बांधवानां च। पाकादिद्रव्यकार्यार्थं वार्द्रद्रुमच्छेदः। भार्यावेश्याभा
वेन प्रयोज्य तल्लब्धोपजीवनं स्त्रीशक्तौ स्त्रीधनोपजीवनं वा प्राणिवधेन जीवनं हिंसाजीवनं जाल
बडिशादिविधानां च स्याद्यर्थौषधीजीवनं। तिलेक्ष्वादिपीडनार्थं हि स्वयंत्रप्रवर्त्तनं महायंत्रप्र

स्मृ॰प॰ ।।९६।।

वर्त्तनं वा व्यसनानि मृगयादीन्यष्टादश। शूद्रसेवा शूद्रप्रेष्यं हीनेषु मैत्री हीनसख्यं। असवर्णापि वा हस्यहीनवर्णविवाहो हीनयोनिनिषेवणं। साधारणस्त्रीसंभोगः। अगृहीताश्रमत्वमनाश्रमित्वं परान्नपुष्टता परपाकरतिः। चार्वाकादिग्रंथाभ्यासो सच्छास्त्राधिगमः। स्वर्णाद्युत्पत्तिस्थानेषु राजाज्ञयाधिकारित्वं महाकरेष्वधिकारित्वं। आभिचारश्च। लशुनादेरभक्ष्यभक्षणमित्यादीनि।। छ।। अथ जातिभ्रंशकरसंज्ञानि।। ब्राह्मणस्य रुजः करणं। आघ्रेयमद्यघ्राणं। जैह्म्यं पुंसि मैथुनं।। ।। अथ संकरीकरणानि।। ।। खराश्वोष्ट्रमृगेभाजाविमीनाहिमहिषाणामन्येषां वा ग्राम्यारण्यानां पशूनां वधादि।। ।। अथापात्रीकरणानि।। छ।। निंदितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं कुसीदजीवनं। असत्यभाषणं।। ।। अथ मलिनीकरणानि।। ।। बकुकृमिकीटजलस्थलजेचरयोर्हत्या मद्यानुगतभोजनं। बकुफलैधःपुष्पस्तेयं वा। अधैर्यं च। अतोन्यानि पापानि प्रकीर्णसंज्ञानि।। ।। अथ महापातकप्रायश्चित्तानि।। ।। अज्ञानात् ब्राह्मणस्य शिरःकपालं चिन्हार्थं धारयं स्तद्लाभे न्यस्यानाथस्य ब्राह्मणस्य वा तदन्यस्य वा शिरःकपालं वि

सार॰ ।।९६।।

होर्थं व्यजेद्देहं धारयन्त्वन्योर्मृत्योर्येरेकधारं पत्रामत्रादिषु भिक्षाशी संयतस्त्रिकालस्नायी
संध्योपासनं च विधिवन्मंत्रपूर्वकं कुर्वन्नध्ययनाध्यापनप्रवचनयजनयाजनप्रतिग्रहादि
वर्जयेत्। ब्रह्मचारी स्त्रीमधुमांसगंधमाल्यादिवानिडंजनो संजनोपानच्छत्रकामक्रोधलो
भमोहहर्षनृत्यगीतपरिवादादिवर्जयेत्। सर्वपरहितेर्वाराघसंदर्शनेपथोपक्रामेत्।
स्थानासनाभ्यां विहितनीर्थान्यनुचरन् वने वा पुण्याश्रमे वा कुटीं कृत्वा निवसन् ग्रामांते गोव्र
जे वा वृक्षमूले वा द्वादशाब्दमेव व्रतं चरित्वा शुद्ध्यः। यदि वन्यैर्न जीवति तदा भिक्षार्थं ग्रामं
प्रविशेत्। तत्र लोहितकेन मृन्मयेन खंडशरावेण वा गृहद्वारे स्थित्वा ब्राह्मणहास्मीति तिष्ठ
न स्वपापं प्रख्यापयन् सप्तागाराणि मृष्टामृष्टाद्वियैके वा तुर्वर्ण्ये त्रैवर्ण्ये भैक्ष्यं याचित्वा एक
कालमेव मिताशी द्वादशाब्दव्रतं चरित्वा शुद्ध्यः। यद्वा द्वादशाब्दं निमलः प्राजापत्यं कृच्छ्रं निरंतर
मावर्त्य षष्ठ्यधिकत्रिंशतं चरित्वा शुध्यति। द्वितीये ब्रह्मवधे द्विगुणं प्रायश्चित्तं। तृतीये त्रिगु
णं। चतुर्थे न निष्कृतिः। यद्वा चतुर्थादिषु प्रतिपापं गोसहस्रं निर्धनो ग्निप्रवेशो मरणांतं वा

स्मृ॰सा॰

कुर्यात्। षोडशाब्दादूर्ध्वं अशीतिवर्षांतं स्वयमेव चरेयुः॥ ॥ गुरुप्रायश्चित्ते लघुप्रायश्चित्तस्यांत
र्भावेन प्रसंगादनुष्ठानसिद्धिः सोमयागस्थब्राह्मणवधे द्विगुणं व्रतं। तदशक्तौ गवां सहस्रं ब्राह्म
णेभ्यो विधिवद्दद्यात्। आचार्यवधे द्वादशाब्दव्रतं गोसहस्रं च पादोनमर्धं पादं उपाध्यायव
नूचानपुत्रर्त्विक्षु वधे द्वादशाब्दव्रतादूर्ध्वं गोसहस्रव्रतं वादित्याद्यप्यूहनीयं तारतम्येन
कल्प्यं। तथामरर्त्विक्षु वा गुरुवधे यावज्जीवं व्रतं चरेत्। त्रिगुणं चतुर्गुणं वा। तदशक्तौ द्वादशा
ब्दव्रतं द्वे वा गोसहस्रे च कुर्यात्। यदि द्वादशाब्दव्रतमध्ये चोरव्याघ्रादिभिर्हन्यमानं कं ब्राह्मणं
गां द्वादशकं वात्मानमंतरे कृत्वा रक्षेत्तदा सावसंपूर्णद्वादशाब्दोपि तदैव शुध्यति। यदि तत्र प्रवृत्तस्य
देहत्वेव म्रियते तथापि तदैव शुध्येत्। अपराश्वमेधादि महायज्ञावभृथे यजमानसन्निधौ स्वपाप
मभिज्ञां विख्याप्य तैरनुज्ञातः। स्नात्वा तदैव शुध्यति। यद्वा व्रतमध्ये कुष्ठादिदीर्घतीव्रव्याधिग्र
स्तं ब्राह्मणं गां वौषधैः संरक्ष्य तदैव शुध्येत्। यद्वा व्रतमध्ये विप्रस्य भूहेमादि सर्वस्वं चोरैर्हृतं
स्वसामर्थ्येन आनीय सर्वं दत्वा शुध्येत्। तत्र प्रवृत्तः सोहतो वा तदैव शुध्येत्। बहूक्तानामनुकल्पे
याजीवन्नपि तदैव शुध्येत्। ज्ञानाद्ब्रह्मवधे चतुर्वर्णाः परगुप्ततनेमग्निप्रवेशं वा कुर्युः। तत्र य

सार॰

॥९८॥

॥९८॥

त्रैवर्णिकाः इष्टप्रमपन्नास्तेग्निपतनं वा स्वर्जितं गोसवमभिजिद्विश्वजितौ त्रिवृदग्निष्टुतं वाक्र
मेणाल्पदक्षिणं कुर्युः। क्षत्रियं सार्वभौमं अश्वमेधं कुर्यात्। यथेष्ठानां त्रैवर्णिकाः साग्निका
महापापं कुर्युस्तदग्निना दोषक्षयात्पुत्रादयो रक्षेयुः। ज्ञानाद्वेतरगृह्याग्निं शमयेत्। व्रतानि कान
स्य अक्षिपेत्। अग्निपतनादिप्रायश्चित्तकरणं कुर्वतां मरणाच्चैवं सपरिच्छदं। विद्वांश्चेत् निर्धनो
गुणिहंता हतानिर्गुणोरण्येनियतस्त्रियोरं चेदर्जयेत्। अज्ञानकृच्चैद्दर्जयेन्योजनशतं प्रज्ञे
त्। अविद्वान्निर्धनो गुणी हत्वा प्रव्रजनादापश्चिमोदधेः प्रतिस्रोतः सरस्वती हविष्यमीता
श्रीगच्छेत्। निर्गुणो धनी हंता वत्पात्रं गृहं भूहेमादिजीवनसमर्थं दद्यात्। गृहं वा सोपस्करं
जीवनसमर्थं। अनपत्यश्चेत्सर्वस्वं। एतत्रयेऽन्यतमं गृहीत्वा आहिताग्नेर्वैश्वानरेष्टिमनाहि
ताग्निर्वैश्वानरस्थालीपाकं कुर्यात्। हंता अत्यंतमूर्खो निर्धनो विप्रमात्रवधः तु आयी त्रिषवणी
स्वकर्मचेदयश्चोक्ष्यानी महानदीसंगमादिपुण्याश्रमगोष्ठपर्वतप्रस्रवणतपोवननिहारी
स्थानदिरासनी यत्सेरक्षः कृच्छ्रवरितत्वा रत्नहेमगोधान्यतिलदधिसर्पींषि विप्रेभ्यो दद्यात्।
मनसा ब्राह्मणसायधेव्यवसायं कृत्वा स्वयमेवोपरतो द्वादशाहं जलाशी द्वादशाहमुपवसेदित्या

स्मृ०स०

दि। अन्यत्र समेषु विकल्पो विषमेषु व्यवस्था कल्प्या। उक्तानि द्वादशाब्दादीनि ब्राह्मणस्यैव। द्वि
गुणं क्षत्रियस्य त्रिगुणं वैश्यस्य शूद्रादेश्चतुर्गुणं। तत्रापि हंतुर्हन्यमानगुणविशेषेण प्राय
श्चित्तविशेषोऽपि। एवं क्षत्रवैश्यपादावपि हीनोत्कृष्टबाधप्रायश्चित्ततारतम्यं दंडगौरवात्क
ल्प्यं। अनुलोमप्रतिलोमजानां तु दंडवत्प्रायश्चित्तं गृहस्थाद्द्विगुणं ब्रह्मचारिणो वानप्रस्थस्य
त्रिगुणं यतेश्चतुर्गुणं। ब्रह्मचारिणो द्विगुण्यं षोडशाब्दादूर्ध्वमेव सर्वप्रकरणं तत्प्रायश्चित्तस्य म
ध्यमरणांतदैवप्रसुथश्चित्तः॥ अथातिदेशाः। सोमयागस्थक्षत्रियवैश्यवधे ब्रह्महत्याव्रतं द्वादशा
ब्दादिकं चरेत्। ज्ञानाद्द्विगुणमप्येवमेव शत्राणांलिकं। तत्र च जातिशौल्क्यगुणाद्यपेक्षया व्यवस्था सर्व
त्रा। स्त्रीपुंनपुंसकत्वेनाविज्ञातगर्भस्य वधे ऽनुमत्या आत्रेयी अत्रिगोत्रा वा आत्रेयी तस्याश्च वधे यथा
पुरुषहत्या वद्व्यवहारे साक्षे सत्यया न्यैनानृवधप्राप्तौ साक्षी च गुरोः क्रोधावेशी च। ब्राह्म
णनिक्षेपं हृत्वा आहिताग्निब्राह्मणस्यापि सगुणा सोमयागस्थविद्यालको ब्राह्मणहत्याव्रतं चरे
त्। अतिदेशिकेषु पादोनं प्रायश्चित्तं प्रायश्चित्तस्यातिदेशानपातित्यस्य च ब्राह्मणवधार्थं प्र
हारे कृते न विस्तलिबंधे नासौ न मृतस्तथापि ब्रह्महत्यापि व्रतं पादोनं चरेत्। दागमने धैत्र

॥९६॥

सार०

॥९६॥

यत्वे पादं ब्रह्महत्यासमानमर्धं प्रायश्चित्तं सर्वत्र। साक्षात्कर्तुरनुग्राहकस्य पादोनं। प्रयोजकस्यार्द्धं।
अनुमंतुः सार्द्धपादं निमित्तकर्त्तुः पादं प्रोत्साहकादीनां च तारतम्यं विद्यात्। सर्वत्र बालवृद्धास्त्रियोरो-
गिणश्च साक्षात्कर्तृत्वेपि प्रायश्चित्तार्द्धमर्हंति। अशीतिवर्षादूर्ध्वं वृद्धः षोडशाब्दात्प्राग्बालः। अनूप-
नीतानां बालानां कन्यानां च प्रायश्चित्तं पादं तत्पिता भ्राता न्यो वा सुहृच्चरेत्। ततो द्वादशाब्दं तेभ्य
ऊर्ध्वं स्वयमेव चरेयुः। सर्वत्र जातिशक्तिगुणाद्यपेक्षया व्यवस्था॥ ॥इत्यादि स्मृत्यर्थसारे ब्र-
ह्महत्याप्रायश्चित्तं॥ ॥अथ सुरापानप्रायश्चित्तं॥ ॥तत्र मुख्या सुरा पैष्टी। गौडी माध्वी तु मद्यानि। त-
त्र सुरां त्रैवर्णिकस्तथा शूद्रा स्त्री च चातुर्वर्ण्ये विवाहे उत्पत्त्यादि न पिबेत्। यदि सुरां ज्ञानात्सकृत्पिबेत्
सुरांबु गोमूत्र क्षीर घृतानामन्यतममग्निसन्निभं तप्त्वा आर्द्रवासा लोहेन पात्रेणायसेन ताम्रेण वा
पीत्वा मरणाच्छुध्येत्। अज्ञानाज्जलबुध्या सुरापाने जटी बालचीरीदवासा ब्रह्महत्याव्रतं तच्चिन्हं च
जं द्वादशाब्दं संपूर्णं कुर्यात्। न पादोनं। सत्र स्त्रीबालवृद्धादीनामर्धं षडब्दं। अनूपनीतानां कन्यानां
च पादं त्र्यब्दमेवं विधेयात्। अज्ञानाच्चेद्द्विगुणं। यद्यपि तां सुरां छर्दितवानन्यद्रव्यं रात्रौ सहकृत्पिण्याकमेवा-
दद्यात्तेनाश्नीयात्। कणान्वा तथैवादद्यात्। सुरापानतालुमात्रसंयोगे वर्षं बालवासा जटी ध्वजी त

स्मृत्य०

थाकुर्यात्। सुरैकौघधरो गार्थं पानेत्वज्ञानेकृच्छ्राब्दपादं चांद्रायणं वा कृत्वा पुनरुपनयनं च कार्यं।
बाल्येनुतत्वमातापितावाकुर्यात्। ज्ञानेतुतप्तकृच्छ्रं पराकं चांद्रायणं वक्रमात्कुर्यात्। सुरासंस्पृ
ष्टपानं आर्द्रभोजनं आर्द्रसुराभांडोदकादिपानं च सुरापानमेव। सुरासंस्पृष्टशुष्करसान्नस्य मूत्रवि
ड्तः शब्दादीनां चाज्ञानाद्भक्षणे कायं प्राजापत्यं पुनरुपनयनं च। शुष्कसुराभांडोदकदाने छर्दनमु
पवासो घृतप्राशनं वा तज्जलपर्युषितं पीत्वा शंखपुष्पीविपक्वं क्षीरं त्र्यहं पिबेत्। अज्ञानाद्विरभ्या
से पूर्ववरात्रं क्षीरं पिबेत्। ज्ञानात्तज्जलपाने सप्तरात्रं पिबेत्। ज्ञानाभ्यासे तु द्वादशरात्रं क्षीरेण ब्राह्मीसु
वर्चलां पिबेत्। सुरापमुखगंधस्यामत्या घ्राणे सोमपश्चेदस्त्रीन्प्राणायामान्कृत्वा घृतं प्राश्नीयात्।
मत्यावृद्धिगुणं सर्वत्र। असोमपाश्चेदनप्सु प्राणायामान्कृत्वोदकं चाहुः। साक्षात्सुरागंधाघ्राणेतु ज्ञा
तित्रेंशाकरेषूक्तं सांतपनं। मत्यावेत्कायेपसेयमित्यादि॥ ॥इत्यादिस्मृत्यर्थसारे सुरापानप्रायश्चि
त्तं॥ ॥अथमद्यपानप्रायश्चित्तं॥ ॥७॥ तत्र गौडी माध्वी सुरा मद्यैरत्युच्यते। तालं पानसं द्राक्षं म
धुरं खर्जुरं सैरमारिष्टं मैरेयं नालिकेरमेतान्येकादश मद्यानि विंद्यात्। एतानि मद्यान्युत्सृज्यानिंदिता
नि। ब्राह्मणानां तत्स्त्रीणां वानुपनीतस्य कन्याया अश्वापयानि क्षत्रवैश्ययोर्मद्यं न दुष्यति। अस्य स

॥९९॥

सार०

॥९९॥

रामद्यं न दुष्यति। अज्ञानाज्जलादिबुध्या तालादिमद्यपाने तप्तकृच्छ्रं पुनरुपनयनं चामूत्रविड्रेतः
सुरादिभक्षणे द्विजानां चैवं। अज्ञानाद्गौडीमाध्वीसुरानां तालादिमद्यपाने चकृच्छ्रातिकृच्छ्रौ चां
द्रायणं च कृत्वा पुनरुपनयनं घृतप्राशनं च। गौडीमाध्वीज्ञानात्पाने तु पिण्याकेनकणेन वा त्रिवार्षि
कं। अभ्यासे षडब्दं। अत्यंताभ्यासे निरंतराभ्यासे च द्वादशाब्दं बहुकालाभ्यासे तु अग्निवर्णं
मद्यं पीत्वा मृतः शुद्ध्येत्। तालादिषु तदर्धं कल्प्यं। सर्वत्र स्त्रीबालवृद्धादीनामर्द्धं। अनुपनीत
स्य कन्यायाश्च पादं मातापितादिर्वा कुर्यात्। तालादिमद्यापेयालेह्याभक्ष्यामूत्रविड्रेतःसुरा
दीनां मुखमात्रप्रवेशे क्षीरोदुंबरबिल्वपालाशकुशोदकं षडात्रं पिबेत्। गौडीमाध्वीसुराद्विगु
णं। अज्ञानाद्गौडीमाध्वीमद्यवासितशुष्कभांडांबुपाने कुशमूलविपक्वक्षीरं त्र्यहं पिबेत्। अ
ज्ञानतोऽभ्यासे तु क्षीरोदुंबरबिल्वपालाशकुशोदकं त्र्यहं। अज्ञानादत्यंताभ्यासे शंखपुष्पीघृ
तक्षीरं पंचरात्रं पिबेत्। ज्ञानतोऽभ्यासे तु गोमूत्रपानं सप्तरात्रं। अत्यंताभ्यासे तु ब्राह्मीसुवर्च
लां पयसा द्वादशरात्रं। तालादिमद्यभांडोदपाने षडर्धं कल्प्यं। सर्वत्र स्त्रीबालादीनां योग्यं कल्प्यं॥८॥
इत्यादिस्मृत्यर्थसारे मद्यपानप्रायश्चित्तं॥ ॥अथ सुवर्णस्तेयप्रायश्चित्तमुच्यते॥ ॥स्तेयप्र

ड्डेन समक्षं परोक्षं वा बालाच्चौर्येण वाञ्चकयादिस्वत्वहेतुं विना ग्रहणमुच्यते। तत्रादौ सुवर्ण
प्रमाणं निरूप्यते। गवाक्षगतसूर्यरश्मिमध्ये दृश्यमानं त्रसरेणुप्रमाणं रज इत्युच्यते। तच्च
त्रसरेण्वष्टकं तु लिक्षा। त्रयं राजसर्षपः। राजसर्षपत्रयं गौरसर्षपः। गौरसर्षपषट्कं यवः।
यवत्रयं कृष्णलः। कृष्णलपंचकं माषः। षोडश माषकं सुवर्णं। अथ मत्या ब्राह्मणस्य सुवर्णं हृ
त्वा द्वादश वर्षाणि ब्रह्महत्याव्रतं वा शिरोध्वजतत्कपालधारणरहितं चरेत्। अथ स्वकस्या
पि हिरण्ये यः कश्चिद्धरति तस्यैकादशगुणं दत्वा प्रायश्चित्तं समाचरेत्। गुरूणां वा य
ज्ञकर्तॄणां वा श्रोत्रियाणां वा धार्मिकब्राह्मणानां वा सुवर्णं हृत्वात्मनो मुंडनं कृत्वाथ शरीरं
घृतेनाभ्यज्य करीषाग्निना दितो दग्धः शुध्येत्। निर्गुणानि विप्रसुवर्णहरणे नवाब्दं द्वादशा
मेव चरेत्। क्षुत्क्षामः स्वकुटुंबरक्षार्थं हरणे षडब्दं विश्वजिदादिकं क्रतुं वा कुर्यात्।
मत्या यः कश्चिद्ब्राह्मणसुवर्णहारी एकसुवर्णमात्रस्य स्वपापं ब्रूयात्। यन्निवेद्य आयसदंडं
खादिरं वा प्रदाय मुक्तकेशो धावन् राज्ञा सकृद्दंडेन ताडितो मृतो वा जीवन्वा शुध्येत्। स्वत्रा
स्यात्राताडने राज्ञस्तद्दोषः स्यात्। सुवर्णस्तेयी ब्राह्मणो व्रतमेतत् चरन् न दंडेनात्मानं

घातयेत्तानवविप्रं राजा हन्यात् हननेब्रह्महत्याभवत्येव। अग्निहोत्री धार्मिकोब्रविद्वान्क्षत्रियो
ब्राह्मणसुवर्णहारी अश्वमेधेन शुध्येत। गोसवयज्ञं कृत्वा वा शुध्येत। आत्मानं संमितं हेमं दत्वा
वा शुध्येत। तावद्धनाभावे तपस्य ब्राह्मणस्य कुटुंबरक्षणपर्याप्तं धनं दद्यात्। अब्राह्मण
श्च ब्राह्मणसुवर्णस्तेयी दंडताडनेनात्ममरणमनिच्छन्सुरापानव्रतं कृत्वा शुध्येत। यदात्वपहा
रानंतरं ज्ञातानुतापः पश्चात्पर्यपतितस्यज्ञातिवा तत्रापस्तंबोक्तं चतुर्थकालमिताशनं त्र्यब्दं भ
नसा सुवर्णस्तेय प्रवृत्तः स्वयमेवोपरतश्चेत् द्वादशाहं वा पुत्तक्षः शुध्येत। सुवर्णस्तेयसमे
घरत्नमनुष्यस्त्रीभूधेनुहरणादिषु सुवर्णस्तेय प्रायश्चित्तार्द्धं कार्यं। त्रसरेणुप्रमाणहेम
स्तेय एकः प्राणायामः। लिक्षाप्रमाणस्तेये त्रयः प्राणायामाः। राजसर्षपप्रमाणहेमस्तेये च
त्वारः षड् प्राणायामाः। गौरसर्षपप्रमाणहेमस्तेये अष्टसहस्रं गायत्रीजपः। यवप्रमाण
हेमस्तेये प्रातरारभ्य सायंकालांतं गायत्रीजपः। कृष्णलप्रमाणहेमस्तेये सांतपनं। माषप्र
माणहेमस्तेये गोमूत्रपक्वयवभुक्मासत्रयेण शुध्येत। सुवर्णप्रमाणकिंचिन्न्यूनहेमस्ते

ये गोमूत्रपक्वयवभुगब्देन शुध्येत्। सं पूर्णस्वर्णप्रमाणब्राह्मणहेमस्तेये द्वादशाब्दव्रतादि
कं कार्यमित्यर्थः। स्वर्णप्रमाणन्यूनं रजस्तेये सांतपनं। निष्कचतुष्कप्रमाणादूर्ध्वं दशनिष्कांतं
रजस्तेये चांद्रायणं कार्यं दशप्रमाणादूर्ध्वं शतनिष्कांतरजस्तेये चांद्रायणद्वयं। शतनिष्कादूर्ध्वं
सहस्रनिष्कांतरजस्तेये चांद्रायणत्रयं। सहस्रनिष्कप्रमाणादधिकरजस्तेये पादोनं ब्रह्महे
त्याव्रतं चरेत्। नागवंगायस्ताम्रपित्तलकांस्यानां सहस्रप्रमाणस्तेये पराकः। एतेषां निष्कस
हस्रादिमूल्यानां स्तेये ब्रह्महत्याप्रायश्चित्तं द्वादशाब्दिकं। चतुर्निष्कमूल्यरत्नस्तेये सांतपनं
चतुर्निष्कमूल्यादूर्ध्वं दशनिष्कमूल्यानंतररत्नस्तेये चांद्रं। दशनिष्कप्रमाणादूर्ध्वं शतनिष्कमू
ल्यांतररत्नस्तेये चांद्रद्वयं। शतनिष्कमूल्यादूर्ध्वं सहस्रनिष्कमूल्यांतररत्नस्तेये चांद्रत्रयं। सह
स्रनिष्कमूल्यादधिकरत्नस्तेये ब्रह्महत्याप्रायश्चित्तं पादोनं नवाब्दादिकं। ब्राह्मणस्य नि
क्षेपं स्वर्णं हृत्वा षडब्दं चरेत्। ताररत्नभूमिहिरण्यहरणे च षडब्दकं॥ ॥इत्यादि स्मृत्यर्थसा
रे स्वर्णस्तेयप्रायश्चित्तं॥ ॥अथ गुरुतल्पगप्रायश्चित्तं॥ ॥जनको गुरुस्तत्तल्पस्तस्य
भार्योच्यते। अज्ञानेन मातरं गत्वा मातृसपत्नीं सवर्णामुत्तमवर्णां या तया ज्ञातोत्साहितो ज्ञाना

दृष्ट्वा यो पितामहो हि स्त्रियं स्कन्नमात्रमालिंग्य मृतः शुध्येत्। तप्तायःशयने स्कन्नावामृतः शुद्ध
उभयप्रोत्साहनेऽतु तप्तायःशयनेन तप्तस्त्रियालिंगनाच्छुद्धिः। स्वयं प्रोत्साहये गतश्चेत्तस्य स्य गु
ह्यत्रिकं स्वहस्तेच्छिन्नं स्वांजलिना धृत्वा नैर्ऋतीं दिशं गच्छेत् । न गलेः स्थित्वा समीविचारयन्नु
पृष्ठतोऽपभूयन्त्राणां तं गत्वा शुध्येत्। अत्र मत्या सवर्णान्त्यमवर्णस्त्रीगमने द्वादशाब्दं ब्रह्म
हत्याव्रतं। अमत्याभ्यासे घृताक्तो मुंडितः करीषराशिमध्यस्थः पादादिसर्वांगदाहान्मृ
तः शुध्येत्। जनन्या मत्या चैवं। जनन्या मत्या प्रवृत्तौ रेतःसेकात्प्राङ्निवृत्तस्य द्वादशा
ब्दं। अमत्या षडब्दं। सवर्णान्त्यमवर्णास्त्रमत्या प्रवृत्तौ रेतःसेकात्प्राङ्निवृत्तस्य षडब्दं।
अमत्या त्र्यब्दं। मत्या मातुः सपत्नीं सवर्णां व्यभिचारिणीं गत्वा चेद् जपसहितं पादत्रयं कु
र्यात्। मत्याब्दं लघु। क्षत्रियापितृभार्यां मत्या विप्रः सकृद्गत्वा नवाब्दकं चरेत्। अमत्याभ्यासे तु
वृषणौ विना लिंगच्छेदाच्छुद्धिः। अत्र मत्या सकृद्गत्वा त्रैवार्षिकं मुहुः कालानुगुणं। अमत्याभ्यासे लिं
गं विना वृषणच्छेदनाच्छुद्धिः। क्षत्रियायां मत्या प्रवृत्तस्य रेतःसेकात्प्राङ्निवृत्तौ तथा प्रोत्साहि
तस्य त्रैमासिकं कार्यं। उभये प्रोत्साहने न प्रवृत्तस्याति लघु त्रैमासिकं। स्वेन प्रोत्साहितायां कृच्छ्र

लिकृच्छ्रं त्रैमासिकं । तत्रैवामत्या प्रवृत्तस्य रेतःसेकात्प्राङ्निवृत्तस्य योषिद्भयात्मप्रोत्साहेषु क्रमा
दतिकृच्छ्रतप्तकृच्छ्रचांद्रायणानि । वैश्यायां गुरुपत्न्यां मत्यासकृद्गमने षडब्दं चरेत् । मत्याभ्या
से लिंगच्छेदनाच्छुद्धिः । अमत्यासकृद्गमने त्र्यब्दं । अमत्याभ्यासे यावज्जीवं ब्रह्मचर्यव्रतं । वै
श्यायां मत्या प्रवृत्तस्य रेतःसेकात्पूर्वं निवृत्तस्य भयात्मयोषित्प्रोत्साहे तेषु क्रमात्तप्तकृच्छ्रपरा
कसांतपनानि । अमत्या प्रवृत्तस्य योषिद्भयात्मप्रोत्साहे तेषु क्रमात्त्र्यहरात्रसप्तरात्राष्टरात्राणि
नाश्नीयात् । शूद्रां गुरुपत्नीं मत्या विप्रः सकृद्गत्वा त्र्यब्दं चरेत् । मत्याभ्यासे द्वादशाब्दं । अमु
त्यासकृद्गमने अब्दं कार्यं । अमत्याभ्यासे निरंतरं चांद्रत्रयं । शूद्रायां मत्या प्रवृत्तस्य रेतःसे

कात्प्राङ्निवृत्तस्य योषिद्भयात्मप्रोत्साहे तेषु क्रमादतिकृच्छ्रतप्तकृच्छ्रपराकाः । तत्रैवामत्या
प्रवृत्तस्य कायसांतपनं सप्तरात्रोपवासाः । एवं क्षत्रियापुत्रस्य वैश्यायां मातरि मत्यासकृद्ग
मनादिषु नवाब्दादीनि योज्यानि । शूद्रायां च नवाब्दादीनि योज्यानि । वैश्यापुत्रस्य च शूद्रायां
नवाब्दादीनि योज्यानि । सर्वत्र गमनं चरमधातुविसर्गमुच्यते । सर्वत्र रेतःसेकात्प्राङ्नि
वृत्तौ मरणांतेषु द्वादशाब्दं । अन्यत्रार्धार्धं कार्यं पुरुषवत्स्त्रीणामपि महापातकानि संस्ये

वा। अज्ञानतस्त्वासां मत्या प्रवृत्तौ मरणांतिकं प्रायश्चित्तं। ज्ञानतो मत्या प्रवृत्तौ द्वादशाब्दादिष्वेव सर्वत्रा
र्धकृच्छ्रद्वयायोग्यं पुरुषोत्तमवल्लकार्यं जात्युक्तं। पारदार्यं कन्यादूषणमेव च। साधारणस्त्रियो ना
स्ति गुरुतल्पत्वमेव च॥ ॥अथातिपातकानुपपातके प्रच्यंते॥ ॥मत्या समानगोत्रां समानप्र
वरां कन्यां तु ऊढां गत्वा गुरुतल्पव्रतात् शुध्येत्। तज्ज्ञानतो गर्भेत्रिंशत्कलः स्यात्। सा पत्नी संभोगे त्याज्या
र क्षेप्रा। अमत्या दूढां गत्वा त्रिंशिश्चांद्रः शुध्येत्। गर्भस्य काश्यपस्यात्। सवर्णां कन्यां मित्रस्त्रियं
भगिनीं सगोत्रां चांडालीं मातंगीं चात्मजस्त्रियं सकृद्ज्ञानाद्गत्वा चांद्रद्वयात् शुध्येत्। ज्ञानात्सकृ
द्गमने कृच्छ्राब्दात् शुद्धिः। आसामन्यतमामेकस्यां रात्रौ बहुवारं गत्वा ब्रह्महत्याव्रतं त्रैवार्षिकं
चरेत्। आसामन्यतमामनेकादिनेषु तथा गत्वा ब्रह्महत्याव्रतं षडब्दं चरेत्। आसामेकां बहुदिवस पू
र्वं बहुदिनेषु गत्वाग्निं प्रविश्य मृतेः शुध्येत्। मातृष्वसारं पितृष्वसारं मातामहीं पुत्रीं माचार्यभार्या
मनुजपत्नीमनुजनिजां स्नुतां मातुलानीं मज्ञानोत्सकृद्गत्वाब्दकृच्छ्रेण शुध्येत्। आसामेकामे
कामेकस्मिन् दिने बहुवारं गत्वा त्रैवार्षिकं ब्रह्महत्याव्रतं चरेत्। आसामेकां बहुदिनेषु च अ

स्मृ०स्य०

नुबंधेन गत्वा ब्रह्महत्याप्रायश्चित्तं कुर्यात्॥ आसामेकां सकृज्ज्ञानाद्गत्वा षडब्दं ब्रह्महत्याव्रतं च
रेत्॥ आसामेकां बहुदिनेषु बुद्धिपूर्वं गत्वाग्निं प्रविश्य मृतः शुध्येत्॥ चांडालीं पुल्कसीं व्याधस्त्रि
यां भगिनीं स्नुषां मातुः स्वसारं पितुः स्वसारं सखीं विप्रस्त्रीं प्रव्रजितां मातुलानीं शरणागतां अं
तःपुरं परस्त्रियं च शिष्यपत्नीं पतिव्रतां सगोत्रां च गत्वा रेतोनिःसरणात्पूर्वं निवृत्तेस्य मासोप
वासेन शुद्धिः। चांद्रायणेन वा। एतासामन्याव्यभिचारिणीं यदि सकृद्गच्छेत् चांद्रायणेन शुध्येत्।
अज्ञानात्तां स्त्रियं सकृद्गत्वा तप्तकृच्छ्रेण शुध्येत्॥ ॥इति स्मृत्यर्थसारे गुरुतल्पगप्रायश्चि
त्तम्॥ ॥अथ महापातकिसंसर्गप्रायश्चित्तमुच्यते॥ ॥एतैश्चतुर्भिर्महापातकिभिः सहारा
ध्ययनाध्यापनविवाहयजनयाजनसहवाससहभोजनादीनि कृत्वा सद्यः पातित्यमाप्नोति।
एतैरेकासनेस्थितमेकपंक्तिभोजनं च एकशयने स्वापनं च एकवाहनगतिं च एकवत्सरं कृत्वा
पातित्यमाप्नोति। येन महापातकिना सः संसर्गपतितः स तस्योक्तव्रतात् शुध्येत्। तस्य मरणा
न्तादिकप्रायश्चित्तमज्ञानब्रह्महत्यादिव्रतं द्वादशाब्दिकं स्यात्। अज्ञानाद्वर्षं येन संसर्गो जात
स्तस्य तदुक्तव्रतार्धाच्छुद्धिः। अज्ञानाच्चतुर्भिर्महापातकिभिः पंचरात्रं संसर्गे त्रिरात्रं कृच्छ्रः दश

सार०

॥१०३॥

रात्रं संसर्गजे कायकृच्छ्रं द्वादशरात्रसंसर्गे महासांतपनं। पक्षसंसर्गजे द्वादशोपवासाः माससंस
र्गजे पराकं। त्रिमाससंसर्गजे चांद्रं। षण्माससंसर्गे चांद्रद्वयं। किंचिन्यूनाब्दे नैरंतर्य संसर्गजे षण्मासे
कृच्छ्राः ज्ञानाच्चतुर्भिर्महापातकिभिः पंचाहसंसर्गे कृच्छ्रः। दशाहसंसर्गे तप्तकृच्छ्रः। द्वादशाहसं
सर्गे द्वादशोपवासः। पक्षसंसर्गे पराकः। माससंसर्गे चांद्रं। त्रिमाससंसर्गे चांद्रायणं। त्रिमाससंसर्गे कृ
च्छ्रचांद्रायणं। षण्माससंसर्गे षण्मासं कृच्छ्रं। किंचिन्यूनसंवत्सरसंसर्गे चांद्रायणोत्तरं मब्दं। एतेषां च
तुर्भिः संसर्गे स्त्रीबालवृद्धातुरास्तत्तदुक्तव्रतार्द्धं कुर्युः। महापातकिसंसर्गिसंसर्गे तु तत्संस
र्गिव्रतस्यार्द्धं कार्यं॥ ॥इत्यादिस्मृत्यर्थसारे महापातकिसंसर्गिप्रायश्चित्तं समाप्तं॥ ॥अथोप
पातकप्रायश्चित्तान्युच्यंते॥ ॥अज्ञानात् ब्राह्मणमात्रस्य गोमात्रे ब्राह्मणो हत्वा त्रिरात्रमुपोष्य
वृषभैकादशा गा दत्वा शुध्यति। द्वादशप्राजापत्यैर्वा। अस्यामनापद्द्वादशधेनूर्वा दत्वा शुध्यति।
ज्ञानाच्चेत् गोहितो गोनुगामी गवां गमनस्थानशयनेषु स्वयं च तथा कुर्वन् तामातपव्याधिक्षु
त्पिपासाभीतादिभ्यो रक्षन् आत्मीयपरकीयसस्यपानेषु वारयन् वदन् रात्रौ गां नत्वा वीरासनो

स्मृ०सं०

मितं चान्य श्राकाद्याहारो मासत्रयांते वृषभैकादशगाः दत्वा शुद्धः । ज्ञानतः सर्वस्वं दत्वा शुध्यति ।
प्राजापत्यं प्रत्याम्नायपक्षे तु पूर्वोक्तानुद्विगुणं । अज्ञानात् क्षत्रियस्य गोमात्रं हत्वा गोहितो गोनु
गामी गोष्ठशायी त्रिषवणस्नायी पंचगव्यमेव पिबन्मासांते धेनुं दत्वा शुध्यति । षट्
प्राजापत्यं वा । प्रत्याम्नाये षट् धेनवो देयाः । ज्ञानाच्चेच्चतुर्थकालहविष्यभक्षी क्षारालवणं मितं
भुंजानो गोमूत्रस्नायी द्वौ मासौ नीत्वा शुध्येत् । प्राजापत्यप्रत्याम्नायो चेद् द्विगुणो । अज्ञानाद्वैश्य
स्य गोमात्रं हत्वा गोहितादि कृत्वा दिनेकं कृच्छ्रं निरंतरं चरन्मासांते धेनुं दत्वा शुध्यति । पंचप्रा
जापत्यं वा । प्रत्याम्नाये पंच धेनुर्वा दद्यात् । ज्ञानाच्चेद्वैश्यस्य गोमात्रं हत्वा तद्विगुणं सर्वं च
रेत् । अज्ञानाच्छूद्रस्य गोमात्रं [illegible] हितादि कृत्वा प्राजापत्यं निरंतरं चरन्मासांते धेनुं दत्वा शुध्य
ति । प्रत्याम्नाये च धेनु चतुष्कं । ज्ञानाच्चेत् कृच्छ्रतपो गोचर्मणा द्वैमासं वृतो गोष्ठे वसन्मासं यवा
न्नः पिबन् शुध्यति । प्राजापत्यप्रत्याम्नायो चेद् द्विगुणो । अकामतो भयागस्त्यश्रोत्रियस्य गोमात्रं
हत्वा गोहितादि कृत्वा पूर्वोक्तादि नुगम्बांते वृषभैकादशगाः दद्यात् । गोग्रासपंचकृष्णमासे पूर्णशु
द्धः कामात्वेत् गोहितादि कृत्वा मुंडीनाकादि युक्तं त्र्यब्दं चरेत् । धनी द्वैमासिकं व्रतं गोत्रालंदं

॥२०४॥

सा०र०

॥२०४॥

द्यात्। छागमात्सोमयागस्थश्रोत्रियातिदुर्गतिकुटुंबिब्राह्मणस्य कपालीहोमार्थां गर्भिणीं बहु
क्षीरां स्तृ च तत्तरूणादि गुणां निर्गुणाधेनवान्नतिक्षयात्खड्गादिना हत्वा भ्रूणहा भवतीति ब्रह्म
हत्याद्विगुणं व्रतं चरेत्। यद्वा गोहितादि रुद्रदंड मौंजीपटदक्षारालवपांशुक्षेपषष्ठकाले ऽश्नन्
गोमतीप्रपावं वेदं वाजपन्न द्विमासांते गोसहस्रं दद्यात्। अज्ञानाद्ब्रह्महत्याव्रतं त्रैवार्षिकं
वृषभैकशतगोदानं। गर्भिण्याः कामतश्चैतत्। अकामतश्च गोहितादिरुद्र मौंजीशाकादिपु
ष्यब्दं चरेत्। यदि तां काष्ठेन हन्यात्सांतपनं पूर्वं गोसहस्रं मृते दानं त्र्यब्दादिषु लोष्ठेन कार्यं।
पाषाणादिना तप्तकृच्छ्रं गोसहस्रं इति स चतुर्थं पूर्ववद्व्रतांते विप्रान्संभोज्य तेभ्यस्त्रिशक्राः वृषभं च द
द्यात्। बालामतिवृद्धां अतिकृशां अतिरोगिणीं च हत्वा सर्वप्रोक्तार्द्धव्रतं कृत्वा विप्रान्संभोज्य
शक्त्या हैमतिलान्दद्यात्। एकाब्दे गवि हते पादं द्व्यब्दे र्द्धं त्र्यब्दे पादोनं ततः क्राद्यं चरेत्। गर्भि
ण्या वधे तु व्यतो उत्सन्ने गर्भपादं। दा दृश्ये र्धं। अस्य पादोनं चैतन्ये गोव्रतं द्विगुणं। अज्ञा
ने देका बहवो हत्वा क्षे व्रतस्य पादो पादे प्रत्येकं कुर्युः। द्वि हत्वार्धं। बहवीः पादोनं ज्ञानाचेत्स

स्मृत्य०

त्येकं कृच्छ्रमेव वा। एकेन रोधादिना बहूनां वधे द्विगुणव्रतं। अज्ञानाद्वैद्येन चिकित्सार्थे नौषधेनै कस्याप्यवधे द्विगुणव्रतं। अज्ञानाद्वैद्येन हितबुध्याप्यौषधदानेपादव्रतं। रोधादौ व्यव हितकर्तृषु रोधने पादं बंधने अर्द्धं योजने पादोनं। निपातने सर्वं। अज्ञानाद्रोधादिकृते ज्ञा न्यप्रमादपरिहारार्थमवेक्ष्यमाणे मृते कायं कृत्वा विप्रान्संभोज्य गोमिथुनं दद्यात्। रोधनादि जन्यप्रमादरक्षणाकरणेक्रमात्पादार्धं त्रिपादं सर्वाणि त्रैमासिकादीनि कार्याणि चिन्हव्या ध्योरन्यत्र दोहातिदाहवनासापुच्छाच्छिन्ने द्विच्छेदने दीपर्वतादिरोधे तिपिदाहे तिदमने सं घाते योजने अंखलानां नालिकेरसपावालमोन्यादिभिः दृढपाशबद्धे मृते पादोनं सर्वत्र। घंटादिभूषणनिमित्ते अर्द्धं कृच्छ्रं। मृतके ल्पवधे तु सकृपायकं पयो दधि घृतादिकं मात्रा सार्धं भुक्त्वा विप्रान्संभोज्य गां दद्यात्। मरणहेतुव्याधिमुत्पाद्य द्वादशरात्रं पंचगव्यं पिबेत्। श्रृंगास्थिभंगे चर्मचर्मविमोचनादौ च गविजीवति मासार्धं यवागूं पिबेत्॥ अशक्तौ च प यो दधि घृतं वा दशरात्रं पिबेत्। अनुग्राहकप्रयोजकादीनां एवं वद्दोषतारतम्यं। अर

सार०

॥१०५॥

॥१०५॥

क्षोपेक्षानिमित्तं जलपंकोश्रावचादिविषमस्थाने दुर्गे चिमूल्यगृहे विघ्नदुष्टं धनत्सर्पमृग
व्याघ्रश्वापदाद्यैः श्वानवाताद्यैश्च मृते गोस्वामी कार्यं कुर्यात् । कार्यांतरव्यग्रत्वेन रुद्धा गृहे ग
र्भनिर्गमनार्थं संदेहदंशकुशादिप्रवेशनिमित्ते वधे रक्षार्थे रोधे बंधने च न दोषः । औष
धस्नेहाद्याहारदीयमाने वा हितार्थे दाहच्छेदक्रियादौ च पुत्रग्रामघाते शरीरघातगृहभंगे अ
तिवृष्टौ कूपादिपाते वारण्यगृहग्रामादिदाहे च दोषो नास्ति सर्वत्र । वृद्धमृते पादं चरेत् । वा
गवि स्त्रीत्वे न विवक्षितं । सर्वत्र हतगोसदृशीं गां तन्मूल्यं वा गोस्वामिने दत्त्वैव प्रायश्चित्तं ।
राजदंडश्चैतत्समं । एतत्सर्वं हंतुर्ब्राह्मणस्यैव । क्षत्रियस्य सर्वत्र पादोनं वैश्यस्यार्द्धं । शू
द्रेः पादं विंद्यात् । सर्वत्र स्त्रीबालवृद्धादीनां त्वर्द्धं अनुपनीतस्य पादं तत्पित्रादिश्चरेत् ।
स्त्रीणां तु वपनमनुगमनं गोष्ठेशयनं चर्मप्रावरणं च नास्ति । सर्वान्केशान्समुद्धृत्य द्व्यंगु
लद्वयं छेदयेत् सर्वत्रैवं तासां । पुंसां तु पादव्रते आकंठलोम्नां वपनं अर्धे श्मश्रूणां वा त्रि
पादे शिखावर्जं । समस्ते सशिखं वपनं । ज्ञानाच्चेत्सर्वत्र द्विगुणं ॥ ॥ इति स्मृत्यर्थसारे गो

बधप्रायश्चित्तं ॥ अथ व्रात्यत्वादौ प्रायश्चित्तं ॥ तत्र सर्वोपपातकापं चांद्रायणं
पंचगव्यं मासं पयो मासं पराकं त्रैमासिकं कृच्छ्रं वा अतिपाठोक्ताभावे कुर्या
त् ॥ व्रात्यत्वे तु उपनयननेत्राद्यभावे नोपनयनकालातिक्रमेप्यांऽऽदिव्रतत्व
तुष्केष्वन्यतमं त्रात्त्याकारयित्वोपनयनं कार्यं ॥ अनापदि कालातिक्रमे
त्रैमासिकं कारयित्वोपनयेत् ॥ तत्रैव पंचदशवर्षादूर्ध्वमप्रिकियत्काला
तिक्रमे तु उद्दालकव्रतं चरेत् ॥ द्वौ मासौ यावकेन वर्त्तयेत् ॥ मासं पयसा प
क्षमामिक्षया ॥ अष्टरात्रं घृतेन ॥ षड्रात्रमयाचितेन त्रिरात्रमब्भक्षोऽहो
रात्रमुपवसेदिति ॥ व्रात्यस्तोमेन वा यजेत् ॥ यस्य पिता पितामहो वा
नुपनीतौ स्यातां तस्याब्दं त्रैविद्यकं ब्रह्मचर्यं ॥ यस्य प्रपितामहादेर्ना
नुस्मर्यते उपनयनं ॥ तस्य द्वादशाब्दं त्रैविद्यकं ब्रह्मचर्यमित्याप

॥१०६॥

स्तं बोक्तं कृच्छ्रोपनयनं ॥ ॥अथ स्तेये॥ ॥तत्राविप्रो विप्रस्य दश कुंभधान्यं शालिव्रीहिमितं तंदुला
दि वा तावत्ताम्ररजतादिकं वा ऽमत्याहृत्वा त्रैमासिकं कुर्यात्। मत्याभ्यासे कृच्छ्राब्दः। क्षत्रियादे
र्हर्तुः पादः। पादं ऽक्कासः। क्षत्रियस्य स्वं विप्रो हृत्वा षण्मासिकं। वैश्यस्य स्वं हृत्वा त्रैमासिकं। शूद्र
स्य स्वं चांद्रं। एवमुक्तेरत्राप्यूह्यं। कुंभः पंचसहस्रपलपरिमाणः। विप्रस्य गृहक्षेत्रभूमिनिक्षेपरज
तरत्नघटक्रमणीनां नराश्च स्त्रीणां च सार्द्धशतद्वयपणलभ्यमानीयरसवापीकूपजलानां च हर्तु
र्विप्रस्य कृच्छ्रवर्षं स्तेयसमं वा। क्षुद्रादिस्वे चांद्रं तदर्धं पादादि। त्रपुसीसादिद्रव्याणां। स्वल्पप्र
योजनानां सार्धशतद्वयपणपंचदशांशमांसां तपनं। भक्ष्यभोज्याहारपानादीनामेकवारभो
जनपर्याप्तानां यानशय्यासनानां पुष्पमूलफलानां च हर्तुः पंचगव्येनाहोरात्रं त्रिवारभोजन
पर्याप्तत्रिरात्रं काष्ठद्रुमाणां त्रिवारभोजनपर्याप्तमूल्यानां धान्यशुष्कान्नगुडतैलचर्ममांसानां
च हर्तुस्त्रिरात्रं। मणिमुक्ताप्रवालानां ताम्ररजतायसकांस्योपलानां च द्वादशाहाहारपर्याप्तमू
ल्यानां हर्तुर्द्वादशाहं। कणान्नकार्पासकीटजोर्णानां द्विखुरैकखुररज्जुपक्षिगंधौषधीनां

यत्रिवारमोजनपर्याप्तमूल्याद्घर्णाहन्तुः पयस्त्यहं। सर्वत्रहीयमाणद्रव्याक्षयत्वबहुत्वाभ्यां
